# रसगङ्गाधरहृदयम्

श्री ज्ञानचन्द्रस्त्यागी



चौखम्बा विद्याभवन, वाराणसी-१

॥ श्रीः ॥

विद्याभवन संस्कृत ग्रन्थमाला

११०

॥ श्रीः ॥

# रसगंगाधरहृदयम्

लेखकः

साहित्याचार्यः —

**श्री ज्ञानचन्द्रस्त्यागी, एम० ए०**

( राजस्थानान्तर्गतश्रीगङ्गानगरस्थराजकीयमहाविद्यालयप्राध्यापकः )

चौखम्बा विद्याभवन वाराणसी-१

प्रकाशक : चौखम्बा विद्याभवन, वाराणसी

मुद्रक : विद्याविलास प्रेस, वाराणसी

संस्करण : प्रथम, वि० संवत २०२०

मूल्य : २-००

© The Chowkhamba Vidya Bhawan,
Chowk, Varanasi-1
( INDIA )
1964

Phone : 3076

THE

VIDYABHAWAN SANSKRIT GRANTHAMALA

110

# RASAGAṄGĀDHARAHṚDAYAM

BY

ŚRĪ JÑĀNACHANDRA TYĀGĪ

R. E. S., M. A. ( Gold Medalist )

Sahityacharya ( Gold Medalist )

Lecturer, Govt. Degree College

Sri Ganganagar, Rajasthan.

THE

CHOWKHAMBA VIDYABHAWAN

VARANASI-1

1964

❀ श्रीः ❀

**वन्दना—**

सकलदुरितदारिणि द्रुतं धृतकमलेशयपाणिशोभने ।
सफलय निखिलं मनोरथं तव चरणौ प्रणमामि शारदे ॥

**समर्पणम्—**

भारतीयस्वातन्त्र्यसङ्ग्रामसैनिकाय
आयौवनं ब्रिटिशकारागृहवासिने
सङ्ग्रामान्तराल एव मज्जननीविरहिताय
मुनिवृत्तये मम पितृचरणाय
**श्रीमंगतरामत्यागिमहोदयाय**
समर्प्यतेऽयं ग्रन्थः सप्रश्रयम् ॥

# किञ्चिन्निवेदनीयम्

शिक्षा-क्षेत्रे पञ्चवर्षैः कार्यनिरतेन मयेदमन्वभावि यद् विश्वविद्यालयानुदाना-योगस्य शोधकार्यप्रोत्साहनोद्योगस्त्वतीवास्ति साधीयान्किन्तु संस्कृतसाहित्यदर्शन-व्याकरणादिषु विहितविपुलश्रमाणां विदुषां नास्त्यसौ शोधो योग्यतानिकषः। देशस्याधिकारिभिश्शिक्षाविद्भिश्च संस्कृताध्ययनाध्यापनयोः समस्या पृथग्रूपेणा-कलनीया। अद्यत्वे यास्ति संस्कृतशिक्षणपद्धतिर्विश्वविद्यालयेषु सातीव निःसारा तथा चोपहसनीया। एम० ए० परीक्षोत्तरणानन्तरं भाषामधिकृत्य नास्ति छात्राणां कापि योग्यता। समस्तः पाठ्यक्रमो हिन्दीमाध्यमेनाङ्ग्लभाषामाध्यमेन वा प्रवर्त्त्यते। एम० ए० परीक्षामुत्तीर्य ये छात्राः पी-एच० डी० इत्याद्युपाध्यर्थं शोधं विदधति ते प्रायशस्तत्तद्विषयानुद्दिश्य हिन्दीभाषयाऽऽङ्ग्लभाषया वा प्रणीतेषु ग्रन्थेषु समयं हिंसन्ति। मूलग्रन्थेभ्यो भावग्रहणक्षमत्वं तेषामल्पीयोऽपि नैव लक्ष्यते। दर्शनेतिहासादिषु प्राप्तस्नातकोत्तरपदवीकैर्यद्विधीयते तदेव तैरपि विधीयमानं दृश्यते। पुराचीनाः संस्कृतविद्वांसः स्वविषयस्य समग्रं ज्ञानं कण्ठस्थं विधाय रक्षन्ति स्म। ते मूलग्रन्थानां फक्किकाः कारिका जटिलशङ्काश्च, करतलबदरमिव साक्षा-त्कृत्य समादधुः। आधुनिकाः संस्कृत पी-एच० डी० इत्युपाधिधारिणस्तु केवलं येन केन प्रकारेण ग्रन्थं संकलयन्ति। तत्र तैः किमस्ति लिखितं तन्निर्दिष्टग्रन्थेषु च के के विषया इति नास्ति तेषां कोऽपि बोधः।

अपरत्र, पौरस्त्यप्रणाल्या प्रवर्त्तितासु कतिपयासु संस्थासु ग्रन्थाः कण्ठस्थी-क्रियन्ते, ग्रन्थानां वस्तुविषयज्ञानं नितरामुपेक्ष्यते। एवं सति संस्कृतविपश्चिद्भिः

काचित्साधुसमन्विता ( Co-ordinated ) संस्कृतशिक्षणपद्धतिर्गवेषयितुमिष्यते । भाषाया अधिकारोऽपि स्यात् , वस्तुविषयस्य सम्यग्बोधोऽपि भवेत् ।

मम मतेन, राष्ट्रस्य हिताय, संस्कृतवाङ्मयस्य च मङ्गलाय प्राचीनानामगणितानां क्लिष्टग्रन्थानां समीक्षापुरःसरं विहितमनुवादादिकं पी-एच० डी० इत्याद्युपाधिभ्योऽतितरां गरीयः । मूलग्रन्थानाञ्च वस्तुविषयावबोधक्षमता तावदेव संभाव्यते यदा संस्कृतभाषायां छात्राणामधिकारः स्यात् । विश्वविद्यालयेषु प्रवर्त्यमानायां संस्कृतशिक्षणपरम्परायां तस्य लेशोऽपि नैव दृष्टिपथातिथीभवति । अतोऽहं पी-एच० डी० इत्याद्युपाधिभ्यः प्राक् पौरस्त्यपरीक्षासु नदीष्णतामवाप्तुं स्वकीयांश्छात्रान् सततं प्रेरयामि ।

प्रस्तुतो ग्रन्थश्छात्राणामुपयोगायास्ति विरचितः । रसगङ्गाधरः साहित्याचार्यपरीक्षायां क्लिष्टतमो ग्रन्थः । छात्राणां साहाय्यायास्य तत्त्वं सरलगिराऽत्र विशदीकृतम् । अहं स्वकीयं श्रमं सफलमूहिष्ये यदि परीक्षार्थिनां कश्चिदप्युपयोगोऽस्य पुस्तकस्य जायेतेति विरमति—

विदुषामाश्रवो<br>**ज्ञानचन्द्रः**

# PREFACE

To pass the high Sanskrit examinations through Hindi medium is a great pity; to pass them through a foreign medium is ridiculous. In free India neither of these anomalies should be allowed to continue. Those who contend that western scholars have contributed a lot to the advancement of Sanskrit learning should not confuse the facts. Prof. Macdonell, Dr. Stcherbatsky etc., possessed primarily oriental type of erudition coupled with critical approach to literature and philosophy.

English was introduced as a medium of learning Sanskrit in the British regime to enrich English language with oriental thought and wealth of ideas which seemed attractive to the British oriental scholars and had paramount significance in the field of linguistics and philosophy. The teachers of Sanskrit in those days were not particular about command and mastery over Sanskrit as a language. What they primarily cared for was the ability of the student, somehow to express the ideas of Sanskrit treatises in English. But the student in that case was a sufferer. After passing his M. A. in Sanskrit a student was neither a master of Sanskrit nor of English, because translation can hardly help students command a langauge in any sense of the term. After independence Hindi and other Indian languages were substituted as medium of instruction for many subjects in several Universities. Sanskrit too is an Indian language. It could have severed very well as a medium for its study like other languages of the world. But that was not done. In no college or university of India except Varanaseya Sanskrit Varsity, Sanskrit is taught through the Sanskrit medium. There is no emphasis on grammar, translation or composition. Students cram the translation of prose and verse either

in Hindi or English like parrots without knowing actually for what word a particular word in translation stands. Even the students of M. A. are required to answer questions either in Hindi or English or some other Indian language as if Sanskrit were not suitable as a medium of expression. It should be unanimously appreciated in the context of emotional integration of India that Indian culture in its accurate sense includes Sanskrit language also as one of its components. Sanskrit language is the only uniting factor of various modern languages of India. If it is introduced as a compulsory subject upto Higher Secondary stage in all of the Indian states, the forces of disintegration will be sucessfully countered. There may be a controversy over the acceptance of Hindi as a national language in some corner, but about linguistic importance of the Sanskrit language and its capacity to reinforce the body and spirit of different Indian languages, there connot be two opinions.

In a majority of colleges of North India, Sanskrit language is being taught now-a-days through Hindi. This has made the situation all the more regrettable. In previous times when English was the medium, an M. A. in Sanskrit could atleast write an application in English correctly. To-day an M. A. of Sanskrit, especially of northern Indian universities is a pitiable creature. In most of the cases he cannot claim to be proficient in Sanskrit language. In addition to that neither he knows Hindi of a high standard, nor can he write an article correctly in English language. What a sadder comment than this can be made on this thoughtless medium of Sanskrit examinations in modern times.

Besides the Universities and colleges there are some oriental institutions in our country. A student coming out of these institutions possesses an admirable command over the Sanskrit language, but to our utter disappointment he has no insight

into the subjects he studies. The teachers working in most of these institutions are so ill-fed that they can hardly spare time for a critical and comparative study of their subjects. Recently when I went to Banaras to take an examination of the Sanskrit varsity, I showed to a learned pandit of Banaras one of my essays on metaphor ( Lakṣaṇa ) which I prepared after a continuous hard work of one month by studying carefully different schools on poetics, as well as the theories of criticism of ancient and modern English literature. The Pandit pitied my unnecessary labour and explained to me sympathetically that I would fail in the examination if I wrote the essay in that critical way. What I should do was that I should learn the original texts on Lakṣaṇā and should vomit them out word by word without exerting my socalled originality which would infuriate the examiner.

Under these gloomy circumstances we shall have to give a patient thought to the current evils of the system of Sanskrit education prevalent in our colleges and universities. The importance of language cannot be underestimated, but simultaneously the cramming also should be pitilessly castigated. A co-ordinated educational system should be evolved. The student should be a master of correct language as well as of the subject-matter he has learnt through that language.

The present book has been written with this co-ordinated educational scheme in view. For the last many years I have been persuading my M. A. students to appear in Acharya examination after passing their M. A. in Sanskrit So long as Sanskrit is not started to be taught through Sanskrit, this is the only possible way to achieve a tolerable command over sanskrit language otherwise they shall have to cut a sorry figure throughout. Most of my students are convinced of my advice and they have come to beleive that without passing Acharya in which they are entitled to appear after M. A. it is flagrantly

ridiculous to get their topics registered for a Ph. D. degree as is rampant now-a-days in most of the Universities. What research in a literature are they going to do without fulfilling the minimum condition of command over language ? In Sahityacharya examination the big three horrible treatises which the students are faced with, are, Kāvyaprakāśa. Dhwanyā-loka and Rasagaṅgādhara. Of these, Kavyaprakāśa is taught in the M. A. classes in almost every university of India. Dwanyāloka, though most important and a key-treatise on Dhwani-conception is considerably easy. Rasagangādhara of Jagannath, is a book which fills the hearts of the students with terror and dread. Apart from being exceptionally terse, it is replete with abstruse expressions, a high level of brilliant polemics and the frightening erudition of its author who was the most dynamic and most progressive intellectual of his time. Perhaps he is the only author in the history of poetics in the whole of the world, who did not resort to the poems of others for illustrating poetical theories however difficult they may be. In Jagannātha we find a rare and ideal combination of an unique intellectual and a vigourous poet. It is only due to his unprecedented calibre that he could contrive such new figures as Asama and also could logically justify their genuineness.

The appearance of his Rasa Gaṅgādhara relegated most of his predecessor's works into back-ground and most of such works seem to be definitely obsolete and backward after one has carefully gone through the plausible contentions and brilliant expositions discernible in this immortal book. Pandita-Rāja Jagannātha was originality incarnate. He was original not only in his intellectual and aesthetical approach but also in his way of Living. He married a muslim damsel; which involved a great risk in the social environment Pandita-Rāja lived in. Scholars like Dr. P. V. Kane doubt the authenticity of this incident but if at some later stage it is proved to be a true event, Pandita-Rāja Jagannātha would be held as the first

intellectual champion of liberalism and interreligious marriage which are the paramount need of our time, if we want to survive as an emotionally integrated nation. Jagannāth resembled most of the big brains of ancient India like 'Śaṁkarācārya, Rāmānuja who hailed from South. He was a Tailanga Brāhmaṇa. His father's name was Peru Bhatta with whom he learnt all the branches of knowledge including philosophy and grammar. His Manoramā-Kuc-Mardan which he wrote as a criticism of Bhattoji Dikṣita's manoramā commentary of Siddhānt Kaumudi is a proof of his outstanding profundity in the comprehension of grammar. His poems of Gangā Laharī and Bhāminī Vilās are already on the tongue of every votary of ancient India aesthetics. He wrote more, than a dozen of books and each of them is the creation of a provarbially high order. Pandita-Rāja flourished in the court of Emperor Shahjahan who conferred on him the title of Pandita-Rāja.

Regarding poetical theories, we find that almost on every problem of Rasa, Kāvya, Dhwani, Alaṁkāra etc. Pandita Rāja has his original views. He praises his predecessors where they deserve praise, but he is the last man to be a blind follower of anybody. He flouts Appaya Dīkṣhita almost on every topic of poetics with an accent of admonition. The greatest scholar of his time and author of scores of books Dīkṣhit is reduced to nothingness under the terrible teeth of Pandita Rāja's crushing criticism. Pandit Rāja does not even forgive Mammata. He screens him out and exposes him where necessary. On two or more occassions he interrogates Ānand Vardhanācārya also and rectifies his literary mistakes with reverence and restraint. He fearlessly reproves such writers as Jayadeva of Gīta Govinda whom he condemns as aesthetical sadists ( Matta Matangajairiva ) for having barefacedly described the physical union of gods. The readers can not help acknowledging the dispassionate justice of his erudite criticism.

Rasa Gaṅgādhara Hṛdayam is being published for the use of students. The students of Acharya final have no book available in the market which may serve as a key to unlock the mysteries of Rasa Gaṅgādhara. One or two books which have been written to provide help to the readers are far from being satisfactory. Most of them have killed the beauty of Panditarāja's presentation of theme. In this book every care has been made to adopt the style of Pandita Rāja and in a few places his actual language has been used in a simplified and summarised form.

In dealing with the controversial topics like Abhidhā, Lakṣaṇā and Dhwani, a comparative study of different views has been made. This would be of help to students for getting through the paper of Essay in which such topics are given every year.

I would deem my humble labour completely rewarded if this book could provide a little help to the students, examinees, and readers in general.

I express my gratitude to Smt. Chandra Vati M. A., Prof. S. B. Yogi of Delhi Varsity, Km. Savita Sharma M. A. Gold Medalist (creation of Prof. Akinchan Sahityacharya ). My Principal Sri M. L. Sahal, my students H. Kaur and S. Sahu, Dr. Shri Nivas M. A. Ph. D. and my learned sister Km. Asha Chhabra M. A., who stood 1st class 1st in 1962 from Punjab varsity smashing all previous records for helping me in preparing this book and above all I am profoundly beholden to my preceptor. Dr. D. N. Shastri M. A. Ph. D. D. Litt. Director, Indics studies Kurukshetra Varsity without whose perpetual blessings nothing could have been achieved and who has been extremely kind to me in providing with guidance during the last 4 months exclusively devoted to assiduous composition of this work.

*Date. 11 June, 63.*

**Jñanachandra Tyagi**

# विषय-सूची


विषय — पृष्ठम्

## प्रथमाननम्

काव्यस्य लक्षणं तदीयं महत्त्वञ्च — १
काव्यलक्षणस्य पर्यवसितस्वरूपाणि — २
मम्मटकृतकाव्यलक्षणस्य खण्डनम् — ४
विश्वनाथकृतकाव्यलक्षणस्य खण्डनम् — ६
काव्यकारणताविवेकः — ७
प्रतिभाया हेतुः — ८
व्यभिचारनिरासः — ९
काव्यानां लक्षणोदाहरणादीनि — १०
दीक्षितस्य खण्डनम् — ११
अधमाधमकाव्यस्यानौचित्यम् — १३
उत्तमोत्तमकाव्यस्योदाहरणम् — १५
व्यङ्ग्यस्य साधारण्यासाधारण्यविवेकः — १६
पण्डितराजकृता निश्शेषेत्यादि-पद्यस्य समीचीना व्याख्या — १८
रससमीक्षा — १९
अभिनवगुप्तमतम् — २०
भट्टनायकानां मतम् — २२
नव्यानां (पण्डितराजसमर्थितानां) मतम् — २४
मनःकल्पितज्ञानवादिनां मतम् — २५
अन्यानि मतानि — २६
स्थायिभावानां परिभाषा संख्या च — २६
स्थायिभावसंचारिभावयोर्भेदः — २६

विषयः — पृष्ठम्

रसस्थायिभावयोर्भेदः — २७
प्राचीनमतानुसारिणी स्थायिभावानां परिभाषा — २७
रसगङ्गाधरप्रतिपादिताष्टमतानुसारेण क्रमशो भरतसूत्रस्य व्याख्या — २७
वीररसस्य भेदानां विषये पण्डितराजस्य मतम् — २८
नाट्ये शान्तरसस्थितिः — २९
भक्तिरसस्य खण्डनम् — ३०
रसदोषाः — ३०
अनौचित्यं किम् ? — ३१
काव्ये गुणानां स्थितिः — ३२
रसाभासः — ३४
भावाभासाः — ३६
भावशान्त्यादीनां भावध्वनित्वम् — ३६
भावध्वनिः — ३९
रसभावादीनां संलक्ष्यक्रमत्वम् — ४०
पदवाक्यरचनादीनां व्यञ्जकत्वम् — ४२

## द्वितीयाननम्

शब्दशक्तिमूलकध्वनिविषये पण्डितराजस्य सिद्धान्तः — ४३
शब्दशक्तिमूलध्वनेर्विषये प्राक्तनानां सिद्धान्तस्योपहासः — ४५
उपमाया निरूपणम् — ४६

| विषयः | पृष्ठम् |
|---|---|
| अन्येषां लक्षणानां खण्डनम् | ५० |
| अप्पयदीक्षितकृतलक्षणस्य खण्डनम् | ५१ |
| उपमेयोपमालङ्कारस्य स्वरूपम् | ५३ |
| अन्येषां मतानां खण्डनानि | ५४ |
| अलङ्कारसर्वस्वकारमतस्यालोचना | ५५ |
| अलङ्काररत्नाकरस्य खण्डनम् | ५६ |
| अनन्वयालङ्कारः | ५७ |
| असमालङ्कारः | ५९ |
| अलङ्काररत्नाकरस्यालोचना | ५९ |
| अनन्वयालङ्कारस्य क्षेत्रेऽसमस्याप्रवेशः | ६० |
| परिणामालङ्कारस्य स्वरूपम् | ६१ |
| रूपकस्य निरूपणम् | ६४ |
| दीक्षितखण्डनम् | ६५ |
| मम्मटमतखण्डनम् | ६७ |
| परम्परितरूपकम् | ६८ |
| उदाहरणालङ्कारः | ७० |
| ससन्देहालङ्कारः | ७१ |
| उल्लेखः | ७२ |
| स्मरणालङ्कारः | ७३ |
| भ्रान्त्यलङ्कारविवेचनम् | ७४ |
| परेषां लक्षणानां खण्डनम् | ७६ |
| भ्रान्त्यलङ्कारे साधारणधर्मस्थितिः | ७७ |
| अपह्नुतिविवेकः | ७७ |
| पर्यस्तापह्नुतिविषये पण्डितराजस्य मतम् | ७९ |

| विषयः | पृष्ठम् |
|---|---|
| उत्प्रेक्षास्वरूपम् | ८० |
| मुख्या उत्प्रेक्षाः | ८२ |
| शाब्दबोधः | ८४ |
| परिणामे बोधाकारः | ८६ |
| अभिधायाः स्वरूपम् | ८७ |
| संकेतस्य प्रकाराः | ९० |
| भर्तृहरिकृतौ भेदौ | ९० |
| शक्तिग्रहस्य साधनानि | ९१ |
| सङ्केतस्य विषये पाश्चात्यानां विचारः | ९१ |
| अभिधाया विषये पण्डितराजस्य विचाराः | ९१ |
| वृत्तिवार्त्तिककारस्य खण्डनम् | ९२ |
| भेदानां विषये विदुषां विचाराः | ९२ |
| वैयाकरणानां मतम् | ९३ |
| लक्षणायास्तुलनात्मकाध्ययनपुरःसरं स्वरूपविवेचनम् | ९३ |
| लक्षणासिद्धान्तस्य प्रतिवादाः | ९८ |
| लाक्षणिकताया विषये पाश्चात्यविपश्चितां विचाराः | ९९ |
| लक्षणाया ध्वन्याश्रयता | १०० |
| रूपकोपमयोर्भेदः | १०१ |
| ध्वनेः स्वरूपम् | १०४ |
| विभिन्नध्वनीनामुदाहरणानि | १०९ |
| श्लोकानुक्रमणिका | ११७ |
| शुद्धि-पत्रम् | ११९ |

॥ श्रीः ॥

# रसगङ्गाधरहृदयम्

## काव्यस्य लक्षणं तदीयं महत्त्वञ्च ।

मननतरितीर्णविद्याऽर्णवो जगन्नाथपण्डितनरेन्द्रः ।
रसगङ्गाधरनाम्नीं करोति कुतुकेन काव्यमीमांसाम् ॥

( इमां रसगङ्गाधरनाम्नीं काव्यस्य = काव्याङ्गानाम् अलङ्कारादीनाञ्च मीमांसा = विचार उद्देशलक्षणपरीक्षा यत्र तादृशीं रचनां कुतुकेन = कुतूहलेन, न तु क्लेशेन करोति ) इत्यादिना काव्यनिरूपणं प्रतिज्ञातं ग्रन्थकृता । तत्र काव्यलक्षणसूत्रमवतारयन् पण्डितराजः प्राह—

'तत्र, कीर्त्तिपरमाह्लादगुरुराजदेवताप्रसादाद्यनेकप्रयोजनकस्य काव्यस्य व्युत्पत्तेः कविसहृदययोरावश्यकतया गुणालङ्कारादिभिर्निरूपणीये तस्मिन्, विशेष्यतावच्छेदकं ( काव्यनिष्ठायाः, 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति शाब्दबोधीयविशेष्यतायाः, अवच्छेदकम्—अन्यूनातिप्रसक्तो धर्मः ) तदितरभेदबुद्धौ साधनं ( काव्यं काव्येतरेभ्यो भिन्नं रमणीयार्थप्रतिपादकशब्दत्वाद् इति भेदानुमितौ साधनं—हेतुभूतं ) च तल्लक्षणं तावन्निरूप्यते ।

अस्यायमभिप्रायः संक्षेपतः—

मम्मटादिभिः प्राक्तनाचार्यैः—'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥' इत्यादिकारिकाभिर्यस्य बहूनि प्रयोजनानि निर्दिष्टानि तस्य काव्यस्य जीवने महन्मूल्यमस्ति । तस्य सुष्ठ्वर्थे कवौ सहृदये च तस्य व्युत्पत्तिः ( नैपुण्यलक्षणतद्विषयकविशेषज्ञानम् ) इष्यते । अतः सर्वप्रथमं काव्यलक्षणं निरूप्यते । ननु गुणालङ्कारादिभिरुद्देशलक्षणपरीक्षाभिस्तस्य विवेचनीयत्वाद् गुणालङ्कारादिविवेचनमादौ युज्यत इति चेन । विशेष्यस्य

ज्ञानं विशेषणस्य ज्ञानात्पूर्वं कर्त्तुं युज्यते। पुनश्च तत्तत्पदार्थेषु मिथो भेदसिद्धिरपि समपेक्षिता भवति। अतः काव्येऽपि तदितरभेदसिद्धिरावश्यकीति सर्वप्रथमं काव्यत्वं निर्वक्ति—'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति। रमणीयाः—लोकोत्तराह्लादजनकभावनाविषयाः, ये=वाच्यलक्ष्यव्यङ्ग्यरूपाः, तत्प्रतिपादकः=तद्विषयकबोधजनकः, शब्दः=सुप्तिङन्तरूपः काव्यम्। 'रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता'।

अस्मिन् लक्षणे 'शब्द' पदं कटाक्षादिवारणाय, 'प्रतिपादक'पदं व्यङ्ग्यादिसंग्रहाय, 'अर्थ'पदं रमणीयशब्दप्रतिपादके व्याकरणादावतिव्याप्तिनिरासाय, 'रमणीय' पदं 'घटमानय' इत्यादिवाक्यव्यावृत्तये प्रयुक्तमिति बोध्यम्। ननु किन्नामाह्लादे लोकोत्तरत्वमिति चेद् बहुष्वाह्लादेषु 'लोकोत्तरः' 'लोकोत्तरः' इत्यनुमाप्रतीतिसिद्धचमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेष एवेति। यथाह विश्वनाथः—'सचेतसामनुभवः प्रमाणं तत्र केवलम्' इति। नन्वीदृशं लोकोत्तरञ्चमत्कारं को जनयतीति, चेत् 'कारणं च तदवच्छिन्ने, भावनाविशेषः पुनः पुनरनुसंधानात्मा।' चमत्कारत्वरूपलोकोत्तरत्वजात्यवच्छिन्ने तस्मिन्नलौकिकाह्लादे पुनः पुनरनुसंधानात्मा (काव्यार्थस्य भूयोभूयः समानविषयकः स्मृतिविशेषः अनुसन्धानं तद् आत्मा स्वरूपं यस्य तादृशः) भावनाविशेष एव कारणम्। काव्यार्थस्य निरन्तरस्मरणेनैव लोकोत्तराह्लादो जायते न त्वन्यादृशार्थज्ञानमात्रेणेत्याशयः।

इह न्यायनयोक्तभावनाख्यसंस्कारस्य व्यवच्छेदाय पुनरित्याद्युपात्तम्। किन्तु केचित्तार्किकस्वीकृतभावनायाः स्मृतिविशेषरूपत्वेन ज्ञानजन्यत्वात् पुन-पुनरनुसंधानादात्मा यस्येति व्यधिकरणबहुव्रीहिरिहेत्यपि वदन्ति। 'पुत्रस्ते जातः' इत्यादि वाक्यार्थधीजन्याह्लादस्य न लोकोत्तरत्वमिति न तस्मिन् वाक्ये काव्यत्वप्रसक्तिः।

## काव्यलक्षणस्य पर्यवसितस्वरूपाणि

पण्डितराजो नव्यन्यायप्रयुक्तविषयप्रतिपादनपद्धत्या काव्यलक्षणपरिष्कारं कुर्वन् लक्षणत्रयमुद्गिरति। तत्र सर्वप्रथमं—

(१) 'चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वं काव्यत्वमि'ति। अर्थात्, चमत्कारस्य=लोकोत्तराह्लादस्य जनिका या भावना=काव्यार्थविषय-

पुनः पुनरनुसंधानं तस्या विषयो योऽर्थः तस्य प्रतिपादकत्वे सति शब्दत्वं = काव्यत्वम् ।

व्याख्या—रसगङ्गाधरस्यादौ "रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता" इत्युक्तमासीद् । तत्र काव्यलक्षणसंदर्भे, एषा समस्योदेति यत्समूहालम्बनात्मके ( ज्ञातव्यसमुदासीनयोरेकत्रोत्पन्ने ) ज्ञाने समुदासीनं वस्त्वपि काव्यतामापत्स्यते । यथा 'शून्यं वासगृहम्' इत्यादिकाव्येषु, विषयान्तरोद्बोधकसामग्रीसमुपस्थित्या घटरूपोऽर्थोऽपि भासिष्यते । इत्थं काव्यार्थविषयकज्ञानान्तर्गतत्वाद् घटरूपोऽर्थोऽपि लोकोत्तराह्लादजनकज्ञानविषयतामापत्स्यते, फलतश्च 'घटः' इत्याकारके शब्देऽपि काव्यत्वमतिव्याप्स्यति । अत एवात्र ज्ञानपदं लक्षणान्निष्कास्य भावनापदमुपात्तम् । तथा कृते 'घट' इत्याकारके शब्दे काव्यत्वं नातिव्याप्स्यति यतः काव्यार्थविषयकज्ञाने घटरूपोऽर्थो भासितुं क्षमते न तु काव्यार्थविषयकज्ञानधारायाम् भावनायाः स्मृतिविशेषरूपत्वात् ।

किन्त्वत्राप्येका समस्यावशिष्यते । यत्र कस्यचित् स्मृतिविशेषरूपा धारावाहिनी भावना जनिष्यते तत्र चमत्कारजनकभावनाविषयीभूते वाक्यकदम्बके काव्यत्वमतिव्याप्स्यति । तन्निवारणाय द्वितीयः परिष्कारो विहितः—

( २ ) यत्प्रतिपादितार्थविषयकभावनात्वं चमत्कारजनकतावच्छेदकं तत्त्वम् ।

अर्थः—येन = यादृशानुपूर्वीमता शब्देन प्रतिपादिते = बोधितेऽर्थे विद्यमाना या विषयता तन्निरूपिता या भावनानिष्ठा विषयिता तदवच्छेदकं भावनात्वं = चमत्कारत्वनिष्ठकार्यतानिरूपितभावनानिष्ठकारणाताया विषयतासंबंधेनावच्छेदकं, तत्त्वम् = तादृशानुपूर्वीमत्त्वं = काव्यत्वम् । एतदनुसारेण, स एव शब्दो यद्वा त एव शब्दाः काव्यव्यपदेशभाजो भविष्यन्ति येषामानुपूर्वीद्वारा प्रतिपादितार्थविषयका भावना, सामग्र्येण चमत्कारजनिका संपत्स्यते । आनुपूर्वी = तद्वर्णोत्तरतद्वर्णत्वरूपः श्रावणप्रत्यक्षविषयतावच्छेदको धर्मः ।

किन्त्विदं द्वितीयं लक्षणमपि यत्तत्पदघटिततया गौरवदोषदुष्टम् । पुनश्चात्र यत्तच्छब्दयोरर्थोऽप्यव्यवस्थितोऽस्ति । तेन, तृतीयः परिष्कारः कृतः ।

( ३ ) स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासंसर्गेण चमत्कारत्ववत्त्वमेव वा काव्यत्वम् ।

स्वशब्देनात्र चमत्कारत्वस्य ग्रहणम् । स्वविशिष्टा—चमत्कारत्वावच्छिन्नकार्यतानिरूपिता या ( भावनानिष्ठा ) जनकता तदवच्छेदको योऽर्थः तत्प्रतिपादक-

तासंसर्गः=तत्प्रतिपादकत्वसंबंधः, तेन संबंधेन चमत्कारत्वविशिष्टे सति शब्दत्व-मेव याथार्थ्येन काव्यत्वमिति पर्यवसितम् ।

टिप्पणी—इदमन्तिमं लक्षणं नास्ति गौरवदोषाङ्कितं, न चेदमनिश्रिताऽर्थकम् । अत्र हि संसर्गविधया भासमानानां तदर्थानामुपस्थितेः शाब्दबोधेऽनपेक्षणाल्लाघवम् । एतदनुसारेण स एव शब्दो यद्वा त एव शब्दाः काव्यत्वेनाभिधास्यन्ते येषां चमत्कारत्वेन सह चमत्कारत्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतारूपः संबंधो भविष्यति । इत्थं यद्यपि, चमत्कारजनकता, भावनायां निवत्स्यति तथापि सा विषयतासंबंधेनार्थगतापि मन्स्यते । अनया विधया 'रमणीयार्थप्रतिपादकः शब्द एव काव्यमि'ति पर्यवसिष्यति । इति ।

## मम्मटकृतकाव्यलक्षणस्य खण्डनम्

'अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्' इति काव्यप्रकाशकारलक्षणं न समीचीनं, शब्दार्थयुगलस्य काव्यशब्दवाच्यत्वे मानाभावात् । 'काव्यमुच्चैः पठ्यते' 'काव्यं श्रुतम्, अर्थो न ज्ञातः' इत्यादि विश्वजनीनव्यवहारतः शब्दविशेषस्यैव काव्यपदार्थत्वसिद्धेः कविकर्मतायाः शब्द एव संभवाच्च ।

ननु यथा, 'पूर्वे पञ्चालाः' इत्यादौ समस्तपञ्चालदेशवाचकानां पञ्चालादिशब्दानां तदेकदेशे लक्षणया प्रयोगः तथैव 'काव्यं श्रुतम्' इत्यादिव्यवहारेषु शब्दार्थोभयवाचकस्य काव्यशब्दस्य तदेकदेशे शब्दमात्रे लक्षणा स्वीकरणीयेति चेन्न, काव्यपदनिष्ठायाः शब्दार्थोभयनिरूपिताभिधाया ग्राहकस्य कस्यचिदपि प्रमाणस्याप्राप्तेः । मम्मटप्रोक्तस्य विमतवाक्यस्य त्वश्रद्धेयत्वात्, ननु काव्यत्वप्रयोजकस्य आस्वादोद्बोधकत्वस्य शब्देऽर्थे चाविशिष्टत्वात्, द्वयोरेव काव्यत्वमुचितमिति चेन्न । रागस्य नृत्यवाद्यादीनां नाट्याङ्गानां च रसव्यञ्जकतया काव्यत्वापत्तेः ।

पुनश्च काव्यपदप्रवृत्तिनिमित्तं व्यासज्यवृत्ति ( शब्दार्थौ व्याप्य तिष्ठत्, समुदायपर्याप्तं ) नास्ति । यदि स्यात्तदा श्लोकवाक्यं काव्यं न स्वीकरिष्यते यतो वाक्यं काव्यस्यावयवमात्रमेवास्ति । अवयवश्च समस्तवस्तु न भवति यथा द्वयोर्विद्यमानं प्रत्येकमेकं द्विनं भवति । न चेदं, प्रत्येकपर्याप्तं ( प्रत्येकम्=एकस्मिन्नेकस्मिन् शब्दे चार्थे च पर्याप्तिसंबन्धेन विद्यमानं ) वर्त्तते । तथा सति शब्दे

पृथक् काव्यम्, अर्थे चापरं काव्यमिति 'एकस्मिन्नेव काव्ये काव्यद्वयम्' इति व्यवहारस्यापत्तिः स्यात्। इत्थं तर्कानुसारेण काव्यलक्षणस्य वेदशास्त्रपुराणलक्षणस्येव (वेदादर्थोऽवगम्यते, वेदः श्रुतः इत्यादिवत्) शब्दनिष्ठतैवोचिता।

काव्यलक्षणे गुणालङ्कारादिनिवेशोऽपि मम्मटाभिमतो न युक्तः। 'उदितं मण्डलं विधोः' 'गतोऽस्तमर्कः' इत्यादौ दूत्यभिसारिकाविरहिण्यादिसमुदीरितेऽभिसरणविधितन्निषेधजीवनधारणासंभववत्त्वादिव्यञ्जके काव्ये, गुणालङ्कारादीनामननुगमनेन, लक्षणस्याननुगतत्वात्।

दोषाभावोऽपि लक्षणे न निवेशयोग्यः। दुष्टं काव्यमिति, व्यवहारस्यासङ्गतेः। न च संयोगाभाववान् वृक्षः संयोगीतिवद् 'अंशभेदेन तदेव वाक्यं दोषरहितं (काव्यं) दुष्टम् (अकाव्यम्) वक्ष्यते' इति वाच्यम्। 'मूले महीरुहो विहंगमसंयोगी न शाखायाम्' इति प्रतीतिवत्, 'इदं श्लोकवाक्यं पद्यं वा, पूर्वार्द्धे काव्यम्, उत्तरार्द्धे न काव्यम्' इति स्वरसवाही विश्वजनीनानुभवो नैव भवति। यदि तादृशोऽनुभवोऽभविष्यत् तदा काव्यस्यापि, अव्याप्यवृत्तित्वमभविष्यत्। किन्तु तन्नास्ति। अव्याप्यवृत्ति वस्तु तावदेकस्मिन्नाधारे, अंशभेदात् कुत्रचित् प्राप्यते, अन्यत्र न प्राप्यते। काव्यं तु तिलेषु तैलमिव सर्वं श्लोकवाक्यं व्याप्य तिष्ठति। एवं पूर्वोक्तमुदाहरणं न साधु। दुष्टं काव्यमिति व्यवहारश्च स्वीकरणीय एव लोकस्य। तथा सति, काव्यलक्षणे दोषाभावनिवेशस्य न कापि मूलावश्यकता वर्त्तते।

एवमेव लक्षणे गुणानामलङ्काराणाञ्च निवेशोऽपि नितान्तमनिवार्यो नास्ति, यथा मम्मटाचार्येण विहितः। तथाहि— यथा लोकस्य शौर्यादयो गुणा आत्मनिष्ठाः, हारादयश्चालङ्काराः शरीरनिष्ठा न तु स्वयं शरीरीभूताः, तथैव काव्यस्य माधुर्यादयो गुणा रसनिष्ठाः, अनुप्रासोपमादयश्चालङ्काराः शब्दार्थनिष्ठाः, न तु काव्यरूपा एव। इत्थं, काव्यस्य सगुणत्वादिविशेषणमनुपपद्यते।

टिप्पणी— गोकुलनाथोपाध्यायनागेशभट्ट— गङ्गाधरशास्त्रिप्रभृतिभिर्विद्वद्भिः शब्दकाव्यत्ववादं खण्डयित्वा शब्दार्थयुगले काव्यत्वं स्थिरीकृतम्। तेषामाशयोऽधस्ताद्दीयते—

मम्मटेन, अनुपहसनीयकाव्यस्यैव लक्षणं कृतम्। तच्चोपयुक्तम्, यतः काव्यं नाम वक्तुः हार्दभावप्रतिबिम्बरूपम्। हृद्गता एव भावा रमणीयतया काव्येषूप-

निबध्यन्ते। प्रत्यक्षदृष्टा अपि भावा न तथा वैचित्र्यं जनयन्ति यथा ते सुकविवाग्विषयतां गताः। उक्तञ्च 'कविशक्त्यार्पिता भावास्तन्मयीभावयुक्तितः। यथा स्फुरन्त्यमी काव्यान्न तथाऽध्यक्षतः किल॥' इति। अतः काव्ये विभावादिस्थितिरावश्यकी। एवञ्च, हार्दभावानां विभावादीनां वर्णनमेव काव्यम्।

तदुक्तम् 'अनुभावविभावानां वर्णना काव्यमुच्यते' अतः कवयते 'वर्णयति' इति व्युत्पत्तिलब्धस्य वर्णनात्मकस्य कविकर्मणः, सङ्गतिः शब्दार्थयोः काव्यत्व एव। अनुकूलशब्दस्तु तदुपायभूतः केवलम्।

(१) कविप्रौढोक्तितन्निबद्धप्रौढोक्तिभ्यां कल्पितत्वस्यापि, अर्थ एव शक्यतास्ति।

(२) काव्यं बुद्धमिति व्यवहारश्चार्थस्यैव काव्यत्वसाधकः।

(३) काव्यमुच्चैः पठ्यते' इत्यादि व्यवहारः शब्दमात्रे, लक्षणया, अर्थस्यापि शब्दद्वारा प्रतीतिविषयत्वेन वा सूपपादः।

इत्थं शब्दार्थयुगलस्य काव्यत्वं सुस्थम्।

(१) जगन्नाथकल्पितं व्यासज्यवृत्तित्वं काव्यप्रसङ्गे निरर्थकम्। काव्यस्य योजनारूपत्वात्।

(२) एकस्मिन् पद्ये काव्यद्वयव्यवहारापत्तिरपि न। विजातीयैकचमत्कृतिजनकत्वेन, एकस्यैव व्यवहारात्। सहकारित्वं चोभयत्राप्युभयोः।

(३) वेदादिलक्षणमपि शब्दार्थोभयनिष्ठमेव। अतएव 'तदधीते तद्वेद' इति सूत्रस्थो भगवान् पतञ्जलिः सङ्गच्छते।

(४) दोषाभावगुणालङ्कारादीनां काव्योत्कर्षप्रयोजकतायाः सर्वसम्मतत्वेन, अनुपहसनीयकाव्यलक्षणे तन्निवेशो न दोषावह इति।

## विश्वनाथकृतकाव्यलक्षणस्य खण्डनम्

'वाक्यं रसात्मकं काव्यम्' इति विश्वनाथकृतं काव्यलक्षणं न समीचीनम्—वस्त्वलङ्कारप्रधानानां काव्यानाम् (पथिक, नात्र स्रस्तरमस्ति, मनाक् प्रस्तरस्थले ग्रामे इत्यादीनां) अकाव्यत्वापातात्। इष्टापत्तिस्तु (एतानि काव्यानि न सन्तीतिरूपा) न कर्त्तुं शक्यते तथा सति, महाकवीनां चिरकालादागता परम्परैव

मूलोच्छेदं यास्यति ( महाकविसंप्रदाय एव व्याकुलीभविष्यति )। तथाहि कविभिर्जलप्रवाहवेगनिपतनोत्पतनभ्रमणानि, कपिबालादिविलसितानि—चोपवर्णितानि, यत्राचेतनतया चित्तवृत्तिविशेषात्मको रसो न संभवति। एवं विश्वनाथाभिमतं लक्षणं तत्र न व्याप्नोति। न च तत्रापि कथञ्चित् परम्परया, रसस्पर्शः अस्त्येवेति वाच्यम्। अर्थमात्रस्य ( जगतः पदार्थमात्रस्य ) विभावानुभावव्यभिचारिभावेष्वन्यतमत्वाद्, ईदृशरसस्पर्शस्य 'गौश्चलति, मृगो धावति' इत्यादावपि सत्त्वेन निष्फलत्वात् ( अप्रयोजकत्वात् )।

टिप्पणी—पण्डितराजस्योपर्युक्तं मतं गङ्गाधरशास्त्रिप्रभृतिभिः पर्यालोचितम्। यतो हि—'सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत्।
झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते॥'

इत्यादि नियमेन जलप्रवाहवर्णनादौ, महावाक्यार्थधीद्वारा वा रसोद्बोधकत्वस्य सत्त्वात्, काव्यत्वस्य न क्षतिरस्ति।

## काव्यकारणताविवेकः

(१) प्रतिभास्वरूपा शक्तिः (२) लोकशास्त्रज्ञानजन्या व्युत्पत्तिलक्षणा निपुणता (३) काव्यज्ञशिक्षाद्वारेण काव्यकरणाभ्यास इत्येतत्त्रितयमेव दण्डचक्रादिन्यायेन काव्यसृष्टिं प्रति कारणत्वेनाङ्गीकुरुते वाग्देवतावतारो मम्मटः। किन्तु पण्डितराजस्यात्र मौलिको मतभेदः। तस्य मतानुसारेण—'काव्यस्य कारणं केवला कविगता प्रतिभा। सा च काव्यसृष्ट्यनुकूलशब्दार्थोपस्थितिस्वरूपो।

तद्गतं ( प्रतिभागतं ) च प्रतिभात्वं काव्यकारणताऽवच्छेदकतया सिद्धो जातिविशेष उपाधिरूपं वा खण्डम्।

टिप्पणी—यतो ह्ययं ग्रन्थः स्वसामयिकग्रन्थनिर्माणानुकूलनव्यन्यायशैल्यास्ति कृतरचनस्तेन प्रसङ्गवशादत्र काव्यसिद्धान्तनिकषाणामुपयोगो विधीयते ग्रन्थकारेण। मम्मटेन शक्तिशब्दस्य प्रयोगो व्यधायि। तत्र पण्डितराजेन प्रतिभाशब्द उपात्तः। प्रतिभायां को धर्म इत्यस्य वैशद्यार्थं रेखाङ्कितं स्थलमस्ति सन्निवेशितमन्यथा प्रकृते नास्ति तस्य कोऽपि प्रसङ्गः। प्रतिभायां प्रतिभात्वमस्ति धर्मो यस्य सिद्ध्यर्थमिदमनुमानं विधीयताम्—

स्वविषयकज्ञानविषयकसमवायित्वसंबन्धावच्छिन्नकाव्यत्वावच्छिन्नकार्यतानिरूपिता समवायसंबंधावच्छिन्ना प्रतिभानिष्ठा कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद्, घटनिष्ठकार्यतानिरूपितदण्डनिष्ठकारणतावत्' इत्यनुमानात् सिद्धः, 'नित्यत्वे सत्यनेकसमवेतत्वम्' इति जातिलक्षणाच्च समन्वितो जातिविशेषः। तत्रोपाधित्वस्य त्यागे जातित्वस्य चाङ्गीकारे तर्कविशेषानुपलब्धेर्नीलघटत्ववत् सखण्डोपाधिरूपं वा प्रतिभात्वम्। अर्थात् प्रतिभायां प्रतिभात्वजातेः प्रतिभात्वोपाधेर्वाऽस्तित्वं स्वीकरणीयमिति।

## प्रतिभाया जनकानि

'प्रतिभाया हेतुः क्वचित्तावद्देवतामहापुरुषप्रसादादिजन्यमदृष्टं क्वचिच्च विलक्षणव्युत्पत्तिकाव्यकरणाभ्यासौ, न तु त्रयमेव। बालादेस्तौ विनापि केवलान्महापुरुषप्रसादादपि प्रतिभोत्पत्तेः।'

अयम्भावः—प्रतिभां प्रति व्युत्पत्त्यभ्यासयोरदृष्टस्य च तृणारणिमणिन्यायेनैव कारणता स्वीकरणीया। अन्यथा कर्णपूरप्रभृतीनां कवीन्द्राणां बाल्य एव व्युत्पत्त्यभ्यासविरहेऽपि प्रतिभोत्पत्तेर्दर्शनाद् व्यभिचारः (बाधः) स्यात्।

न च तत्र (कर्णपूरप्रभृतीनां स्थले) पूर्वजन्मकालिकयोर्व्युत्पत्त्यभ्यासयोः कल्पनं वाच्यम्, गौरवान्मानाभावात्, कार्यस्यान्यथापि (जन्मान्तरीयव्युत्पत्त्यभ्यासकल्पनां विनापि) उपपत्तेश्च। नेयं कारणता वेदेन प्रतिपादिता येन व्यभिचारदशायां जन्मान्तरीयतादिकं कल्प्येत। पण्डितराजस्य शब्देषु—

"लोके हि बलवता प्रमाणेनागमादिना सति कारणतानिर्णये पश्चादुपस्थितस्य व्यभिचारस्य वारणाय जन्मान्तरीयमन्यथानुपपत्त्या कारणं धर्माधर्मादि कल्प्यते। अन्यथा (तादृशप्रमाणविरहे) तु व्यभिचारोपस्थित्या पूर्ववृत्तकारणतानिर्णये भ्रमत्वप्रतिपत्तिरेव जायते।" इति।

न चादृष्टमात्रस्यैव कारणता पर्याप्तेति वाच्यम्। किञ्चित्कालं यावत्काव्यकरणाक्षमस्यापि जनस्य व्युत्पत्त्यभ्यासजन्यप्रतिभावशात्काव्यसृष्टिसामर्थ्यदर्शनात्। यद्यदृष्टमात्रमेव कारणमभविष्यत्तदा प्रागपि व्युत्पत्त्यभ्यासाभ्यां प्रतिभाऽजनिष्यत। न च तत्र प्रतिभायाः प्रतिबन्धकमदृष्टान्तरं कल्प्यमिति वाच्यम्। तद्विधानेकजनगतस्यादृष्टद्वयस्य कल्पनापेक्षया क्लृप्तव्युत्पत्त्यभ्यासयोरेव प्रतिभाकारणत्वेन स्वीकरणे लाघवम्।

## व्यभिचारनिरासः

(१) नन्वेवम्, अदृष्टमात्रोत्पन्नप्रतिभास्थले व्युत्पत्त्यभ्यासरूपप्रतिभाकारणविरहेऽपि प्रतिभारूपकार्योत्पत्तेर्व्यतिरेकव्यभिचारः (कारणाभावेऽपि कार्योत्पत्तिरूपः) स्यादित्यत आह—

"तादृशादृष्टस्य तादृशव्युत्पत्त्यभ्यासयोश्च प्रतिभागतं वैलक्षण्यं कार्यतावच्छेदकम्। अतो न व्यभिचारः।"

अदृष्टाव्यवहितोत्तरजायमानप्रतिभात्वावच्छिन्नं प्रत्यदृष्टं कारणं, व्युत्पत्त्यभ्यासाव्यवहितोत्तरजायमानप्रतिभात्वावच्छिन्नं (प्रतिभामित्यर्थः) प्रति च व्युत्पत्त्यभ्यासौ कारणम्। एवं, कार्यतावच्छेदककोटौ, अव्यवहितोत्तरत्वस्य निवेशे सति अदृष्टोत्पन्नप्रतिभायाः कारणं, व्युत्पत्त्यभ्यासौ न संपत्स्येते। इत्थं व्युत्पत्त्यभ्यासरूप कारणस्याभावेऽपि प्रतिभारूपकार्योत्पत्तौ नैव व्यभिचार इत्यभिसन्धिः।

(२) नन्वेमपि द्वयोर्भिन्नयोः प्रतिभयोर्द्वे काव्ये प्रति कारणत्वे मिथो व्यभिचार आपतेदित्याचष्टे—

"प्रतिभात्वञ्च कवितायाः कारणतावच्छेदकम्, प्रतिभागतवैलक्षण्यं वा विलक्षणकाव्यं प्रतीति नात्रापि सः।"

अर्थादस्य व्यभिचारस्य निरासः प्रकारद्वयेन कर्त्तुं शक्यते। (१) यथा काव्यरूपं कार्यमेकमस्ति तथैव प्रतिभारूपं कारणमपि। सा प्रतिभा कुत आयातेति प्रश्न एव न करणीयः। इत्थं काव्यं प्रति प्रतिभा कारणमिति सामान्याकारेणैव कार्यकारणभावो जनिष्यते। (२) तथा सत्यपि यदि व्यभिचार आपद्यते तर्हि पूर्वोक्तं वैलक्षण्यमादाय विलक्षणकाव्यं प्रति विलक्षणप्रतिभा कारणमिति विशेषाकारेण कार्य-कारणभावमवलम्ब्य व्यभिचारो वारणीयः।

न च सतोरपि व्युत्पत्त्यभ्यासयोर्यत्र न प्रतिभोत्पादस्तत्रान्वयव्यभिचार इति वाच्यं, तत्र तयोः तादृशवैलक्षण्ये मानाभावेन कारणतावच्छेदकानवच्छिन्नत्वात्। अर्थाद् यथा प्रतिभानिष्ठं वैलक्षण्यं कार्यतावच्छेदकं तथैव व्युत्पत्त्यभ्यासनिष्ठमपि। तच्च वैलक्षण्यं यदि स्यात्तयोस्तदैव प्रतिभा जायते नान्यथा।

अथवा पापविशेषस्तत्र प्रतिबन्धकत्वेन कल्पनीयः। प्रतिबन्धकस्याभावः सर्वत्र कारणत्वेन स्वीक्रियत एव। यथोक्तं न्यायसिद्धान्तमुक्तावल्यां—

"स्वातन्त्र्येण मण्यभावादेरेव वा हेतुत्वं कल्प्यते।" इति।

प्रतिबन्धकाभावस्य कारणता तु शक्त्यादित्रयहेतुतावादिनः शक्तिमात्रहेतुतावादिनश्च तुल्या। प्रतिवादिना मन्त्रादिभिः कृते कतिपयदिवसव्यापिनि वाक्स्तम्भे, कृतानेककाव्यस्यापि कवेः काव्यानुदयस्य दर्शनात्।

टिप्पणी—पण्डितराजस्य काव्यकारणतासिद्धान्तस्यालोचका आहुः—

'काव्ये प्रतिभामात्रस्य कारणत्वं नास्ति विचारसहम्। अनुपहसनीयकाव्यत्वावच्छिन्नकार्यतानिरूपितकारणताया दण्डचक्रादिन्यायेन प्रत्येकं प्रतिभाप्रभृतिषु त्रिष्वपि स्वीकारस्यापरिहार्यत्वात्'। इति।

## काव्यानां लक्षणोदाहरणादीनि

(क) "शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यङ्क्तस्तदाद्यम्।" यत्र काव्ये शब्दो=वाचकः, अर्थो=वाच्यश्च (वाच्यपदमिह लक्ष्यव्यङ्ग्ययोरपि संग्राहकम्। अन्यथा तयोरुपसर्जनीभावेन व्यञ्जकतायामव्याप्तिः) गुणीभावितात्मानौ=व्यङ्ग्यार्थापेक्षयाऽप्रधानीकृतस्वरूपौ, कमपि=चमत्कारातिशयाधानेनानिर्वचनीयं प्रधानमर्थम्, अभिव्यङ्क्तः=व्यञ्जनया बोधयतः तत् काव्यम् आद्यम्=उत्तमोत्तमं भवति। एतदेवान्यैर्ध्वनिकाव्यमित्यभिहितम्। तथा चोक्तम्—ध्वनिकारेण—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥

(ख) यत्र व्यङ्ग्यम् अप्रधानमेव सत् चमत्कारकारणं तद् द्वितीयम् (उत्तमं) काव्यम्। यथा—'राघवविरहज्वालासन्तापितसह्यशैलशिखरेषु। शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय॥ (वैदेहीकुशलसूचनविहितरामविरहसंतापनोदनात्मा व्यङ्ग्यार्थ एव पुरः परिस्फुरन्नङ्गतां भजन्नपि चमत्कारकारणम्, यथा दौर्भाग्येण दासीभावमापन्नापि राजमहिषी, काञ्चन विलक्षणां नैसर्गिकीं कमनीयतामावहति। इत्थं व्यङ्ग्यस्य गुणीभावेऽपि चमत्कारितोत्कर्षेण द्वितीयकाव्योदाहरणत्वमेतस्य। अस्य भेदस्य गुणीभूतव्यङ्ग्यत्वं नाशङ्कनीयम्। तत्रत्यं व्यङ्ग्यं चमत्कारकं न तिष्ठति, अत्रत्यं पुनर्व्यङ्ग्यमतिचमत्कारकमिति तयोरुभयोर्भेदः। अस्मिन् काव्यलक्षणे वाच्यापेक्षया प्रधानीभूते, व्यङ्ग्यान्तरापेक्षया च गुणीभूते व्यङ्ग्ये ऽतिव्याप्तिवारणाय, अवधारणं (एवशब्दस्य निवेशः) कृतम्। तथा कृते 'अयं स रसनोत्कर्षी' (यत्र व्यङ्ग्यः शृङ्गाररसो व्यङ्ग्यान्तरकरुणरसापेक्षयाऽ

प्रधानीभूतोऽपि वाच्यापेक्षया प्रधानत्वेन तिष्ठति ) इत्यादीनि काव्यानि नास्य भेदस्य लक्ष्याणि संपत्स्यन्ते, प्रत्युत प्रधानीभूतकरुणरसमादायोत्तमोत्तमकाव्यस्यैव लक्ष्याणीति बोध्यम् । एवमेव लक्षणे 'चमत्कारकारणम्' इति शब्दो लीनव्यङ्ग्यस्य ( गुणीभूतव्यङ्ग्येषु परिगणितस्य तृतीयभेदस्य, अस्फुटव्यङ्ग्यस्य, उपलक्षणाच्चान्येषामपि ) वाच्यचित्रस्य चातिप्रसङ्गवारणाय प्रयुक्तः ।

यत्तु 'अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्यं तु मध्यमम्' इत्यादिकाव्यप्रकाशगतलक्षणे चित्रान्यत्वं टीकाकारैर्दत्तं तन्न । पर्यायोक्तसमासोक्त्यादिकाव्येष्वव्याप्त्यापत्तेः । तेषां गुणीभूतव्यङ्ग्यतायाश्चित्रकाव्यतायाश्च सर्वालङ्कारिकसम्मतत्वात् ।

नन्वेवं 'तल्पगतापि सुतनुः' इत्यादिप्रथमकाव्योदाहरणे, आक्षेपगतं मान्द्यमपि नववधूप्रकृतिविरोधादनुपपद्यमानं रति—व्यङ्ग्येनैवोपपाद्यतेऽतः कथमुत्तमोत्तमता ? इति चेन्न । यतो ह्यनुदिनसख्युपदेशादिभिरनुपपद्यमानं मान्द्यं प्रथमचित्तचुम्बिनीं विप्रलम्भरतिं प्रकाशयन् परनिर्वृतिगोचरतामाधातुं स्वातन्त्र्येण न प्रभवति । भावोऽयम्—"राघवज्वाला"दिपद्ये व्यङ्ग्यातिरिक्तत्वेन किमप्यर्थान्तरं वाच्यस्योपपादकं नैव भवितुमर्हति । अत्र तु नैषा स्थितिः । अतः भिन्नस्वरूपोऽयं श्लोको ध्वनेरुदाहरणमेवेति सम्यगवधारणीयम् ।

### दीक्षितस्य खण्डनम्—

यत्तु चित्रमीमांसाकृतोक्तम्—

प्रहरविरतौ मध्ये वाऽह्नस्ततोऽपि परेण वा  
किमुत सकले याते वाह्नि प्रिय ! त्वमिहैष्यसि ।  
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो  
हरति गमनं बालाऽऽलापैः सबाष्पगलज्जलैः ॥

अत्र 'सकलमहः परमाऽवधिः । ततः परं प्राणान् धारयितुं न शक्नोमि' इति व्यङ्ग्यं प्रियगमननिवारणरूपवाच्यसिद्धेरङ्गम्, अतो गुणीभूतव्यङ्ग्यमिति । तन्न । सबाष्पगलज्जलानां ( सबाष्पगलज्जलमिश्रितानामित्यर्थः ) प्रहरविरतावित्यादीनामालापानामेव ( वाच्यानां ) प्रियगमननिवारणरूपवाच्यसिद्धेरङ्गतया व्यङ्ग्यस्य गुणीभावमापाद्यं वाच्योपस्कारकताया न काप्यावश्यकता । तस्माद् वाच्यस्य वाच्येनैवोपपत्तौ व्यङ्ग्यस्य तदुपपादकतासंभवेऽपि न गुणीभाव इति भावः । आलापैरिति तृतीयया प्रकृत्यर्थस्य ( प्रधानकरणार्थस्य, आलापपदवाच्यस्य )

हरणाक्रियाकरणतायाः स्फुटं प्रतिपत्तेः। वाच्यस्य वाच्येनैवोपपत्तौ यदि व्यङ्ग्यस्यापि वाच्यसिद्ध्यङ्गता स्वीकरिष्यते तर्हि 'निःशेषच्युत' इत्यादौ दूतीसंभोगरूपं व्यङ्ग्यम्, अधमत्वरूपवाच्यसिद्ध्यङ्गतया गुणीभावमाप्स्यति, श्लोकश्चायं स्वयं दीक्षितेन ध्वनिलक्ष्यत्वेन निरणायि।

अस्तु वा 'ततः परं प्राणान् धारयितुं न शक्नोमि' इत्यस्य व्यङ्ग्यस्य वाच्यसिद्ध्यङ्गतया गुणीभावस्तथापि नायकादेर्विभावस्य बाष्पादेरनुभावस्य, चिन्तावेगादेश्च संचारिणः संयोगादभिव्यज्यमानेन विप्रलम्भेन ध्वनित्वं को निवारयेत्।

टिप्पणी—नागेशभट्टमते—'न हि सर्वमपार्यन्तिकेनैव व्यङ्ग्येन ध्वनिगुणीभूतव्यङ्ग्यत्वव्यपदेशः किन्त्वान्तरालिकेनापि सः। इतरथा 'ग्रामतरुणं तरुण्या' इत्यादौ पार्यन्तिकव्यङ्ग्ये शृङ्गाररसाभासे जाग्रति, आन्तरालिकं वस्तुरूपव्यङ्ग्यमादाय विहितो गुणीभूतसिद्धान्तोऽपि नितरां व्याकुप्येत। तस्मादयं पण्डितराजस्य प्रौढिवाद एवेति।

(ग) यत्र व्यङ्ग्यचमत्कारासमानाधिकरणो वाच्यचमत्कारस्तत्तृतीयम्।

यत्र काव्ये वाच्यचमत्कारो लेशतः प्रादुर्भवन्नपि वाच्यप्रतीतिजन्यचमत्कारस्य सर्वतोमुखीनस्यान्तर्निगीर्णः सन् स्पष्टतयाऽनुभवगोचरतां नाचामति तत्तृतीयम् = मध्यमम् काव्यम्। यथा यमुनावर्णने—तनयमैनाकगवेषणलम्बीकृतजलधिजठरप्रविष्टहिमगिरिभुजायमानाया भगवत्या भागीरथ्याः सखी।

[ तनयः = हिमगिरिसुतः, स चासौ मैनाकः—तन्नामा शैलः, तस्य इन्द्रभिया समुद्रनिलीनस्य, गवेषणाय अन्वेषणाय लम्बीकृता आयतीकृता, जलधेः समुद्रस्य जठरे उदरे प्रविश्य हिमगिरेर्हिमाचलस्य भुजायमाना भुजा बाहुरिवाचरतीति तस्याः भगवत्या भागीरथ्याः सखी = सहचरी। अत्र क्यङ्प्रत्ययमाश्रित्य वाच्या उत्प्रेक्षैव चमत्कृतिहेतुः।

हिमालयभुजोत्प्रेक्षया व्यङ्ग्यस्य गङ्गाश्वैत्यस्यं, तनयमैनाकगवेषणलम्बीकृतजलधिजठरप्रविष्टत्वेन च पातालतलचुम्बित्वादीनां चमत्कारो लेशतया सन्नपि उत्प्रेक्षाचमत्कृतिजठरनिलीनो, नागरिकेतरनायिकाकल्पिता काश्मीरद्रवाङ्गरागनिगीर्णो निजाङ्गगौरिमेव प्रतीयते न तु स्पष्टतयाऽनुभवगोचरतां प्रयाति।

अनयोरेव पूर्वोक्तयोर्द्वितीयतृतीयभेदयोर्जागरूकाजागरूकगुणीभूतव्यङ्ग्ययोः प्रविष्टं निखिलमलङ्कारप्रधानं काव्यम्। समासोक्तिप्रभृतिषु व्यङ्ग्यस्य गुणीभावेपि चमत्कारितया समासोक्तिप्रभृतिप्रधानकाव्यस्य द्वितीयभेदेऽन्तर्भावः। दीपकादिष्वलङ्कारेषु, उपमादिरूपव्यङ्ग्यस्य तु तदभावात् दीपकादिप्रधानकाव्यस्य तृतीयभेदेऽन्तर्भावः।

(घ) यत्रार्थचमत्कृत्युपस्कृता—शब्दचमत्कृतिप्रधानं तदधमं चतुर्थम्। यत्र हि वाच्यार्थप्रतीतिजन्यचमत्कारेण पोषितस्य, शब्दप्रतीतिजन्यचमत्कारस्य प्राधान्यं न तु वर्तमानस्यापि, अयोग्यतयाऽविवक्षितस्य व्यङ्ग्यस्य प्राधान्यं यतो हि सिद्धान्तानुसारेण न तादृशोस्ति "कोऽपि वाच्यार्थो यो मनागनामृष्टप्रतीयमानः = अस्पृष्टव्यङ्ग्यः = व्यङ्ग्यसम्बन्धशून्य एव, स्वतो रमणीयतामाधातुं प्रभवति तदधमं नाम चतुर्थं काव्यम्। यथा—

मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे।
गोत्रारिगोत्रजत्राय गोत्रात्रे ते नमो नमः॥

विष्णुपक्षे—मित्रः—सूर्यः, अत्रिपुत्रः—चन्द्रश्च नेत्रे यस्य तस्मै, त्रय्याः—ऋग्यजुःसामवेदानां शात्रवस्य—रिपोर्हयग्रीवदैत्यस्य शत्रवे नाशकाय गोत्राणां—पर्वतानाम् अरेः—पक्षच्छेदकस्य शत्रोरिन्द्रस्य गोत्रजान् वंश्यान् देवान्, त्रायते रक्षतीति तथाभूताय, गोः (षष्ठी) पृथिव्याः गवां धेनूनां वा त्रात्रे रक्षकाय, ते-विष्णवे नमो नमोऽस्तु। शिवपक्षे त्रय्या ध्वंसनाच्छात्रवभूतानामसुराणां, यद्वा त्रयीनिहितविज्ञानप्रतिबन्धनाच्छात्रवस्य कामदेवस्य शत्रवे—नाशकाय, गोत्रात्रे वृषस्य रक्षकाय ते शिवायेति विशेषः।

इह (वाच्यार्थचमत्कारोपस्कृतो) वृत्त्यनुप्रासात्मकः शब्दालङ्कारप्रयोज्यश्चमत्कार एव कविसंरम्भगोचरतया प्रधानम्। भगवद्विषयकवक्तृनिष्ठरतिभावादिव्यङ्ग्यजन्मा कथञ्चिद् वर्तमानोऽपि चमत्कारः शब्दचमत्कृतेरङ्गतामेव भजति।

अधमाधमम्!

(ङ) यद्यपि यत्र, अर्थचमत्कृतिसामान्यशून्या शब्दचमत्कृतिः तत् पञ्चमम्—अधमाधममपि गणयितुमुचितम्। यथा—एकाक्षरपद्यम्, अर्द्धावृत्तियमकम्, पद्मबन्धखड्गबन्धादयश्च (न नोननुन्नो नुन्नोनो नाना नानानना ननु।

नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत् ॥ प्रभृतयः श्लोकाः ) तथापि रमणीयार्थप्रतिपादकशब्दतारूप-काव्यलक्षणेनानाक्रान्ततया वस्तुतः काव्यत्वाभावेन महाकविभिः ( भारविमाघादिभिः ) प्राचीनपरम्परामनुरुन्धानैस्तत्र तत्र काव्येषु ( किरातशिशुपालवधादिषु ) निबद्धमपि न पण्डितराजेन गणितम्, वस्तुस्थितेरेवानुरोध्यत्वात् ।

गङ्गाधरशास्त्रिमतेन—दुष्करशब्दसन्निवेशनिर्वाहणीयविशिष्टवाक्यार्थधीजनकस्य एकाक्षरादिचित्रस्य, सर्वथा, अर्थरहितसन्निवेशमात्रे, चमत्कृत्यनिर्वाहकतया कृत्याकृत्यप्रवृत्तिनिवृत्त्यौदासीन्यवशाद् यत्र कथञ्चिच्चमत्कारविशेषजनकत्वेऽपि काव्यत्वं नाङ्गीक्रियते । चन्द्रिकाटीकाकारमतेन—कृत्याकृत्यप्रवृत्तिनिवृत्त्यौदासीन्यं तु 'भम धम्मिअ'—'भ्रम धार्मिक इत्यादावपि तुल्यमेव । एवं सति, प्राचीनकविपरम्परानुमतं निकृष्टकाव्यत्वम् , एकाक्षरादिचित्रेषु निर्बाधमेव । यतो हि 'आर्थिक एव चमत्कारः काव्यत्वप्रयोजको न तु शाब्दिक' इति पण्डितराजस्यैव मतं न त्वन्येषाम् ( मम्मटविश्वनाथादीनाम् )

ननु त्रिविधमेवोत्तममध्यमाधमभावेन काव्यमिति चेन्न । अर्थचित्रशब्दचित्रयोः' ( प्राक्तनप्रोक्तयोः ) अविशेषेऽधमत्वं वक्तुमयुक्तम् तयोः तारतम्यस्य = न्यूनाधिकभावस्य स्फुटमुपलब्धेः । को ह्येवं सहृदयः सन् , 'विनिर्गतं मानदमात्ममन्दिरात्' 'सच्छिन्नमूलः क्षतजेन रेणुः' इत्यादिकाव्यैः ( मम्मटदीक्षितोपन्यस्तैरर्थचित्रोदाहरणतया ) 'स्वच्छन्दोच्छलद' इत्यादीनां ( मम्मटादिभिः शब्दचित्रत्वेनोक्तानां ) पामरश्लाघ्यानामविशेषं ( अभिन्नतां ब्रूयात् । सत्यपि तारतम्ये यद्येकभेदत्वं तर्हि कुतो ध्वनिगुणीभूतव्यङ्ग्ययोरीषदन्तरयोः (प्राच्यप्रतिपादितयोः) विभिन्नभेदत्वे दुराग्रहः ।

यत्र च शब्दचमत्कारस्य, अर्थचमत्कारस्य च वा समानाधिकरणत्वं तत्र पर्यालोच्य व्यवहर्तव्यम् । शब्दचमत्कृतिप्राधान्ये चतुर्थम् , अर्थचमत्कृतिप्राधान्ये ( व्यङ्ग्यस्य अजागरूकत्वे ) तृतीयम् भविष्यति । यदि द्वयोरपि प्राधान्यं सममस्ति तर्हि तृतीयकाव्यमेव ( मध्यममेव ) । यतस्तत्र व्यङ्ग्यम् , अजागरूकम्, भविष्यत्येव (अथवा शास्त्रीयभाषायां तत्र वाच्यचमत्कारे व्यङ्ग्यचमत्कारासमानाधिकरणः—व्यङ्ग्यापेक्षयाऽधिकचमत्कारयुक्तो वा—भविष्यत्येव ) शब्दचमत्कृतिश्च तत्रोपलब्धापि, अविरोधिनी भविष्यति ।

यथा—मयूरभट्टरचिते सूर्यशतके 'उल्लासः फुल्लपङ्केरुह' इत्यादिश्लोकः, हेतुरूपकानुप्रासौजःप्रसादानुप्राणितः शब्दार्थचमत्कारश्रीः समप्राधान्यं वहति। अतो मध्यमम् ( तृतीयं ) काव्यं मंस्यते।

( १ ) अत्र पूर्वोक्तवर्णस्यावृत्तेः वृत्त्यनुप्रासः ( अनेकस्यैकधा ) साम्यम्, असकृद्वाप्यनेकधा। एकस्य सकृदप्येष वृत्त्यनुप्रास इष्यते—इति दर्पणोक्तः ) शब्दं भूषयति ( २ ) आवृत्तवर्णसंपूर्णं वृत्त्यनुप्रासवद्वचः। ओजः स्यादिति' प्राचीनलक्षित ओजोऽभिधानः शब्दगुणः शब्दं भूषयति। ( ३ ) 'यस्मादन्यः स्थितः सर्वः स्पष्टमर्थोऽवभासते। सलिलस्येव सूक्तस्य स प्रसाद इति स्मृतः।' इति प्राचीनलक्षितप्रसादनामाऽर्थगुणोऽर्थं भूषयति।

( ४ ) सूर्यरूपे तेजःसंघाते पुष्पन्धयोल्लासत्व-कोकसीमन्तिनीशोकनिस्तारत्व-तामसोत्पातत्व-चक्षुःपातत्वलक्षणधर्मचतुष्टयारोपान्मालारूपकं वाक्यार्थं प्रसाधयति। ( ५ ) उल्लासादीनां कारणभूतस्य तेजःपुञ्जस्य स्वकार्यभूतैरुल्लासादिभिरभेदेनाभिधानाद्धेतुनामालङ्कारो वा वाच्यार्थमलङ्करोति। इति।

## उत्तमोत्तमकाव्यस्योदाहरणानि

वाच्यार्थापेक्षया व्यङ्ग्यार्थप्राधान्यस्योदाहरणं यथा—

'शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान्।
दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते॥' इति।

अत्रालम्बनस्य नायकस्य सविधशयनाक्षिप्तस्य च विभावस्य, तादृशनिरीक्षणादेरनुभावस्य त्रपौत्सुक्यादेश्च व्यभिचारिणः संयोगाद् रतिरभिव्यज्यते। न च 'यद्ययं शयितः स्यात्, तदाऽस्याननं चुम्बेयम्' इति नायकेच्छाया एव व्यङ्ग्यत्वमत्रेति वाच्यम्, मनोरथपदेन तस्या वाच्यत्वेन, व्यङ्ग्यत्वायोगात्। न च मनोरथत्वाकारेण तस्या वाच्यत्वेऽपि चुम्बनविषयकेच्छात्वेन कुतो न व्यङ्ग्यतेति वाच्यं, वाच्यवृत्त्यनालिङ्गितस्य व्यङ्ग्यस्यैव चमत्कारित्वात्।

यथोक्तं ध्वनिकारेण—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥

तथा च—

नान्ध्रीपयोधर इवातितरां प्रकाशो नो गुर्जरीस्तन इवातितरां निगूढः।

अर्थो गिरामपिहितः पिहितश्च शश्वत् सौभाग्यमेति मरहट्टवधूकुचाभः ॥

एवं त्रपाया अपि नास्त्यत्र प्राधान्येन व्यङ्ग्यत्वं, 'दरमीलन्नयने'त्यादिना उद्देश्यतावच्छेदकतयैव प्रत्याय्यते त्रपा। ननु दरमीलन्नयनात्वविशिष्टनिरीक्षणस्य विधेयतास्वीकारे, नास्त्युद्देश्यतावच्छेदकत्वं त्रपाया अपितु विधेयतावच्छेदकत्वमेव अतो कथं नास्ति त्रपाया व्यङ्ग्यत्वमिति चेत्। न। नयनगतदरमीलनस्य त्रपाकार्यत्वेऽपि दरमीलन्नयनात्वविशिष्टनिरीक्षणस्य रतिमात्रकार्यत्वात्। यदि त्रपाया मुख्यव्यङ्ग्यत्वमभिप्रेतमभविष्यत्तदा निरीक्षणोक्तेर्न काप्यावश्यकताऽभविष्यत्। वाच्यकोटौ यथा त्रपाया अनुभावो दरमीलनं रतेरनुभावं निरीक्षणं प्रति गुणीभूतं तथैव व्यङ्ग्यत्वकोटौ रतिं प्रति त्रपाया अपि गुणीभावोऽङ्गीकार्यः। इति।

यथा च—

गुरुमध्यगता मया नताङ्गी निहता नीरजकोरकेण मन्दम्।
दरकुण्डलताण्डवं नतभ्रूलतिकं मामवलोक्य घूर्णितासीत् ॥

दरम् - ईषत् कुण्डलस्य ताण्डनं नटनं यत्र तद् यथा स्यात्तथा, किञ्च नता= आस्थानखलीकरणजन्यमन्युना नम्रीभूता भ्रूलतिका यत्र तद् यथा स्यात्तथा, अर्थाच्चकितं साभ्यसूयञ्च मां दृष्ट्वा ('धृष्ट किमेवं गुरुजनमध्ये खलीकरोषीति मनसैवोपलभमाना') घूर्णितासीत् = भ्रान्तासीत्।

इह 'दुर्विदग्ध, किमिदं रहसि करणीयं गुरुजननिकटेऽपि कृतवानसि' इति वस्तुव्यञ्जनपुरःसरं नायकविषयोऽमर्षो (अङ्गितो व्यभिचारी भावः) व्यज्यते।

'शयिता सविधे' इत्यादौ वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य प्राधान्यम्, गुरुमध्येत्यादौ वस्तुरूपव्यङ्ग्यार्थापेक्षयापीति द्वितीयोदाहरणस्य वैलक्षण्यम्।

## व्यङ्ग्यस्य साधारण्यासाधारण्यविवेकः

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति, बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥

इत्यत्रामरुशतकोपलब्धे पद्येऽभिधामूलध्वनिमङ्गीकुर्वन् दीक्षितः प्रतिपादयति यन्नायकस्याधमत्वं द्विधा संभवति (i) जन्मना (ii) कर्मणा वेति। तत्रोत्तम-

नायिका नायकस्य जन्मनोऽधमत्वं न वक्ति। न च वैदग्ध्यभङ्गभयात् स्वापराधपर्य-वसायिदूतीसंभोगादिभ्योऽतिरिक्तेन कर्मणा (दूतीप्रेषणात्पूर्वं विहितेनातितमां प्राचीनेन) तस्याधमत्वं प्रकाशयति यतो हि तद्वचनमाकर्ण्य तामेव प्रतिवेशिनः श्रोतारोऽपराधिनीं शङ्किष्यन्ते। एवञ्च दूतीसंभोगं स्फुटं नोक्त्वाऽधमपदेन व्यनक्ति। पद्योपलब्धा अपरविशेषणवाक्यार्था अपि दूतीसंभोगरूपव्यङ्ग्यार्थस्य साहाय्यं कुर्वन्ति। तद्यथा—(१) चन्दनच्युतिर्न केवलं रतकालिकस्तनतटमर्दनेन संभवति किंतूत्तरीयाकर्षणेनापि। एषा चन्दनच्युतिरुत्तरीयाकर्षणं नानुमापयेदपि तु संभोगमेवेति निःशेषपदं पद्ये प्रदत्तं, यतो ह्युत्तरीयाकर्षणेन समग्रा चन्दनच्युतिर्न भवति। (२) स्नानसाधारण्यवारणाय तटपदं प्रदत्तम्, यतः स्नानदशायां चन्दनस्य च्युतिर्न केवलं स्तनतटादेव भवति किन्तु समस्तादपि स्तनाभोगात्। (३) ताम्बूलग्रहणविलम्बात् संभाव्यमानस्य प्राचीनरागमृष्टत्वस्य निरासाय, अधर-रागस्य निःशेषमृष्टतावचनम्। (४) तथा च स्नानसाधारण्यव्यावर्त्तनेन संभोग-चिह्नोद्घाटनाय 'अधर' इति विशिष्य गृहीतं यतो ह्युत्तरोष्ठे सरागे सति, अधरोष्ठस्य निर्मृष्टरागता चुम्बनकृतैव अधरोष्ठस्यैव वात्स्यायनादिना कामशास्त्रेषु चुम्बनोप-युक्तताप्रतिपादनत्वात्।

एवञ्च संभोग एव संभवन्तस्ते विशेषणवाक्यार्थाः प्रधानव्यङ्ग्याविष्करणे सहायका भवन्तीति।

पण्डितराजस्तु नेमां व्याख्यां मर्षयति। तस्यात्रायं विरोधो यद्—यदि सा नायिका विदग्धोत्तमास्ति तदा कथं स्वमुखेनैव सखीजनसमक्षे नायकस्य दूती-संभोगं स्फुटं कथयेद् वैदग्ध्यभङ्गापत्तेः। अर्थाद्, दूतीसंभोगस्य स्फुटाभिधानं वैदग्ध्यभङ्गभयहेतुकमिति विचिन्त्य काचिदपि विदग्धोत्तमा नायिका तन्न करिष्यति। अतो नायकाधमत्वस्य कल्पनाद्वयमपि निष्फलम्। पुनश्च द्वितीयोऽयं तर्को यद् विशेषणवाक्यार्था यदि संभोगमेवोद्घाटयन्ति तदनुमानेनैव व्यङ्ग्याव-बोधः स्यात्। काऽवश्यकता व्यञ्जनायाः?

वस्तुतो वाक्यार्थानां साधारण्यमनुमितेः चेत्रं साधारण्यञ्च व्यञ्जनायाः। यथा 'भ्रम धार्मिक विश्वस्तः स शुनकोऽद्य मारितस्तेन। गोदानदीकच्छनिकुञ्जवासिना दृप्तसिंहेन॥' इत्यत्र 'गोदावरीतीरनिकुञ्जं श्वभीरुभ्रमणायोग्यं सिंहवत्त्वात्' इत्यनु-मानमेवात्र भ्रमणनिषेधलक्षणं वस्तुव्यङ्ग्यं गोचरयितुमलं कृतं व्यञ्जनयेति

व्यक्तिविवेककृता महिमभट्टेनोक्तम्। तस्य खण्डनं ध्वनिकार-काव्यप्रकाशकाराभ्या व्यञ्जकानां साधारण्यमाधारीकृत्यैव कृतम्। यथा मम्मटमतेन, 'शुनः स्पर्शदोषाद्-भीरुरपि कश्चिद् वीरस्वभावतया, गुरुनिदेश-प्रभुनिदेश-प्रियानुराग-निधिलाभसंभा-वनादिपारवश्येन सिंहाधिष्ठाने स्थाने यातुं प्रभवति। एवं हेतुरयं व्यभिचारदो-षग्रस्तः। पुनश्च सिंहस्य सद्भावो धार्मिकस्य प्रत्यक्षसिद्धस्तु नास्ति। यदि वक्त्री पुँश्चली भवेत्तदाऽसौ तस्या वचनं न विश्वसिष्यति। एवमत्रासिद्धत्व-दोषोऽपि। भ्रमणनिषेधरूपव्यङ्ग्यं द्विधा दुष्टेयमनुमितिर्नास्ति गोचरयितुं क्षमा। व्यञ्जनापक्षे तु हेतोर्दुष्टत्वेऽपि व्यङ्ग्यार्थावगमो निर्बाध एव, तत्र व्याप्त्यादेरनुमि-तिसामग्र्या अनपेक्षणाद्। तथाहि 'त्रासकारणीभूतस्य शुनो विनाशवचनेन धार्मि-कस्य भ्रमणविधानं वाच्यम्। शुनोऽपि भीरोस्तस्य गोदावरीतीरनिकुञ्जे सिंहसद्भा-वप्रतिपादनेन भ्रमणनिषेधो व्यङ्ग्यः।'

एवमेव ध्वन्यालोकस्य प्रथमोद्द्योते 'भ्रम धार्मिक' इत्यादिपद्ये व्यभिचारदोष-दूषितादपि सिंहसद्भावरूपाद्धेतोर्भ्रमणनिषेधरूपस्य व्यङ्ग्यस्यावगमं स्वीचकार ध्वनिकारः। इत्थं व्यञ्जकानां साधारण्यं प्रतिपादयतां प्रामाणिकानामाचार्याणां ग्रन्थैः सह, असाधारण्यं प्रतिपादयतो दीक्षितग्रन्थस्य स्फुटो विरोधः।

किञ्च यदिदं 'निश्शेषे'त्यादि वाक्यार्थानां वापीस्नानव्यावृत्तिद्वारेण, व्यङ्ग्य-स्यासाधारण्यं निगद्यते तत्किमर्थमिति प्रश्नः? व्यङ्ग्यस्य व्यञ्जनार्थमिति चेन्न। व्यञ्जकगतमसाधारण्यं नास्ति व्यञ्जनस्योपायः। प्राक्तनैराचार्यैः 'औन्निद्र्यं दौर्बल्यं चिन्तालसत्वं सनिश्वसितम्। मम मन्दभागिन्याः कृते सखि, त्वामपि परिभवति॥' इत्यत्र औन्निद्र्यादीनां रोगादपि संभवः प्रियतमवियोगादपि च। इत्थं रोगवियो-गोभयसाधारणत्वेपि ज्ञातरहस्याया नायिकाया वाणीरौक्ष्यादिकवैशिष्ट्याद्, दृष्टदुष्ट-चेष्टायाः सख्याश्च भयाकुलत्वादिवैशिष्ट्यान्नायिकापतिकर्तृकतत्सख्युपभोगो व्यज्यते। अर्थाद् व्यङ्ग्यस्य सम्यगवबोधने वक्तृबोद्धव्यप्रकरणादीनां महत्त्वमस्ति न तु व्यङ्ग्यासाधारण्यस्येति प्रतिपादितमस्ति। असाधारण्यस्यानुमित्यनुकूलता, व्यक्तिप्रतिकूलता च सर्वैः स्वीक्रियेते।

### पण्डितराजकृता निश्शेषेत्यादिपद्यस्य समीचीना व्याख्या—

पण्डितराजजगन्नाथेन निश्शेषेत्यादिपद्यस्य व्यङ्ग्यार्थानुकूला, तस्य च प्रथम-

श्रेणीकत्वसाधिका मार्मिकी व्याख्या कृता । तथाहि—'अयि, बान्धवजनस्याज्ञातपीडागमे, स्वार्थपरायणे दूति, स्नानकालातिक्रमभयवशान्नदीमदीयप्रिययोरन्तिकमगत्वैव वापीं स्नातुमितो मदन्तिकाद् गतासि न तु तस्य परवेदनानभिज्ञतया दुःखदातृत्वेनाधमस्यान्तिकम्, यतः स्तनयोस्तटमेव निःशेषच्युतचन्दनं दृश्यते न तु वक्षःस्थलं, वापीस्थितानेकतरुणजनत्रपया स्कन्धद्वयासक्ताग्रस्वस्तिकीकृतभुजलतायुगलेन तटस्यैवोन्नततया मुहुर्मुहुरामर्शनात् । एवं त्वरया सम्यगक्षालनेन, उत्तरोष्ठो नास्ति निर्मृष्टरागः, तदपेक्षयाऽधरोष्ठस्तु, गण्डूषजलरदनशोधकाङ्गुल्यादीनामधिकं सम्मर्दमावहतीति तथा । किं च सम्यगक्षालनेन नेत्रे, उपरि भाग एवाञ्जनरहिते । शीतवशात् तानवाच्च तव तनुः पुलकिता' ।

इत्येवं तस्या विदग्धाया गूढतात्पर्योक्तिरेवोचिता । अन्यथा वैदग्ध्यभङ्गप्रसङ्गात् ।

वाच्यार्थबोधानन्तरं वक्तृबोद्धव्यादीनां वैशिष्ट्यस्य प्रतीतौ, अधमपदेन वाच्यदशायां साधारणधर्मात्मा (अपराधान्तरनिष्ठः) दुःखदातृत्वरूपो धर्मो व्यञ्जनया; दूतीसंभोगनिमित्तकदुःखदातृत्वाकारेण पर्यवस्यति । इत्यालङ्कारिकसिद्धान्तनिष्कर्षः ।

अपि च दीक्षितरीत्या त्रिशेषवाक्यार्थानामसाधारणतया वापीस्नाने बाधात् 'गता न गता' इति विपरीतलक्षणयैव तदन्तिकगमनस्य बोधः । किञ्च दूतीसंभोगरूपस्य व्यङ्ग्यस्य, अधमत्वरूपवाच्यार्थोपपादकतया गुणीभूतत्वप्रसङ्गः । किन्तु स्वयं दीक्षितोऽमुं पद्यं प्रथमश्रेणीकत्वेन गृह्णाति । इत्थं महान् विरोधः स्यात् । वाक्यार्थानां साधारण्यदशायां तु न स्यान्मुख्यार्थबाधो न च व्यङ्ग्यस्य वाच्योपस्कारकतेति लक्षणागुणीभूतव्यङ्ग्ययोर्न कोऽपि प्रसङ्गः । पद्यं चेदमुत्तमोत्तमकाव्यलक्ष्यत्वेनैव निपुणं साध्येत । इति ।

## रस-समीक्षा

रसनिरूपणप्रसङ्गे पण्डितराजेन प्रतिपादितान्येकादश मतानि येषु 'नव्यास्तु' इत्यादिना स्थलेन निर्दिष्टं मतं स्वयं पण्डितराजस्यैवेति मन्यन्ते रसगङ्गाधरधुरन्धराः । तत्र सर्वप्रथममभिनवगुप्तस्य मतमुल्लिख्यते ।

"समुचितललितसन्निवेशचारुणा काव्येन समर्पितैः, सहृदयहृदयं प्रविष्टैस्तदीयसहृदयतासहकृतेन भावनाविशेषमहिम्ना विगलितदुष्यन्तरमणीत्वादिभिरलौकिकविभावानुभावव्यभिचारिशब्दव्यपदेश्यैः शकुन्तलादिभिरालम्बनकारणैश्चन्द्रिकादिभिरुद्दीपनकारणैरश्रुपातादिभिः कार्यैः, चिन्तादिभिः सहकारिभिश्च संभूय प्रादुर्भावितेनालौकिकव्यापारेण तत्कालनिवर्त्तितानन्दांशावरणेनात एव प्रमुष्टपरिमितप्रमातृत्वादिनिजधर्मेण प्रमात्रा स्वप्रकाशतया वास्तवेन निजस्वरूपानन्देन सह गोचरीक्रियमाणः प्राग्विनिविष्टवासनारूपो रत्यादिरेव रसः। तथा चाहुः—

"व्यक्तः स तैर्विभावाद्यैः स्थायिभावो रसः स्मृतः।" इति।

अस्य स्थलस्यायम्भावः—

(१) यदा सामाजिकाः काव्यान्याकर्णयन्ति तत्तद्रसानुकूलललितरचनासंवलितानि नाटकानि वा पश्यन्ति तदा तत्र वर्णिताः कारणकार्यसहकारिणः (लोके तत्तन्नायकगतानां स्थायिभावानां यान्यालम्बनतयोद्दीपनतया वा कारणत्वेन प्रसिद्धानि तानि नायकचन्द्रिकादीनि, यानि चाश्रुपातादीनि, कार्यतया प्रसिद्धानि, यानि च व्यभिचरन्ति = स्थायिभावेन सह चरन्ति तानि चिन्तादीनि ज्ञानद्वारेण सहृदयहृदयं प्रविशन्ति। तत्र तेषां व्यक्तिविशेषसंबद्धा दुष्यन्तत्वादिका धर्माः, सामाजिकनिष्ठसहृदयतामहिम्नाऽपोह्यन्ते। ततस्ते विभावानुभावव्यभिचारिशब्दैर्व्यपदिश्यन्ते। एते विभावादय एव मिलित्वाऽलौकिकं व्यञ्जनाव्यापारं जनयन्ति। एष व्यञ्जनाव्यापारः सामाजिकस्यात्मानन्दाच्छादकमज्ञानं निवर्त्तयति। अज्ञाने दूरीभूते सति सामाजिकस्य परिमितप्रमातृत्वादिका निजधर्मा अपि विलयं यान्ति। तद्दशायां सामाजिकात्मानन्देन सहानुभूयमानः, पूर्वकालादेव संस्काररूपेण स्थितो रत्यादिः स्थायिभाव एव रसः। यथाहि शरावादिना पिहितो दीपः शरावादिनिवृत्तौ सत्यां सन्निहितान् पदार्थान् प्रकाशयति स्वयञ्च प्रकाशते, एवमात्मचैतन्यं विभावादिसंवलितान् रत्यादीन् स्थायिभावानज्ञाने निवृत्ते सति प्रकाशयति स्वयञ्च प्रकाशते।

(२) यद्वा आवरणभङ्गस्य कल्पनां विनैव रससिद्धिः संभाव्यते। तथाहि व्यञ्जनासहकृतेन सहृदयतयोन्मिषितेन विभावादिचर्वणामहिम्ना तत्तत्स्थाय्युपहितस्वस्वरूपानन्दाकारा चित्तवृत्तिरुपजायते, सा चित्तवृत्तिरेव रसः। अस्याश्चित्तवृत्तेः सविकल्पकसमाधिस्थितयोगिचित्तवृत्तिसमकक्षत्वम्। निरवच्छिन्नविषयकत्वेनचास्या अलौकिकत्वम्।

रसचर्वणाजनितोऽयमानन्दो न लौकिकसुखान्तरसाधारणो घटपटाद्यन्तःकरणवृत्तिभिन्नत्वात्। यथा वेदान्तिनां मते, आत्मातिरिक्तं न किमपि सत्। प्रतीयमाना घटपटादिबाह्यपदार्था वृत्तिरूपाः। तानन्तःकरणसंयोगेनात्मा प्रकाशयति। किन्त्वन्तःकरणधर्मान् साक्षादात्मैव भासयति, तत्रान्तःकरणस्य संयोगो नापेक्ष्यते। एवं रसप्रसङ्गेऽपि प्रथमं व्यञ्जनाबलेनात्मनोऽज्ञानमपोह्यते ततश्चात्मचैतन्यं विभावादिसंवलितान् रत्यादीनन्तःकरणधर्मान् भासयति। अतस्ते साक्षिभास्याः = आत्मना प्रकाश्याः कथ्यन्ते। एवमेव विभावानामपि साक्षिभास्यत्वमविरुद्धम्। यथा केवलकाल्पनिकत्वात् स्वप्ने तुरगादीनां जाग्रदवस्थायाञ्च रङ्गे रजतादीनां साक्षिभास्यत्वं तथा भावनामयानां (ललनात्वादिरूपेण साधारणीकृतानां) विभावादीनामपि साक्षिभास्यत्वे न कश्चिद्विरोधः।

इत्थमभिनवगुप्त मम्मटभट्टादिग्रन्थस्वारस्येन भग्नावरणचिद्विशिष्टो रत्यादिः स्थायी भावो रस इति स्थितम्।

नन्वेवं रसस्य रत्यादिस्थायिरूपतया चैतन्यभिन्नत्वे, चैतन्याभेदप्रतिपादकाः 'रसो वै सः' इत्यादिश्रुतयो विरुध्यन्तीति सिद्धान्तमभिदधाति पंडितराजः—

"वस्तुतस्तु वक्ष्यमाणश्रुतिस्वारस्येन रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः।" अर्थाद् रत्यादिविषयकं भग्नावरणं चैतन्यमेव रसो न तु चैतन्यविषयीभूतरत्यादिः श्रुतिस्वारस्यभङ्गप्रसङ्गात्।

इदमत्रोल्लेखनीयमस्ति यदभिनवगुप्तमतनिरूपणप्रसङ्गे 'रसो वै सः' इति श्रुतिमुल्लिलेख जगन्नाथः स्वयम्। सा श्रुतिः रस्यते = आस्वाद्यते, इति व्युत्पत्तियोगाद् ब्रह्मण आनन्दमयतां ख्यापयति। यतोऽभिनवगुप्तो रसमात्मानन्दरूपमाह, अत एवानन्दरूपयो रसब्रह्मणोरैक्यं स्वाभाविकम्।

किन्तु साक्षात्कारे द्वयोरेतयोर्भेदः। तथाहि परब्रह्मसाक्षात्कारो विषयासंवलितत्वाद् विशुद्धब्रह्मविषयकः। श्रवणादिव्यापारजन्यश्च। रसास्वादस्तु विभावादिसंवलितत्वात् विशिष्टरसविषयको व्यञ्जनामात्रजन्यश्च। नच भेदाङ्गीकारे 'ब्रह्मैव रसः' 'रसो वै सः' इत्याद्यभेदप्रतिपादकश्रुतिविरोध इति वाच्यम्। तासामपि 'आदित्यो यूपः' इत्यादीनामिव सादृश्य एव तात्पर्यपर्यवसानात्।

इत्थं (१) 'भग्नावरणचिद्विशिष्टो रत्यादिः स्थायी भावो रसः'।
(२) 'रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः' इत्येतत्सिद्धान्तद्वयं व्यवस्थापितं

पण्डितराजैर्दृष्टिकोटिद्वयेन। मतद्वयेऽप्यस्मिन् चिदंशमादाय नित्यत्वं स्वप्रकाशत्वञ्च सिद्धम्। रत्याद्यंशमादाय पुनरनित्यत्वमितरभास्यत्वञ्च।

**रसचर्वणायां सुखप्रतीतिः—**

अथास्यां रसचर्वणायां सुखांशभाने किं मानमिति चेत् समाधावपि सुखांशभाने किं मानम्? एवमयं प्रश्नस्तावत्तुल्य एव। समाधौ 'सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम्' इत्यादिः शब्दोऽस्ति प्रमाणमिति चेद् अस्त्यत्रापि 'रसो वै सः' 'रसं ह्येवायं लब्ध्वानन्दीभवति' इत्यादिश्रुतिः सकलसहृदयप्रत्यक्षञ्चेति प्रमाणद्वयम्। इति।

**भट्टनायकानां मते—**

ताटस्थ्येन (औदासीन्येन = स्वसंबन्धराहित्येन = 'दुष्यन्तः शकुन्तलाविषयकरतिमान्' इत्याद्याकारवत्त्वेनेति भावः) रसप्रतीतावनास्वाद्यत्वम्, सर्वं खल्वात्मनः कामाय प्रियं भवतीतिश्रवणात्। आत्मगतत्वेन (शकुन्तला मम मातृवत्पूज्येति ज्ञानस्य जागरूकत्वाद् 'अहं शकुन्तलाविषयकरतिमान्' इत्याद्याकारवत्त्वेनेत्यर्थः) प्रत्ययो दुर्घटः = आस्वादात्मकप्रतीतिसंभवा, शकुन्तलाया दुष्यन्तेतरसहृदयनिष्ठशृङ्गाररसालम्बनत्वाभावात्।

न च कान्तात्वं साधारणविभावतावच्छेदकमस्ति, तच्चात्रापि (शकुन्तलादिभूमिकां गृहीतवत्यां नट्यामपि) वर्त्तत इति वाच्यम्। अप्रामाण्यनिश्चयानालिङ्गितागम्यात्वप्रकारकज्ञानविरहस्य विशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकस्य विभावतावच्छेदककोटावश्यं निवेश्यत्वात्। अर्थात् रतेरालम्बनार्थं केवलं कान्तात्वं न पर्याप्तं, तथा सति स्वस्रादेरप्यापत्तेः। अतः स्वस्रादीनां परिच्छेदाय, विशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकेन, अप्रामाण्यनिश्चयानालिङ्गितागम्यात्वप्रकारकज्ञानाभावेन विशिष्टं कान्तात्वमेवालम्बनविभावतावच्छेदकं ज्ञातव्यम्।

टिप्पणी—कान्ताविशेष्यकागम्यात्वप्रकारकज्ञाने जायमानेऽपि तज्ज्ञानविषयकाप्रामाण्यनिश्चयदशायां न कार्यसिद्धिरिति ज्ञानविशेषणम् 'अप्रामाण्यनिश्चयानालिङ्गितत्वं प्रदत्तम्।

इत्थं शकुन्तलादिषु सामाजिकानां रतेरालम्बनविभावत्वं न संभवति। यतः 'शकुन्तलादयः पूज्याः' इत्यगम्यात्वप्रकारकं ज्ञानं सामाजिकेषु वसत्येव। तस्य च

ज्ञानस्य अप्रामाण्यनिश्चयः ( 'शकुन्तलाया अगम्यात्वं मिथ्या' इति स्वरूपः ) अपि न दृश्यते ।

एवमेव करुणरसादावपि मृतमात्राऽव्यक्तिरेव सामाजिकानां शोकस्थायिभावस्य विभावो भवितुं नार्हति । तथा सति ब्रह्मज्ञानोपरान्तं मृतो ब्रह्मज्ञानी, राजदण्डोपरान्तं हतः कापुरुषश्चापि करुणरसे विभावो भविष्यति । किन्तु तन्नास्ति समुचितम् ।

ननु स्वात्मनि दुष्यन्ताद्यभेदबुद्धिरेवागम्यात्वादिप्रकारकज्ञानोत्पत्तिप्रतिबन्धिकेति चेन्न । नायके धराधौरेयत्वधीरत्वादेरात्मनि च कापुरुषत्वादेर्वैधर्म्यस्य प्रतिपत्तिवशादभेदबोधो दुर्लभः ।

किं चेयं प्रतीतिः ? प्रमाणान्तराभावाच्छाब्दीति चेन्न । व्यावहारिकशब्दान्तरजन्यानां नायकमिथुनवृत्तान्तज्ञानानामिवास्याः ( रसप्रतीतेः ) अपि चमत्कारविरहत्वापत्तेः । नापि मानसी । चिन्तोपनीतानां तेषामेव पदार्थानां मानस्याः प्रतीतेरस्यां ( रसप्रतीतौ ) वैलक्षण्यभानात् । न च स्मृतिः, तथा प्रागनुभवात् ।

इत्थं, दर्शनशास्त्रस्यात्र नितान्तमसमर्थत्वात्काव्यस्यैवाश्रयो ग्रहीतव्यो रसप्रतीतिप्रकरण इति निर्दिशन् भट्टनायक आह—'त्रयोंऽशाः काव्यस्य—अभिधा, भावना चैव तद्भोगीकृतिरेव च ।' अभिधया निवेदिताः पदार्था भावकत्वव्यापारेण, अगम्यात्वादिरसप्रतिकूलज्ञानं प्रतिबध्यकान्तात्वादिरसानुकूलधर्मपुरस्कारेणावस्थाप्यन्ते । एवं दुष्यन्त-शकुन्तलादेशकालवयोऽवस्थादिषु साधारणीकृतेषु, भावकत्वव्यापारो विरमति । ततश्च तृतीयस्य भोगकृत्त्वव्यापारस्य ( भोजकत्वस्येत्यर्थः ) महिम्ना रजस्तमसोर्निगीर्णयोः सतोः, सत्त्वमात्रजनितेन निजचित्स्वभावनिर्वृतिविश्रान्तिलक्षणेन साक्षात्कारेण विषयीकृतः ( स्वप्रकाशतया वास्तवेन निजस्वरूपानन्देन गोचरीकृतः ) भावनोपनीतः साधारणात्मा रत्यादिः स्थायी = रसः ।

टिप्पणी—मतस्यैतस्य पूर्वस्मान्मताद् भावकत्वव्यापारान्तरस्वीकार एव विशेषः । भोगस्तु व्यक्तिरेव । अत एव भोगकृत्त्वं भोजकत्वं वा व्यञ्जनासमकक्षम् । शेषं सर्वं तुल्यम् । यथा प्रथममते व्यञ्जना, अज्ञानावरणमपसार्य सत्त्वोद्रेके सति, भग्नावरणचिदवच्छिन्नरत्यादिं, रत्याद्यवच्छिन्नभग्नावरणचितं वा सच्चिदानन्दास्वादसंज्ञां प्राप्य रसत्वेनोपस्थापयति तथैव द्वितीयमते भोगकृत्त्वं सत्त्वोद्रेके सति

स्वीयभग्नावरणसच्चिदानन्दरूपेण साक्षात्कारेण रत्यादिं प्रकाश्य रसत्वेन व्यवहारयति। इत्थं भोजकत्वं व्यञ्जनास्थानीयमेव। आद्यमते विभावादीनां साधारणीकरणं सहृदयत्वप्रभावितभावनाविशेषप्रतापेन निष्पद्यते। इह तु तदर्थं विभावादिनिष्ठस्य कस्यापि नूतनव्यापारस्याङ्गीकृतिरिति।

( ३ ) नव्यानां ( पण्डितराजसमर्थितानां ) मतेन—

"काव्ये नाट्ये च, कविना नटेन च प्रकाशितेषु विभावादिषु, व्यञ्जनाव्यापारेण दुष्यन्तादौ शकुन्तलादिरतौ गृहीतायाम्, अनन्तरं च सहृदयतोल्लासितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना, कल्पितदुष्यन्तत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने, शुक्तिकाशकल इव रजतखण्डः समुत्पद्यमानोऽनिर्वचनीयः साक्षिभास्यशकुन्तलादिविषयकरत्यादिरेव रसः।"

विभावादिज्ञानानन्तरं व्यञ्जनाशक्त्या 'दुष्यन्तः शकुन्तलाविषयकरतिमान्' इति ज्ञानं जायते। तदनन्तरं सामाजिकस्य दुष्यन्तेन सह सहृदयता ( समानहृदययुक्तता ) भवति या शनैः २ परिपाकमासाद्य भावनाविशेषरूपं दोषं ( मानसिकदशाविशेषं ) जनयति। पुनः पुनर्दुष्यन्तविषयकानुसंधानप्रवणोऽन्तरात्मा तद्दोषमहिम्ना कल्पितदुष्यन्तत्वाच्छादितो जायते। यदा सामाजिकः स्वात्मानं दुष्यन्तत्वेन गृह्णाति तदा शकुन्तलाया अपि स्वकान्तात्वस्वीकृतौ ( तस्यां विशिष्टमानसिकदशायां ) न कोऽपि विरोधः। यथा चाकचक्यदोषमहिम्ना दूरत्वाद्याच्छादिते शुक्तिखंडे रजतशकलस्य प्रतीतिरनिर्वचनीया, तथैव भावनाविशेषदोषप्रभावेण कल्पितदुष्यन्तत्वाच्छादिते स्वात्मनि कल्पितशकुन्तला विषयरतेरास्वादोऽनिर्वचनीयस्वरूप एव। अर्थात् तस्याः कल्पितत्वान्नासौ सद्रूपेणाभिधातुं पार्य्यते न चासद्रूपेण। यद्यपि नास्माकं शकुन्तलादिविषयिणी रतिर्वास्तविकी न च शुक्तिखण्डे रजतखण्डविषयिणी प्रतीतिः यथार्था, तथापि साक्षी = आत्मा, तयोर्भानं तथा कारयतीति।

टिप्पणी—अस्मिन्नवीनमते पण्डितराजेन प्राक्तनानां साधारणीकरणसिद्धान्तोपरि प्रहारो विहितः। साधारणीकरणव्यापारेण, शकुन्तलादयः स्वव्यक्तिनिष्ठशकुन्तलात्वादिधर्मान् विहाय कान्तात्वादिसाधारण ( विश्वजनीन ) धर्मपुरःसरं सहृदयानां समक्षमायान्तीति मन्यन्तेऽभिनवगुप्तमम्मटभट्टनायकादयः। तत्र पण्डितराजस्यायं प्रश्नः—यदा शब्दाः (शकुन्तलादयः) शकुन्तलात्वेन शकुन्तलाया

एव बोधकास्तदा कथं तैः कान्तात्वादयो बोधयितुं शक्यन्ते ? अतो दोषविशेषकल्पनमनिवार्यमस्ति। एवञ्च दोषविशेषस्यास्यावश्यं कल्पनीयत्वात्तेनैव सहृदयैः स्वात्मसु दुष्यन्ताद्यभेदबुद्धिरपि स्वीकार्या।

"अतोऽवश्यकल्प्ये दोषविशेषे तेनैव स्वात्मनि दुष्यन्ताद्यभेदबुद्धिरपि सूपपादा"।

अयं रसः पण्डितराजमतेन नास्ति नित्यः (यथा प्राक्तनैरुक्तः) अपितु नश्वरः। पूर्वोक्तदोषस्तस्य कारणम्। तन्नाशे तस्यापि नाशः। 'अहं शकुन्तलाविषयकरतिमान् दुष्यन्तः' इतिप्रतीतेरनन्तरं यद्भवत्यलौकिकं सुखं, तस्मिन् पूर्वोक्तरतिरूपरसादभेदज्ञानाभावेन 'रसः परमानन्दस्वरूपः' इत्यादिव्यवहारः संपद्यते।

पुनश्चायं रसो याथार्थ्येन न व्यङ्ग्यो न च वर्णनीयः। परन्तु रसोत्पत्तेः प्राक् व्यञ्जनावृत्त्या शकुन्तलादिविषये दुष्यन्तादिनिष्ठरत्यादीनां यदासीज्ज्ञानं तस्य, दोषविशेषप्रभावेण स्वात्मनि भासिताया अवास्तविक्या रसरूपायाः शकुन्तलाविषयकरतेर्ज्ञानस्य च भेदानवबोधनाद् रसो व्यङ्ग्यो वर्णनीयश्च कथ्यते।

"स्वपूर्वोपस्थितेन रत्यादिना तदग्रहात्, तद्रतित्वेनैकत्वाध्यवसानाद्व्यङ्ग्यो वर्णनीयश्चोच्यते।"

ननु करुणरसादौ नायकस्य दुःखानुभवात्तच्छोकेनैकत्वाध्यवसानात् (एतत्सिद्धान्तानुसारेण), नायक इव सामाजिकेऽपि दुःखानुभवस्यौचित्यम्। कथं तर्हि सर्वत्र रसस्यानन्दस्वरूपतेति चेत्। सत्यम्। सहृदयस्योपरि विषयोऽयं त्यक्तव्यः। यदि करुणरसेऽप्याह्लाद इत्यनुभवस्तदाऽलौकिककाव्यव्यापारस्य (दोषविशेषस्य) महिमात्र स्वीकरणीयो येन दुःखप्रतिबन्धो जायते। यदि दुःखमपि सहृदयहृदयसंवेद्यं तथा तदपि दोषविशेषमहिमोद्भवं ज्ञातव्यम्।

रसोऽयमस्मिन्मते नास्ति वस्तुतः व्यञ्जनाव्यापारजन्यः। अतः 'काव्यव्यापारजन्यत्वम्' इत्यस्यार्थः 'काव्यव्यापारजन्यभावनाजन्यरत्यादिविषयकत्वम्' इति वेदितव्यः। इति।

(४) मनःकल्पितज्ञानवादिनां मतम्—

रसो न व्यङ्ग्यो न चानिर्वचनीयः (यथा तृतीयमते मतम्)। किन्तु शकुन्तलादौ रत्यादिमता दुष्यन्तादिना सह भ्रमात्मकं मनःकल्पितमभेदज्ञानमेव

रसः। मतेऽस्मिन्नेतादृशज्ञानस्य त्रैविध्यं संभवति—(क) दुष्यन्तत्वावच्छिन्न-विशेष्यतानिरूपितप्रकारताश्रयीभूत-शकुन्तलारतिविशिष्टोऽहं। (ख) शकुन्तला-विषयकरतित्वावच्छिन्नप्रकारतानिरूपितविशेष्यताश्रयीभूतदुष्यन्ततादात्म्यवानहम्। (ग) अहं, दुष्यन्तत्ववान् शकुन्तलाविषयकरतिमाँश्चेति।

(५) मुख्यतया दुष्यन्तादिगत एव रत्यादिः, दुष्यन्ताद्यनुकर्त्तरि नटे समारोप्य गोचरीक्रियते।

(६) दुष्यन्तादिगतो रत्यादिः, दुष्यन्तत्वेन गृहीते नटे, कृत्रिमैरपि स्वाभाविकतया गृहीतैर्विभावादिभिर्भिन्ने विषयेऽनुमितिसामग्र्या बलवत्त्वादनुमीय-मानः सन् रसपदवीमारोहति।

(७) विभावादयस्त्रयः समुदिताः = रसाः।

(८) विभावादिषु त्रिषु य एव चमत्कारी स एव रसः।

(९) भाव्यमानो विभाव एव रसः।

(१०) भाव्यमानोऽनुभाव एव रसः।

(११) भाव्यमानो व्यभिचार्येव रसरूपेण परिणमति।

## स्थायिभावानां परिभाषा संख्या च

रतिः शोकश्च निर्वेदः क्रोधोत्साहौ च विस्मयः।
हासो भयं जुगुप्सा च स्थायिभावाः क्रमादमी॥

आप्रबन्धस्थिरत्वं = स्थायिभावत्वम्। वासनारूपाणाममीषां मुहुर्मुहुरभिव्य-क्तेरेव स्थिरपदार्थत्वम्।। व्यभिचारिणां तु नैव मुहुर्मुहुरभिव्यक्तिरपि तु तेषामभि-व्यक्तिस्तु विद्युद्द्योततुल्या।

## स्थायिभावसंचारिभावयोर्भेदः

रत्यादयः स्थायिभावाः स्युर्भूयिष्ठविभावजाः।
स्तोकैर्विभावैरुत्पन्नास्त एव व्यभिचारिणः॥

## स्थायिभावरसयोर्भेदः

रसेभ्यः स्थायिभावानां घटादेर्घटाद्यवच्छिन्नाकाशादिव भट्टनायकाभिनवगुप्त-मतयोः, सत्यरजतस्य, अनिर्वचनीयरजतादिव पंडितराजमतानुसारेण, रजतादेर्विषयस्य, रजतादीनां ज्ञानादिव, ज्ञानवादिनां मतेन, भेदो बोध्यः।

## प्राचीनमतानुसारिणी स्थायिभावानां परिभाषा

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः।
आत्मभावं नयत्याशु, स स्थायी लवणाकरः॥
चिरं चित्तेऽवतिष्ठन्ते, संबध्यन्तेऽनुबन्धिभिः।
रसत्वं ये प्रपद्यन्ते, प्रसिद्धाः स्थायिनोऽत्र ते॥
सजातीयविजातीयैरतिरस्कृतमूर्त्तिमान्।
यावद्रसं वर्त्तमानः, स्थायिभाव उदाहृतः॥

**रसगङ्गाधरप्रतिपादिताष्टमतानुसारेण क्रमशो भरतसूत्रस्य व्याख्या—**

(१) विभावानुभावव्यभिचारिभिः संयोगाद्=व्यञ्जनाद्, रसस्य=चिदानन्दविशिष्टस्थाय्यात्मनः, स्थाय्युपहितचिदानन्दात्मनो वा निष्पत्तिः स्वरूपेण प्रकाशनम्।

(२) विभावानुभावव्यभिचारिणां सम्यक् साधारणात्मतया योगाद्=भावकत्वव्यापारेण भावनाद्, रसस्य=स्थाय्युपहितसत्त्वोद्रेकप्रकाशित-स्वात्मानन्दरूपस्य निष्पत्तिः=भोगाख्येन साक्षात्कारेण विषयीकृतिः।

(३) विभावानुभावव्यभिचारिणां संयोगाद् भावनाविशेषरूपाद् दोषाद् रसस्यानिर्वचनीयदुष्यन्तरत्याद्यात्मनो निष्पत्तिरुत्पत्तिः।

(४) विभावादीनां संयोगाज् ज्ञानाद् रसस्य ज्ञानविशेषात्मनो निष्पत्तिः=उत्पत्तिः।

(५) विभावादीनां संबंधाद् रसस्य रत्यादेर्निष्पत्तिरारोपः।

(६) विभावादिभिः कृत्रिमैरप्यकृत्रिमतया गृहीतैः संयोगादनुमानात् रसस्य-रत्यादेर्निष्पत्तिः=अनुमितिः, नटादौ पक्षे।

( ७ ) विभावादीनां त्रयाणां संयोगाद् समुदायाद् रसनिष्पत्ती रसपदव्यवहारः ।

( ८ ) विभावादिषु सम्यग्योगाच्चमत्काराद्रसपदव्यवहारः ।

९, १०, ११ मतानि भरतसूत्रविरुद्धानीति न तेषामत्र प्रसङ्गः । पण्डितराजेन स्वसमये तेषां प्रचलितत्वान्निर्देशो विहितः स्यात् ।

## वीररसस्य भेदानां विषये पण्डितराजस्य मतम्—

प्राञ्चो दानदयायुद्धधर्मैश्चतुर्भिर्वीररसोपाधेरुत्साहस्य चतुर्विधत्वाद्वीररसं चतुर्विधं प्राहुः । पण्डितराजः सत्यपाण्डित्यक्षमाबलरूपैरन्यानपि चतुरो भेदानाजग्राह । ननु सत्यस्यापि धर्मान्तर्गततया धर्मवीररस एव तद्वीरस्याप्यन्तर्भाव इति चेन्न । एवं तु दानदययोरपि धर्मान्तर्गततया तद्वीरयोरपि धर्मवीर एव समावेशः करणीयः । यदि तौ भद्रौ पृथक्तयाऽङ्गीक्रियेते तर्हि सत्यवीरस्यापि पृथग्गणनमेवोचितम् । एवं पाण्डित्यवीरस्यापि पृथग्गणनमेव गरीयः, शस्त्रयुद्धशास्त्रयुद्धयोर्विजिगीषैकमूलकत्वेन युद्धत्वस्योभयत्रापि कल्पनमुपहासास्पदम् । अतो नास्य युद्धवीरेऽन्तर्भावः । ननु बलवीरे गर्व एव ध्वन्यते नोत्साहः, क्षमावीरे च धृतिरेव ध्वन्यते नोत्साहोऽतः क्षमाबलवीरस्थलयोर्भावध्वनय एव न रसध्वनय इति चेन्न । युद्धवीरादिषु प्राक्तनाचार्यकल्पितेष्वपि गर्वादिध्वनित्वस्वीकारप्रसङ्गात् । एवञ्च तत्तद्व्यभिचारिध्वननेनैव रसध्वनिसामान्यस्य स्वीकाराद् रसध्वनेर्मूलोच्छेद एवापतेत् । वीररसध्वन्युदाहरणेषु स्थायिभावप्रतीतिदुरपह्नवेति चेत्, तुल्यमेव सा प्रतीतिर्बलवीरादिष्वपि । दयावीरादिषु स्थाय्युत्साहः प्रतीयते बलवीरादिषु च नेति न कस्यापि स्वीकार्यम् ।

( १ ) सत्यवीरस्योदाहरणं यथा—

'सपदि विलयमेतु राज्यलक्ष्मीरुपरि पतन्त्वथवा कृपाणधाराः ।
अपहरतुतरां शिरः कृतान्तो मम तु मतिर्न मनागपैति सत्यात् ॥'

अत्र सत्यविषय आलम्बनम् 'अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीरा' इत्यादिवाक्यालोचनमुद्दीपनं, शिरश्छेदनाद्यङ्गीकारोऽनुभावः धृतिश्च संचारी । एतैरभिव्यक्तः सत्यवीरोऽत्र प्रधानवाक्यार्थः ।

( २ ) पाण्डित्यवीरो यथा—

अपि वक्ति गिरां पतिः स्वयं
यदि तासामधिदेवतापि वा ।
अयमस्मि पुरो हयानन-
स्मरणोल्लङ्घितवाङ्मयाम्बुधिः ॥

अत्र बृहस्पतिः सरस्वती चालम्बनविभावः सभादिदर्शनोद्दीपितो निखिलविद्वत्तिरस्कारोऽनुभावः, गर्वः संचारी । एतैः पोषित उत्साहोऽत्र पाण्डित्यवीरपदवीमारोहति ।

( ३ ) क्षमावीरो यथा—

अपि बहलदहनजालं मूर्ध्नि रिपुर्मे निरन्तरं धमतु ।
पातयतु वाऽसिधारामहमणुमात्रं न किञ्चिदाभाषे ॥

( ४ ) बलवीरो यथा—

परिहरतु धरां फणिप्रवीरः सुखमयतां कमठोऽपि तां विहाय ।
अहमिह पुरुहूत, पक्षकोणे, निखिलमिदं जगदण्डकं वहामि ॥
( इन्द्रं प्रति गरुडस्योक्तिः )

## नाट्ये शान्तरसस्थितिः

शान्तस्य शमसाध्यत्वान्नटे च तदसंभवात् ।
अष्टावेव रसा नाट्ये, न शान्तस्तत्र युज्यते ॥

इत्यस्ति केषाञ्चिन्मतम् । तदपरे न क्षमन्ते, नटे रसाभिव्यक्तेरस्वीकारात् । न च नटस्य शमाभावात् तदभिनयप्रकाशत्वानुपपत्तिरिति वाच्यम्, तस्य भयक्रोधादेरप्यभावेन तदभिनयप्रकाशकताया अप्यसङ्गत्यापत्तेः । अथ नाट्ये गीतवाद्यादीनां विरोधिनां सत्त्वात् सामाजिकेष्वपि विषयवैमुख्यात्मनः शान्तस्य कथमुद्रेक इति चेत् । नाट्ये शान्तरसमभ्युपगच्छद्भिः फलबलात् तद्गीतवाद्यादेस्तस्मिन् विरोधिताया अकल्पनात् । अत एव चरमाध्याये सङ्गीतरत्नाकरे—

अष्टावेव रसा नाट्येष्विति केचिदचूचुदन् ।
तदचारु यतः कञ्चिन्न रसं स्वदते नटः ॥

इत्यादिना नाट्येऽपि शान्तो रसोऽस्तीति व्यवस्थापितम्। यैरपि नाट्ये शान्तो रसो नास्तीत्यङ्गीक्रियते तैरपि बाधकाभावान्महाभारतादिप्रबन्धानां शान्त-रसप्रधानताया अखिललोकानुभवसिद्धत्वात् काव्ये सोऽवश्यं स्वीकार्यः। अत एव 'अष्टौ नाट्ये रसाः स्मृताः' इत्युपक्रम्य, 'शान्तोऽपि नवमो रसः' इति मम्मटभट्टा अप्युपसमहार्षुः।

## भक्तिरसस्य खण्डनम्

भक्तिरसे, भगवदनुरागरूपभक्तेः स्थायिभावस्य, भगवतो वासुदेवादिकस्या-लम्बनस्य, रोमाञ्चाश्रुपातादेरनुभावस्य, हर्षादेः सञ्चारिणो दुरपह्नवत्वाद् भक्तिरसोऽपरो रस इति केषाञ्चिन्मतम्। न चायं रसः शान्तरसेऽन्तर्भवितुमर्हति; अनुरागस्य वैराग्यविरुद्धत्वात्। पण्डितराजस्तन्नानुमनुते। भक्तेर्देवादिविषयरतित्वेन भावान्त-र्गततया रसत्वानुपपत्तेः। 'रतिर्देवादिविषया व्यभिचारी तथाञ्जितः' इति प्राचां सिद्धान्तात्। इति।

## रसदोषाः

(१) अविरोधसम्पादनेनापि निबध्यमानो रसो रसशब्देन शृङ्गारादिशब्दैर्वा नाभिधातुमुचितः। व्यङ्ग्यस्य वाच्यीकरणे सामान्यतो वमनाख्यदोषापत्तेः। विशेषतश्च आस्वाद्यतावच्छेदकरूपेण प्रत्ययाजनकतया (वैयञ्जनिकापरोक्षज्ञान-रूपेण आस्वादजनकत्वाभावेन) रसस्थले वाच्यवृत्तेः, (अभिधायाः) कापेयकल्पत्वेन (वानरचेष्टिततुल्यत्वेन) निरर्थकत्वनामदोषापत्तेः यथा—

'तामुद्वीक्ष्य कुरङ्गाक्षीं शृङ्गारे मग्नमन्तरम्।'

(२–३) स्थायिव्यभिचारिणां शब्दवाच्यत्वम्। यथा—ठणत्कारैः श्रुति-गतैरुत्साहः (स्थायी) तस्य कोऽप्यभूत्। यथा च—सव्रीडा (व्यभिचारिणः शब्दवाच्यत्वम्) दयितानने सकरुणा मातङ्गचर्माम्बरे–इत्यादि श्लोकः।

(४–५) विभावानुभावयोरसम्यक्प्रत्यये विलम्बेन प्रत्यये वा, रसास्वादा-भावो दोषः।

(६) समबलप्रबलप्रतिकूलरसाङ्गानां निबन्धनं (सुन्दोपसुन्दन्यायेन, मात्स्य-न्यायेन वा); प्रकृतस्य पोषप्रातीपिकम् (शत्रु-कार्यसम्पादकम्) इति दोषः।

( ७ ) प्रबन्धे प्रकृतरसस्य प्रसङ्गान्तरेण विच्छिन्नस्य पुनर्दीपने—विच्छिन्न-दीपनं दोषः ।

( ८–९ ) तत्तद्रसप्रस्तावनानर्हेऽवसरे तत्तद्रसस्य प्रस्तावः, विच्छेदानर्हे चावसरे विच्छेदः ( यथा सन्ध्यावन्दनादिसमये समये, प्रसक्ते कामिनोरनु-रागवर्णनम्, युद्धावसरे च नायकस्य सन्ध्यावन्दनादिवर्णनम् ।

( १० ) अप्रधानस्य प्रतिनायकादेश्चरितानां नायकस्य चरितेभ्यः सातिशयं वर्णनम् दोषः ।

( ११ ) रसस्य, आलम्बनाश्रययोरनुसंधानम्, अन्तराऽन्तरा न चेद् दोषः ।

( १२ ) प्रकृतरसानुपकारकस्य वस्तुनो वर्णनम्—दोषः ।

( १३ ) अनौचित्यं दोषः । यथाह ध्वनिकारः—

अथौचित्यादृते नान्यद् रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥

## विसर्ग-लोपः

जातिदेशकालवर्णाश्रमवयोऽवस्थाप्रकृतिव्यवहारादेः प्रपञ्चजातस्य यल्लोक-शास्त्रसिद्धमुचितं द्रव्यगुणक्रियादि, तद्भेदः । जात्यादेरनुचितं यथा 'दिव्याः, अदिव्याः, दिव्यादिव्याः, धीरोदात्तधीरोद्धतादयश्च' याः प्रकृतयस्ता अविगणय्य साधारणीकरणयुक्तिबलादुत्तमदेवतासु रामादिषु संभोगरूपाया रतेः स्फुटीकृतचुम्ब-नादिसकलानुभाववर्णनम् । यत्र सहृदयानां रसोद्बोधः प्रमाणसिद्धः, तत्रैव साधारणीकरणस्य कल्पनमुचितम् । अन्यथा स्वमातृविषयक—स्वपितृरतिवर्णनेपि रसोद्बोधापत्तेः । जयदेवादिभिस्तु गीतगोविन्दादिप्रबन्धेषु सकलसहृदयसम्मतोऽयं समयो मदोन्मत्तमतङ्गजैरिव भिन्न इति न तन्निदर्शनेन इदानीन्तनेन कविना तथा वर्णयितुं साम्प्रतम् । इत्थमेव व्यवहारानुचितम्—यथा पूज्येषु 'तत्रभवन्' इत्यादिशब्दानामप्रयोगः ।

किन्तु यावता त्वनौचित्येन रसस्य पुष्टिस्तावत्तु न वार्यते । यथा—

ब्रह्मन्नध्ययनस्य नैष समयस्तूष्णीं बहिः स्थीयतां
स्वल्पं जल्प बृहस्पते जडमते, नैषा सभा वज्रिणः ।

वीणां संहर नारद स्तुतिकथालापैरलं तुम्बुरो
सीतारल्लकभल्लभिन्नहृदयः स्वस्थो न लङ्केश्वरः ॥

अत्र विप्रलम्भशृङ्गाररसाभावस्याङ्गीभूतो यो वीररसः, तस्याक्षेपकं ( व्यञ्जकं ) परमैश्वर्यं ( रावणसम्बन्धि ) परिपोषयति, दौवारिकवचनम् । अतः काव्यदृष्ट्या ब्रह्मादीनां दिव्यप्रकृतीनामधिक्षेपोऽपि न दोषः ।

एवमेव 'अरे रे सद्यः समुत्पाटितकुशग्रन्थिमयाक्षमालापरिवृत्तिविस्तम्भित-बालविधवान्तःकरणा ब्राह्मणाः', इत्यादिविदूषकवचनेऽपि रे-शब्दादिप्रयोगः हास्यरसानुगुणत्वान्न दोषः । इति । एषा हि दिगुपदर्शिता, अनया सुधीभिरन्य-दप्यूह्यम् ।

## काव्ये गुणानां स्थितिः

प्राञ्चो माधुर्यौजःप्रसादाख्यांस्त्रीन् गुणान् रसमात्रधर्मानाहुः । यथोक्तं मम्मटेन—

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥' इति ।

तेषां मते प्रत्यक्षप्रमाणाभावं दर्शयन्नाह पंडितराजः—येऽमी माधुर्यौजः-प्रसादा रसमात्रधर्मतयोक्तास्तेषां रसमात्रधर्मत्वे किं मानम् ? प्रत्यक्षमेवेति चेन्न । यथा वह्नेः दाहादिरूपात् कार्यात् पृथग्, अग्नेर्गुणस्योष्णस्पर्शादेः प्रत्यक्षञ्जायते न तथा रसानां कार्येभ्यो द्रुत्यादिचित्तवृत्तिभ्यः पृथग् रसगतानां माधुर्यादीनां प्रत्यक्षं जायते ।

न च 'गुणविशिष्टा रसा द्रुत्यादिहेतवः' इति कार्यकारणभावस्य सिद्धतया, द्रुत्यादिकारणावच्छेदकतया गुणानामनुमाने ( 'द्रव्यादिकार्यतानिरूपिता रसनिष्ठा कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् । यत्र यत्र कारणत्वं तत्र तत्र किञ्चिद्धर्मावच्छिन्नत्वम् इत्यात्मके ) सति रसधर्मतासिद्धिर्गुणानामिति वाच्यम्, प्रातिस्विकरूपेण ( शृङ्गारत्वादिविशेषधर्मेणैव ) कारणतोपपत्तौ, गुणकल्पने गौरवात् । अर्थात् शृङ्गारत्वादीनामेव द्रुत्यादिकारणतावच्छेदकत्वं युक्तं न तु गुणानाम् ।

न च द्रुतिं प्रति शृङ्गारकरुणशान्तानां ( द्रुतिमतां त्रयाणां ) प्रातिस्विकरूपेण कारणत्वे कार्यकारणभावत्रयस्य कल्पनीयतया, तदपेक्षया तेषां ( पूर्वोक्तानां त्रयाणां ) माधुर्यवत्त्वेन कारणत्वकल्पने लाघवमस्तीति शङ्क्यम्। मम्मटादिभिः मधुरतरादिगुणानां पृथग् द्रुततरत्वादिकार्यतारतम्यप्रयोजकतयाऽभ्युपगमेन, माधुर्यवत्त्वेन तेषां ग्रहणं गड्डुभूतमेव स्यात्। अर्थात्, प्राक्तनैर्मम्मटादिभिराचार्यैः शृङ्गारकरुणशान्तेषु क्रमशो माधुर्यस्याधिक्यं, वीरबीभत्सरौद्रेषु क्रमश्च ओजसः, अद्भुतहास्यभयानकेषु प्रसादस्याधिक्यं मतम्। तदनुसारेण, कार्येष्वपि 'द्रुतिः, अतिद्रुतिः, अतितमां द्रुतिः' इत्यादिरूपेण द्रुत्यादितत्कार्याणामपि तारतम्यं स्वीकृतम्। एवञ्च 'द्रुतिं प्रति माधुर्यवान् संभोगः कारणम्' 'अतिद्रुतिं प्रति नितरां माधुर्यवान् करुणः विप्रलम्भश्च कारणम्, अतितमां द्रुतिं प्रति नितरां माधुर्यवान् शान्तः कारणम्' इत्यादिरीत्या नव कार्यकारणभावा मंस्यन्ते। तदतिरिक्तत्वेन च माधुर्यवत्त्वादयस्त्रयः सामान्यरूपेण कार्यकारणभावा अपि कल्प्याः। इत्थं गौरवमेव स्यान्नतु लाघवम्।

अपि च सच्चिदानन्दस्वरूपो निर्गुण आत्मेति वेदान्तमतानुसारेण, काव्यस्यात्मभूतानां रसानामपि निर्गुणत्वं स्वीकार्यम्। तच्च यदि स्वीक्रियते तदा रसानां माधुर्यादिगुणत्वमनुपपन्नम्। रसोपाधिभूतरत्यादीनामपि तदनुपपन्नं, मम्मटादिभीरत्यादीनां सुखरूपतया मतत्वेन, गुणे गुणानां सद्भावस्यानुपपन्नत्वात्।

'अथ शृङ्गारो मधुरः' इत्यादिव्यवहारः कथमिति चेत्। एवं तर्हि गुणानां द्रुत्यादिचित्तवृत्तिप्रयोजकत्वम्, अथवा प्रयोजकतासंबंधेन द्रुत्यादिकत्वमेव माधुर्यादीनां तिष्ठतु। यथा पारिणामिकमुष्णत्वमादाय वाजिगन्धा, उष्णा कथ्यते तथैव पार्यन्तिकास्वादकालिकं द्रुत्यादिकमादाय, 'शृङ्गारो मधुरः' इत्यादि व्यवहारः स्यात्।

प्रयोजकत्वञ्च, शब्दार्थरसरचनागतमेव ग्राह्यम्। अतो नादृष्टादिषु सर्वकार्यप्रयोजकेषु माधुर्यादिव्यवहारस्यातिप्रसक्तिः। द्रुत्यादिचित्तवृत्तिप्रयोजकत्वस्य शब्दार्थयोरपि स्वीकारात् 'मधुरा रचना' 'ओजस्वी बन्धः' इत्यादिव्यवहारोपपत्तिरपि स्यात्। 'गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता' इत्यादिर्मम्मटोक्तः सिद्धान्तश्च नैव कल्प्यः।

गुणानां संख्या—

अरत्तरास्तु 'श्लेषः प्रसादः समता, माधुर्यं सुकुमारता। अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः' इति दशशब्दगुणान् , एतन्नामकानेव च भिन्नलक्षणानर्थगुणानपि स्वीचक्रुः। मम्मटादीनामिव पण्डितराजमतेनापि तेषु केचिन्माधुर्यादिषु त्रिष्वेवान्तर्भूताः, केचन दोषाभावरूपाः। केचिच्चालङ्कारस्वरूपाः, अपरे वैचित्र्यमात्राकाराः, इतरे तु दोषा एव। एवञ्च, गुणानां स्वरूपविषये मम्मट-जगन्नाथयोर्मतभेदेऽपि तेषां संख्याविषये मतैक्यमिति बोध्यम्।

## रसाभासः

रसस्येव रसाभासस्यापि प्रथमश्रेणीके काव्ये गणना काव्यशास्त्रविदनुमोदिता। अनौचित्यप्रवर्त्तितो रसो रसाभासः, अनौचित्यप्रवर्त्तितो भावो भावाभास इत्यादिप्रकारेण रसाभासादीनां परिभाषा काव्य-शास्त्रग्रन्थेषूपलभ्यते। तत्र तेषां प्रथमश्रेणीकत्वस्वीकारे न कोऽपि विवादो दृश्यते पण्डितराजस्य किन्तु प्राक्तनानां परिभाषायां किञ्चित्स्वल्पं संशोधनं विदधाति। प्राक्तनैः 'तदाभासा अनौचित्यप्रवर्त्तिता' इत्यादि प्रतिपादितम्। तत्रायं विरोधो जगन्नाथस्य यदियं परिभाषा न समीचीना। अनौचित्येन प्रवर्त्तितो रसो=रसाभासः, इति वदतो व्याघातः। यो रसः स नानौचित्यप्रवर्त्तितो यश्चानौचित्यप्रवर्त्तितो न स रसः। हेतुत्वेन हेत्वाभासत्वमिव रसत्वेन रसाभासत्वं न समानाधिकरणम्। अनुचितविभावालम्बनं रसाभासत्वमिति चेन्न। तथा सति मुनिपत्न्यादिविषयकरत्यादेः संग्रहेऽपि बहुनायकविषयाया अनुभयनिष्ठायाश्च रतेरसङ्ग्रहात् , तत्रालम्बनविभावगतस्यानौचित्यस्याभावात्। तस्मादनौचित्यप्रवृत्तस्थायिकत्वं = रसाभासत्वम्। एवञ्चानुचितविभावालम्बनाया बहुनायकविषयाया अनुभयनिष्ठायाश्च रतेः सङ्ग्रह इति। तत्रानुचितविभावालम्बनकरतेर्यथा—

(१) शतेनोपायानां कथमपि गतः सौधशिखरं
सुधाफेनस्वच्छे रहसि शयितां पुष्पशयने।
निबोध्य क्षामाङ्गीं चकितनयनां स्मेरवदनां
सनिश्वासं श्लिष्यत्यहह सुकृती राजरमणीम्॥

अत्र चकितनयनामित्यनेनानुभयनिष्ठत्वं नाशङ्कनीयम्। स्मेरवदनामित्यनेन राजरमण्या रतेरपि प्रतीतेः। अतोऽत्र राजरमणीरूपनिषिद्धालम्बनकत्वादेव रतेराभासत्वम् रसस्य। अनुभयनिष्ठाया यथा—

(२) भुजपञ्जरे गृहीता नवपरिणीता वरेण वधूः।
तत्कालजालपतिता, बालकुरङ्गीव वेपते नितराम्॥

अत्र नववध्वां रतेर्मनागप्यस्पर्शादनुभयनिष्ठत्वेन संभोगशृङ्गाररसाभासत्वम्।

(३) बहुनायकविषयाया यथा—

भवनं करुणावती विशन्ती गमनाज्ञालवलाभलालसेषु।
तरुणेषु विलोचनाब्जमालामथ बाला पथि पातयाम्बभूव॥

तथा चोक्तं प्राक्तनैः—

उपनायकसंस्थायां मुनिगुरुपत्नीगतायां च।
बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम्॥ इति।

विप्रलम्भाभासो यथा—

व्यत्यस्तं लपति क्षणं, क्षणमथो मौनं समालम्बते
सर्वस्मिन् विदधाति किं च विषये दृष्टिं निरालम्बनाम्।
श्वासं दीर्घमुरीकरोति न मनागङ्गेषु धत्ते धृतिं
वैदेहीकमनीयताकवलितो हा हन्त लङ्केश्वरः॥

अत्र सीतालम्बना लङ्केशगता विप्रलम्भरतिरनुभयनिष्ठतया, जगद्गुरुपत्नीविषयकतया चाभासतां गता।

एवं कलहशीलकुपुत्राद्यालम्बनतया वीतरागादिनिष्ठतया च वर्ण्यमानः शोकः, ब्रह्मविद्याऽनधिकारिचाण्डालादिगतत्वेन च निर्वेदः, पित्राद्यालम्बनत्वेन क्रोधोत्साहौ, ऐन्द्रजालिकाद्यालम्बनत्वेन च विस्मयः, गुर्वाद्यालम्बनतया च हासः, महावीरगतत्वेन भयं, यज्ञीयपशुमांसाद्यालम्बनतया वर्ण्यमाना जुगुप्सा च रसाभासाः।

## भावाभासाः

अनुचितालम्बनका, अनुचिताश्रयनिष्ठा वा वर्ण्यमाना हर्षादयो भावाभासाः। यथाऽनुचितरतिः प्रवासी, प्रतिषिद्धगमनां प्रियां स्मरन् वदति—

सर्वेऽपि विस्मृतिपथं विषयाः प्रयाता
विद्याऽपि खेदकलिता विमुखीबभूव।
सा केवलं हरिणशावकलोचना मे
नैवापयाति हृदयादधिदेवतेव ॥

अत्र चिरसेवितायां विद्यायां कृतघ्नत्वम्, अस्यां च लोकोत्तरत्वमभिव्यज्यमानं व्यतिरेकालङ्कारस्वरूपं स्मृतिमेव पुष्णाति। एषा स्मृतिश्चानुचितविषयकत्वादनुभयनिष्ठत्वाच्च भावाभासः। यदि पुनरियं तत्परिणेतुरेवोक्तिस्तदा भावध्वनिरेव।

टिप्पणी—यथाऽश्वस्य पङ्गुत्वादिदोषान्नाश्वत्वस्य हानिः किन्त्वश्वाभासव्यवहारमात्रम्, तथैव रसभावयोरपि दुष्टत्वे न रसत्वभावत्वयोरभावः, किन्तु रसाभासभावाभासव्यवहारमात्रमिति विदुषां मतम्। अनेन प्रतीयते यद्दोषयुक्तमपि काव्यं प्रथमश्रेणीकं भवितुमर्हति यदि तस्मिन् हृदयावर्जकता भवेत्। विभावादीनाञ्च संयोगपरिपाकः सम्यग्विधिना स्यात्। अनेन पण्डितराजस्य मम्मटकृतकाव्यलक्षणखण्डनस्य युक्तिः साधीयसी दृश्यते। तथा च लिखितं तेन—

"दुष्टं काव्यम्' इति व्यवहारस्य बाधकं विना लाक्षणिकत्वायोगाच्च।" इति।

## भावशान्त्यादीनां भावध्वनित्वम्

(१) भावस्य प्रागुक्तस्वरूपस्य शान्तिर्नाशः = विभावानुभावव्यज्यमानहर्षाद्यन्यतमनाश एव भावशान्तिरित्यर्थः। स च (भावनाशः) उत्पत्त्यवच्छिन्न एव ग्राह्यः। तस्यैव सहृदयचमत्कारित्वात्। यथा—मुञ्चसि नाद्यापि रुषं भामिनि, मुदिरालिरुदियाय (मेघमालोदिताऽभूत्), इति तन्व्याः पतिवचनैरपायि नयनाब्जकोणशोणरुचिः। इह, तादृशवचनश्रवणं विभावः, नयनकोणगतशोणरुचिनाशाभिव्यक्तः प्रसादः, अनुभावः। अनयोर्विभावानुभावयोरुत्पत्तिकालावच्छिन्नो रोषनाशोऽत्र व्यङ्ग्यः।

( २ ) भावोदयः भावस्योत्पत्तिः । यथा—

वीक्ष्य वक्षसि विपक्षकामिनीहारलक्ष्म दयितस्य भामिनी ।
अंसदेशवलयीकृतां क्षणादाचकर्ष निजबाहुवल्लरीम् ॥

अत्र रोषोदयो व्यङ्ग्यः । यद्यपि भावशान्त्यां भावान्तरोदयस्य, भावोदये च पूर्वं भावशान्तेरावश्यकत्वान्नानयोर्विविक्तो व्यवहारस्य विषयः, तथापि द्वयोरेकत्र चमत्कारविरहात् ( चमत्काराधीनत्वाच्च विषयस्य ) अस्ति विषयविभागः ।

( ३ ) भावसन्धिरन्योन्यानभिभूतयोः—अन्योन्याभिभवनयोग्ययोः सामानाधिकरण्यम् । यथा—वयःसन्धिमारूढाया अनूढायाः सीताया रामचन्द्रे, प्रथमदृक्पातं वर्णयति कविः—

यौवनोद्गमनितान्तशङ्किताः, शीलशौर्यबलकान्तिलोभिताः ।
सङ्कुचन्ति विकसन्ति राघवे जानकीनयननीरजश्रियः ॥

अत्र भगवद्दाशरथिगतस्य लोकोत्तरयौवनोद्गमस्य, तादृशस्यैव शीलशौर्यादेश्च दर्शन—विभावः । नयनगतसंकोचविकासौ—अनुभावः । व्रीडौत्सुक्ययोः—सन्धिर्व्यङ्ग्यः ।

( ४ ) भावशबलत्वं—भावानां बाध्यबाधकमापन्नानामुदासीनानां वा व्यामिश्रणम् । यथा—( यथा ) सीतां विवास्य, अनुशयानः श्रीरामश्चिन्तयति—

पापं हन्त मया हतेन विहितं ( तत् सीतानिर्वासनरूपम् )
सीतापि यद् यापिता ( निर्वासिता )
सा मामिन्दुमुखी, विना, बत वने किं जीवितं धास्यति ?
आलोकेय कथं मुखानि कृतिनां, किं ते वदिष्यन्ति मां
राज्यं यातु रसातलं पुनरिदं, न प्राणितुं कामये ॥

अत्र मत्यसूयाविषादस्मृतिवितर्कव्रीडाशङ्कानिर्वेदानां ( यथा 'पापमि'त्यादिना व्यज्यमानाया मतेः, 'हतेने'त्यादिना स्वविषयकासूयायाः, 'सीताऽपी'त्यादिना विषादस्य, 'से'त्यनेन स्मृतेः । 'मामिन्दुमुखी' इत्यादिना व्यज्यमानस्य वितर्कस्य, 'आलोकेये'त्यादिना व्रीडायाः, 'किं ते' इत्यादिना शङ्कायाः, 'राज्यम्' इत्यादिना निर्वेदस्य ) शबलता = एकमहावाक्यजवैयञ्जनिकचमत्कृतिज्ञानगोचरत्वम् ।

यत्तु काव्यप्रकाशटीकाकारैः—'उत्तरोत्तरेण भावेन पूर्वपूर्वभावोपमर्दः शबलता' इत्यभ्यधीयत, तत्र ।

'पश्येत् कश्चिच्चल, चपल रे, का त्वराऽहं कुमारी
हस्तालम्बं वितर हहहा व्युत्क्रमः क्वासि यासि ।
इत्थं पृथ्वीपरिवृढ, भवद्विद्विषोऽरण्यवृत्तेः
कन्या काचित् फलकिसलयान्याददानाभिधत्ते ॥'

इत्यत्र शङ्कासूयाधृतिस्मृतिश्रमदैन्यमत्यौत्सुक्यानामुपमर्दलेशशून्यत्वेपि, शबलताया राजस्तुतिगुणत्वेन पञ्चमोल्लासे— मूलकृतैव निरूपणात् । ( भावशबलतालङ्कारस्य च प्रकारान्तरेण स्वीकरणात् । )

स्वोत्तरविशेषगुणेन जायमानस्तु नाशो न व्यङ्ग्यः, न वोपमर्दपदवाच्यः ( उपमर्दः—अभिभवः ) नापि चमत्कारी । तस्मात्—

नारिकेलजल–क्षीर–सिताकदलमिश्रणे ।
विलक्षणो यथाऽऽस्वादो भावानां संहतौ तथा ॥

यथा तादृङ्मिश्रणे, एकेन वस्तुना वस्त्वन्तरास्वादस्योपमर्दो न क्रियते किन्त्वास्वादवैलक्षण्यमेव विधीयते तथैव, भावानां शबलत्वरूपसंहतावपि नोपमर्दः, किन्त्वास्वादवैलक्षण्यमेवेत्यर्थः ।

अत्रेदं बोध्यम्—य एते भावशान्त्युदयसन्धिशबलताध्वनयः ( चत्वारः ) उदाहृताः, तेऽपि भावध्वनय एव । यतो विद्यमानावस्थापन्नत्वेनास्वाद्यमानेषु भावेषु ( भावध्वनिषु ) यथा, भावानामेव ( धर्मिणां ) प्राधान्यं न तु विद्यमानावस्थापन्नत्वस्य ( धर्मविशेषस्य ) । तथैव भावोदयादिध्वनिषु, उत्पत्त्यवच्छिन्नत्व–विनश्यदवस्थत्व–संधीयमानत्व–परस्परसमानाधिकरणत्वरूपैः प्रकारैः ( विशेषणीभूतधर्मैः ) विशिष्टानां भावानामेव ( विशेष्यभूतानां धर्मिणां ) प्राधान्यम् । यतश्चमत्कृतेः तत्रैव विश्रान्तिर्भवति, न तूत्पत्त्याद्यवस्थापन्नत्वादिषु धर्मेषु । इत्थं, स्थितौ ( विद्यमानावस्थायां ) भावानां प्राधान्यस्य क्लृप्तत्वाद्, भावशान्त्यादिदशाविशेषेष्वपि भावानां प्राधान्यं कल्पनीयम्, यतः—

पण्डितराजमते, उदयादेर्वाच्यत्वेऽपि । यथा—

'उषसि प्रतिपक्षनायिका–सदनादन्तिकमञ्चति प्रिये ।
सुदृशीनयनाब्जकोणयोरुदियाय त्वरयाऽरुणद्युतिः ॥"

इत्यादौ उत्पूर्वकेन 'इण् गतौ' इति धातुनाऽभिहितस्यामर्षोदयस्य वाच्यत्वे

सत्यपि ) उदयाद्यवच्छिन्नो भावस्तु ( अमर्षादिः ) अवाच्यः (प्रधानः) एव भवति, अत एव भावोदयध्वनिव्यवहारो युक्तितरीभवति। भावध्वनेः—भावशान्त्यादिध्वनिष्वयं विशेषः—भावध्वनौ, विद्यमानावस्थापन्नत्वविशिष्टेनामर्षत्वादिनाऽमर्षादीनामेव भानम्, भावशान्त्यादिध्वनिषु तु प्रशाम्यदवस्थापन्नत्वादिविशिष्टेनामर्षत्वादिनाऽमर्षादीनां भानं भवति। अर्थाद् भावध्वनौ भावकृतचमत्कारस्यैव चर्वणा भावशान्त्यादिषु च भावैः सह तत्प्रशमादिकृतचमत्कृतेरपि चर्वणा जायते। वस्तुतस्तु एते भावध्वनय एव।

## भावध्वनिः

अथ किं भावत्वं? विभावानुभावभिन्नत्वे सति रसव्यञ्जकत्वमिति चेन्न। 'अर्थादि-रसमयकाव्यवाक्यस्यार्थद्वारा व्यञ्जकत्वात्तस्मिन्नपि भावत्वमतिव्याप्स्यति। 'अर्थादिद्वारेण विनैव, विभावानुभावभिन्नत्वे सति रसव्यञ्जकत्वमि'ति लक्षणमपि न युक्तम्। स्वयं भावा अपि भावनाद्वारेण ( पुनःपुनरनुसंधानात्मकेन ) व्यञ्जकतां यान्ति। इत्थं लक्षणमेवासंभवदोषग्रस्तं भविष्यति। पुनश्च भावनायामपि लक्षणस्यातिव्याप्तिर्जनिष्यते यतो भावना द्वारान्तरनिरपेक्षत्वेन रसस्य व्यञ्जिका भवति। अतएव विभावानुभावभिन्नत्वेऽपि लक्षणे समाविष्टे सति भावनायामतिव्याप्तिः स्याद्। भावेषु च प्रधानतया भावो ध्वन्यते न रसः। अतो रसव्यञ्जकत्वमिति लक्षणांशो दुष्टः। तथा सति, भावे लक्षणस्याव्याप्तिर्भविष्यति। भावध्वनौ, भावचमत्कार-प्रकर्षः। रसस्तु तत्र व्यज्यमानोऽप्यचमत्कारित्वान्न ध्वनिव्यपदेशहेतुः। प्राधान्येन ध्वन्यमानस्य भावस्य प्रान्ते रसाभिव्यञ्जकत्वे स्वीकृतेऽपि देशकालवयोऽवस्थादिनानापदार्थघटिते पद्यवाक्यार्थे तथाप्यतिव्याप्तिः, तस्य विभावानुभावभिन्नत्वे सति रसाभिव्यञ्जकत्वात्।

नापि रसाभिव्यञ्जकचर्वणाविषयचित्तवृत्तित्वं भावत्वमिति भावलक्षणं वाच्यम्।

> 'कालागुरुद्रवं सा हालाहलवद् विजानती नितराम्।
> अपि नीलोत्पलमालां बाला व्यालावलिं किलामनुते॥'

इत्यत्र हालाहलसदृशत्वप्रकारज्ञानेऽतिव्याप्तेः, तस्य विप्रलम्भानुभावत्वेन रसाभिव्यञ्जकचर्वणाविषयत्वादपि, चित्तवृत्तित्वादपि च।

इत्थं परकीयलक्षणानि प्रतिक्षिप्य स्वकीयं लक्षणमुपक्षिपति पण्डितराजः—

'विभावादिव्यज्यमान-हर्षाद्यन्यतमत्वं' भावत्वम्। यथाहुः प्राञ्चः—'व्यभिचार्यञ्जितो भावः' इति। स्थायिभावानां तुल्यतया हर्षादीनां भावानामपि सामाजिकगतानामेवाभिव्यक्तिः, न तु नायकादिगतानाम्।

प्रकरणादिवशात् यदि कश्चिद्भावः प्राधान्यमुपयाति तदा तत्सामग्रीव्यङ्ग्यत्वेन गौणतामावहन् कश्चिदन्यो व्यभिचार्यपि प्रधानभावस्याङ्गं भवितुं शक्नोतीति विभावानुभावाविव व्यभिचार्यन्तरस्यापि व्यञ्जकत्वमभ्युपेयम्। यथा गर्वादावमर्षस्य, अमर्षादौ च गर्वस्य। न चैवं सति गूणीभूतव्यङ्ग्यत्वापत्तिः, पृथग्विभावानुभावव्यक्तस्यैव भावस्य गुणीभूतव्यङ्ग्यत्वव्यपदेशः। इति।—

पण्डितराजमते भावध्वनयश्चतुस्त्रिंशत्। तत्र दृष्टान्तरूपेण, स्मृतिध्वनिर्यथा—

तन्मञ्जु मन्दहसितं श्वसितानि तानि
सा वै कलङ्कविधुरा मधुराननश्रीः।
अद्यापि मे हृदयमुन्मदयन्ति हन्त,
सायन्तनाम्बुजसहोदरलोचनायाः॥

चिन्ताविशेषोऽत्र विभावः, भ्रून्नतिगात्रनिश्चलत्वादय आक्षेपगम्या अनुभावाः। विभावानुभावाभिव्यक्तः स्मृति-भावोऽत्र व्यङ्ग्यः।

यद्यप्यत्र नायिकारूपस्य विभावस्य, हन्तपदगम्यस्य हृदयवैकल्यरूपानुभावस्य स्मृतिसंचारिणश्च संयोगाद् विप्रलम्भरसाभिव्यक्तौ रसध्वनित्वमपि शक्यते वदितुं, तथापि स्मृतेरेवात्र चमत्कारित्वात्स्मृतिध्वनित्वमुक्तम्।

## रसभावादीनां संलक्ष्यक्रमत्वम्

रसादिध्वनेरसंलक्ष्यक्रमत्वं यद्यपि प्राचीननवीनोभयसंमतं तथापि तयोरेतत्संबंधेऽयमस्ति मतभेदो यत्प्राचीनै रसादिध्वनेरसंलक्ष्यक्रमत्वमात्रमङ्गीक्रियते, नवीनैस्तु ( पण्डितराजादिभिः ) क्वचित्संलक्ष्यक्रमत्वमपि। यत्र प्रकरणस्य स्फुटत्वे झगिति प्रतीतेषु ( सत्वरमवसितेषु ) विभावादिषु सहृदयतमेन प्रमात्रा सूक्ष्मेणैव समयेन रसादिलक्षणो व्यङ्ग्योऽवगम्यते, तत्र हेतुहेतुमतोः ( कारणकार्ययोः ) पौर्वापर्यक्रमस्यालक्षणाल्लक्ष्यक्रमो व्यपदिश्यते। किन्तु यत्र तु विचारवेद्यं प्रकरणं

विभावादयश्चोन्नेयाः सन्ति तत्र कारणस्य ( प्रकरणविभावादिप्रत्ययस्य ) विलम्बेन कार्यस्य ( रसादिप्रत्ययस्य ) मान्थर्यमिति तादृशस्थले रसादिध्वनेः संलक्ष्यक्रमतापि दुर्वारा, इष्टा च। न खलु सर्वत्र रसादिध्वनेरलक्ष्यक्रमव्यङ्ग्यत्वं धर्मिग्राहकमानसिद्धम्। यथा 'तल्पगतापि सुतनुः' इतिपद्ये 'संप्रति' इत्येतदर्थावगतिर्विलम्बेन भवति। यथा च 'एवं वादिनि देवर्षौ' इति कुमारसंभवपद्यस्य विषये स्वयं ध्वनिकारा आहुः—'अत्र कुमारीस्वाभाव्यादपि, अधोमुखत्वविशिष्टस्य लीलाकमलपत्रगणनस्योपपत्त्या मनाग्विलम्बेन नारदकृतविवाहादिप्रसङ्गविज्ञानोत्तरं व्रीडायाश्चमत्कारणाल्लक्ष्यक्रमोऽयं ध्वनिः। इत्थमेवाभिनवगुप्ताचार्यैरपि प्रोक्तम्—"रसभावादिरर्थो ध्वन्यमान एव न वाच्यस्तथापि न सर्वोऽलक्ष्यक्रमस्य विषयः।

अथ यदि रसादिः संलक्ष्यक्रमः स्यात्तदाऽर्थमूलकध्वनीनां गणनप्रस्तावे 'अर्थशक्तिमूलस्य द्वादश भेदाः' इत्यभिनवगुप्तोक्तिः 'तेनायं द्वादशात्मकः' इति मम्मटोक्तिश्च न संगच्छेत। यतो हि वस्त्वलङ्कारात्मना द्विविधेन, स्वतःसंभवित्व—कविप्रौढोक्तिनिष्पन्नत्व—कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नत्वैस्त्रिभिरुपाधिभिः त्रैविध्यमापाद्य षडात्मना सता यथा वस्त्वलङ्कारयोरभिव्यक्तिः क्रियते तथैव रसादेरपि करिष्यते, भेदानाञ्चेत्थम्, अष्टादशत्वं संपत्स्यते।

एवं चेत्तर्हि पूर्वोक्तस्थलेऽभिनवगुप्तस्य भावोऽयं बोधनीयो यत्तत्राभिनवगुप्तेन रत्यादिवस्तु प्रतिपाद्यते। संलक्ष्यक्रमतया व्यज्यमानं रत्यादिवस्त्वेव न तु रसादिव्यङ्ग्यमिति बोध्यं येन, रत्यादिवस्तुनो वस्तुव्यङ्ग्ये सन्निवेशाद् द्वादशभेदा एव संगच्छेरन्।

टिप्पणी—चन्द्रिकाटीकाया भाषाकारोऽत्र यल्लिखति तदवधेयम्—

'यदि संलक्ष्यक्रमदशायां रसेन रतिवस्तु बोध्यमिति प्रोच्याभिनवगुप्तोक्तिविरोधपरिहारोऽन्विष्यते पण्डितराजैस्तदा कथं तेषां मतं पुष्टिं लभते। तद्दशायां तु ध्वन्यालोचनकारस्य मतं रसादानामलक्ष्यक्रमताया एव पक्षं पुष्णाति। पुनश्च ध्वनिकारस्य नाम्ना 'कुमारीस्वाभाव्यादि'त्यादि यदुक्तं तन्नाप्यते तद्रूपेण ध्वन्यालोके। प्रत्युत स्वयं ध्वनिकारः पार्वत्याः शिवविषयकरतेः प्रधानीभूतत्वं निराकुर्वन् लज्जावस्तु संलक्ष्यक्रमतया व्यज्यमानमभिदधाति, येन प्रतीयते यद्रसादिध्वनिं नासौ संलक्ष्यक्रमं मन्यतेऽपि तु वस्तुध्वनिमेव।

अत्र नागेशभट्टाः 'क्रमज्ञाने सति रत्यादेः प्रतीतिदशायां विभावादीनामपि प्रतीत्यापत्तेः, रसस्य विगलितवेद्यान्तरता क्षतिं यास्यति। रसस्य विगलितवेद्यान्तरत्वमेव च सकलसहृदयानुभवसाक्षिकम्' इति प्रतिपाद्य संलक्ष्यक्रमतासिद्धान्तमवमन्यन्ते।

नव्यास्तु—'तल्पगतापि च सुतनुः' इत्यादिपद्ये, प्रकरणादिज्ञानविलम्बेन विभावादिज्ञानविलम्बेऽपि रतिस्थायिनोऽसंलक्ष्यक्रमत्वमक्षतमेव। न हि प्रकरणादिज्ञानस्य तज्जन्यविभावादिज्ञानस्य च क्रममादाय, असंलक्ष्यक्रमत्वमिष्यतेऽपि तु विभावादिज्ञानस्य तज्जन्यस्य रसस्य च क्रममादाय। एतदेवाभिप्रेत्याभिनवगुप्तः प्राह—'अर्थशक्तिमूलस्य द्वादश भेदाः।' पुनश्च यत्किञ्चिद्वाच्यार्थापेक्षया क्रमोऽपि गृह्यते, इत्यभिप्रेत्य स आह—'तथापि न सर्वोऽलक्ष्यक्रमस्य विषयः। इत्थं नास्ति कश्चिद्विरोधः' इत्याचक्षते।

## पदवाक्यरचनादीनां व्यञ्जकत्वम्

पण्डितराजमते 'वर्णरचनाविशेषादीनामस्ति गुणाभिव्यञ्जकत्वं, गौरवान्मानाभावाच्च। नच, 'यदि वर्णादिषु माधुर्यादिव्यञ्जकतास्ति तर्हि माधुर्यादिगुणाश्रयरसानामपि व्यञ्जकता भविष्यतीति वाच्यम्। यतो हि गुणाभिव्यञ्जकाः पदार्थास्तदाश्रयव्यञ्जका भवेयुरेवेति नास्ति नियमः। यथा घ्राणेन्द्रियं गन्धस्य व्यञ्जकं न तु गन्धाश्रयीभूतायाः पृथिव्याः।

किन्तु यथा, कुत्रचिद् गुणानां गुणिनां मिथोऽसंबद्धत्वेन कदाचिच्च मिथोऽसंबद्धत्वेन, ज्ञानेन्द्रियैः पृथिव्यादीनां गुणिनां गन्धादीनां गुणानाम्, उदासीनानाञ्च पदार्थानां प्रमितिगोचरता स्यात्तथैव स्वस्वव्यञ्जकैर्वर्णैः कदाचिन्मिलितत्वेन, कदाचिच्च पार्थक्येन रसानां तद्गुणानाञ्चाभिव्यक्तिविषयता भवतीति नव्याः ( पण्डितराजादयः ) वदन्ति, नवीनैस्तु वर्णादीनां माधुर्यादिगुणमात्रव्यञ्जकताऽङ्गीक्रियते। रसादिव्यञ्जकता तु गौरवाद् मानाभावाच्च निराक्रियत इति भावः।

( १ ) रचनाया इत्यादौ गुणव्यञ्जकता-यथा 'तं तमालतरुकान्तिलङ्घिनीम्' इत्यादौ। ( २ ) वाक्यस्य रसव्यञ्जकता—'आविर्भूता यदवधि' इत्यादौ। ( ३ ) प्रबन्धस्य यथा योगवाशिष्ठे रामायणे च शान्तकरुणयोः, रत्नावल्यादौ

शृङ्गारस्याभिव्यक्तिः । ( ४ ) प्रबन्धस्य भावव्यञ्जकता—यथा पण्डितराजनिर्मिताः पञ्च लहर्यः । ( ५ ) पदावयवस्य यथा—'निखिलमिदं जगदण्डकं वहामि' इत्यत्र करूप-तद्धितस्य । ( ६ ) अवर्णात्मकरागादीनां यथा 'अ अ अ अ' इत्यादिरागादिभिरपि रसो व्यज्यते यस्मिन् सहृदयहृदयमस्ति प्रमाणम् ।

## शब्दशक्तिमूलकध्वनिविषये पंडितराजस्य सिद्धान्तः

योगरूढस्य शब्दस्य योगे रूढ्या नियन्त्रिते ।
धियं योगस्पृशोऽर्थस्य या सूते व्यञ्जनैव सा ॥

इत्येतदेव शब्दशक्तिमूलध्वनेर्लक्षणं रमणीयमिति पंडितराजस्य सिद्धान्तः । अभिधाशक्तिस्त्रिविधास्ति ।—

( १ ) केवलसमुदायशक्तिः—यस्या डित्थादिकमुदाहरणम् , तत्रावयवशक्तेर-भावात् । ( २ ) केवलावयवशक्तिः—यस्याः पाचकपाठकादिरुदाहरणम्—तत्र धातुप्रत्ययशक्तिबोध्ययोरर्थयोरन्वयेनोल्लासितात् पाककर्तृरूपादर्थादृतेऽर्थान्तरस्या-नवभासेन समुदायशक्तेरभावात् ।

( ३ ) समुदायावयवशक्तिसंकरश्चेति—यस्याः पङ्कजादिरुदाहरणम् , तत्र धातूपपदप्रत्ययरूपावयवशक्तिवेद्यानां पङ्कजननकर्तृणाम्—काङ्क्षादिवशाद् , अन्वये प्रकाशमानात् पङ्कजनिकर्तृरूपादर्थादतिरिक्तस्य, पद्मत्वविशिष्टस्य प्रत्ययेन, तदर्थे ( तत्प्रत्ययार्थ = तादृशज्ञानार्थं ) समुदायशक्तेरपि कल्पनादुभयोः सङ्करः ।

एता एव विधा रूढि-योग-योगरूढिशब्दैर्व्यपदिश्यन्ते । ( केचित्तु—'अश्व-गन्धा-निशान्त-मण्डपादिशब्देषु, पूर्वोक्तप्रकारत्रयस्याप्यसंगमनाच्चतुर्थमपि यौगिक-रूढिनामधेयं प्रकारमिच्छन्ति । किन्तु नास्त्यत्र तस्य प्रसङ्गः । ) अस्तु, पंडित-राजमते यत्र योगरूढिस्थले, रूढिज्ञानेन योगज्ञानस्यापहरणं क्रियते तत्र शब्दशक्ति-मूलध्वनेरावश्यकता, अर्थान्तरस्य प्रतीत्यर्थं समुदेति । यथा—

अबलानां श्रियं हृत्वा वारिवाहैः सहानिशम् ।
तिष्ठन्ति चपला यत्र स कालः समुपस्थितः ॥

चपलाः—विद्युतो वारिवाहैः = मेघैः सह, अबलानां = नायिकानां श्रियं = शोभां हृत्वा = अपहृत्य, यत्र = यस्मिन् काले, अनिशं—सततं तिष्ठन्ति, स कालः-

वर्षासमयः, समुपस्थितः—समागतः । इति वाच्योऽर्थः । किन्तु, चपलाः=पुँश्चल्यः अबलानाम्—अशक्तानां श्रियं हृत्वा=द्रव्यमपहृत्य वारिवाहैः—जलवाहकैः क्षुद्रैः (शारीरिकदृष्ट्या तु हृष्टपुष्टैरिति यावत्) पुरुषैः यत्र अनिशं—सततं तिष्ठन्ति—रमन्ते स कलियुगः समुपस्थितः—समायातः ।' इत्यर्थान्तरमपि प्रतीयते । अयं द्वितीयोऽर्थः, योगरूढिसाहाय्येन, अबला-वारिवाह-चपलाशब्दैर्न बोधयितुं शक्यते यतस्तस्य प्रतीतिस्तु, नायिकात्व-मेघत्व-विद्युत्त्वादिभिरघटितैव भवति (अन्यथा चमत्कारो न स्यात् ।)

पुनश्च यदि कश्चित्कथयेत्—'नास्तु सा प्रतीतिर्योगरूढिसाहाय्येन, किन्तु योगशक्त्याः साहाय्येन संभवत्येवेति, तदपि नास्ति संगतम् । योगशक्तिस्तु तावदेवार्थबोधनक्षमा भवति यावदेषा रूढ्यर्थेनामिश्रिता स्यात् । अत्र तु (अबला-वारिवाहादिषु) सा रूढ्यर्थेन संवलितास्ति ।

ननु फलबलात् (द्वितीयार्थस्यानुभवसिद्धत्वात्) तथा कल्प्यते' इति चेन्न । वारिवाहादिभ्यो योगरूढ्यादिभ्यः शब्देभ्यः केवल्योगार्थबोधस्वीकारेपि न प्रकृते, इष्टसिद्धिः । योगशक्तिसाहाय्येनापि चपलादिशब्दैः पुँश्चलीत्वादीनामलम्भात् (अप्राप्तेः) । पण्डितराजशब्देषु—

"पुँश्चलीत्वादेः सर्वथैव तदविषयत्वात्" ।

एवञ्चैतादृशेषु स्थलेषु शब्दशक्तिमूलव्यंजनास्वीकार आवश्यकः, अन्यथाऽनिस्तारादिति ग्रन्थकारस्य हृदयम् ।

एवमेव :—

चाञ्चल्ययोगि नयनं तव, जलजानां श्रियं हरतु ।
विपिनेऽतिचञ्चलानामपि च मृगाणां कथं हरति ॥

अत्र जलजपदे डलयोरैक्यान्मूर्खरूपार्थस्य लाभः । 'नयतीति' नयनमिति व्युत्पत्त्या चौररूपार्थस्य, मृगयन्तीति मृगा इति व्युत्पत्त्या गवेषकरूपार्थस्य लाभः । इत्थं, वाच्यार्थे पर्यवसन्नेपि, जलज-नयन मृगशब्देभ्यः प्रतीयमानो द्वितीयोऽर्थः ('मूर्खपुत्राणां चौराद्यैर्धनहरणं सुशकम् न तु गवेषकाणां सावधानानामप्रमत्तानामिति यावत्' इति स्वरूपः) व्यञ्जनाव्यापारेणैवोपपादयितुं शक्यते । रूढिनिर्मुक्तकेवलयोगमर्यादाया विषय एवायं नास्ति ।

प्रमाणानि :—योगरूढिस्थले केवलयोगशक्त्याऽर्थान्तरस्य प्रतीतिं कश्चिदपि न मन्यते ।

( १ ) पङ्कजादिशब्देषु योगरूढेषु, कुमुदादीनामुपस्थितिर्लक्षणयैव भवति, इति नैयायिका मन्यन्ते ।

( २ ) 'ईशानो भूतभव्यस्य स एवाद्य स ईश्वरः' इति वेदान्तवाक्ये 'किमैश्वर्यविशिष्टः कश्चिज्जीवोऽत्र प्रतिपाद्यते उतेश्वर' इति संशये, जीव एव' ( अङ्गुष्ठपरिमाणस्य लिङ्गस्य ब्रह्मण्यसंभवात् ) इति पूर्वपक्षे सति, भगवान् बादरायणः सिद्धान्तार्थे 'शब्दादेव प्रमितुः' इति सूत्रं व्यरचयत् । तस्यायमाशयः—'परमात्मैवात्र प्रतिपाद्यः' इति प्रमितम् । कुतः ?–शब्दादेव—ईशानशब्दादेवेति भावः । ईशानशब्दः परमात्मनि योगरूढः । अतः केवलयोगमर्यादया, ततः ( शब्दात् ), ऐश्वर्यविशिष्टस्य जीवस्य बोधो न स्यात् , रूढेर्योगापहारित्वात् ।

निष्कर्षः—तस्मादर्थान्तरमिह न शक्तिवेद्यम् , अपितु व्यक्तिवेद्यमेव । अत्र च लक्षणयापीष्टसिद्धिर्न संभवति यतः सा 'मुख्यार्थबाधे' जायते । मुख्यार्थश्च ( वाच्यार्थश्च ) अत्र कामपि बाधां न प्राप्नोति ।

## शब्दशक्तिमूलध्वनेर्विषये प्राक्तनानां सिद्धान्तस्योपहासः

पण्डितराजमते—

"अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ॥"

इति सिद्धान्तानुसारी, व्यञ्जनया नानार्थस्थलेऽप्रकृतार्थबोधप्रपञ्चः प्राचामविचाररमणीयः । अस्य सिद्धान्तस्य सारः, कार्श्यं च संक्षेपतोऽधस्ताद् वर्ण्यते—

'सुरभि मांसं भक्षयती'त्यादौ प्रकरणादिकमनुसृत्य शक्त्या ( अभिधया ) सुगन्धितार्थस्योपस्थितावपि गवाद्युपस्थितेरभावात् गवादिविषयकोऽन्वयो न भवितुं शक्नोति । भवति स चेति तदुपस्थितिर्व्यञ्जनया स्वीकरणीया । ननु नानार्थरूपितां नानाशक्तिं स्वीकृत्य, एकया प्राकरणिकार्थस्योपस्थितौ सत्यां, द्वितीययाऽप्राकरणिकस्यार्थस्योपस्थितिः कथं नेति चेन्न, प्रकरणादिज्ञानस्य प्रतिबन्धकत्वात् । इदं प्रकरणादिज्ञानं व्यक्तिजन्यामप्राकरणिकोपस्थितिं प्रति प्रतिबन्धकं नैव भवितुमर्हति,

व्यक्तिज्ञानस्योत्तेजकत्वात् । ननु प्राकरणिकार्थज्ञानानन्तरं तादृशपदज्ञानस्यो-परमत्वात् कथं व्यञ्जनयापि अप्राकरणिकार्थबुद्धिरिति चेन्न । व्यर्थप्रतीतौ शक्यता-वच्छेदकस्येव ( अर्थगतधर्मस्येव ) पदस्यापि विशेषणतया भानात् । इत्थं नानार्थक-शब्दस्थले एकस्यार्थस्याभिधया बोधेपि द्वितीयोऽर्थो व्यञ्जनयैव बोध्यते ।

नवीना नानार्थकशब्दस्थले शक्त्यैव प्राकरणिकाप्राकरणिकानां सर्वेषामर्था-नामन्वयबोधं मन्यन्ते । प्रकरणादिज्ञानैर्निश्चयस्यापरार्थोपस्थितौ प्रतिबन्धकत्वं न वक्तुं शक्यम्, संस्कारतदुद्बोधकयोः सत्त्वे स्मृतिः कदापि प्रतिबद्धा न भवितुमर्हति । ननु यत्र 'जैमनीयमलं धत्ते रसनायामयं द्विजः' इत्यादौ जुगुप्सितोऽर्थो वह्निसेक-करण इव, अबोधोपहतः तत्र व्यक्तेर्बाधितार्थबोधकत्वं धर्मिग्राहकमानसिद्धमिति चेन्न ।

'गामवतीर्णा सत्यं सारस्वतीयं पतञ्जलिव्याजात्', 'सौधानां नगरस्यास्य मिलन्त्यर्केण मौलयः' इत्यादौ वाच्यार्थान्वयोपपादनायानुसरणीयेन यत्नेन ( आहार्ययोग्यताज्ञानस्वीकारेण ) नानार्थस्थलेपि बाधितार्थबोधस्योपपत्तिः स्यात् ।

अन्यथा प्रायः सर्वेष्वलङ्कारेषु वाच्यार्थान्वयबोधोपपत्तये व्यञ्जनाऽङ्गीकरणीया भवेत् । अतोऽयं प्राचां सिद्धान्तोऽविचाररमणीयः । इति ।

## उपमाया निरूपणम्

साहश्यं सुन्दरं वाक्यार्थोपस्कारम्—उपमालङ्कृतिः । यस्मिन् रमणीये सादृश्ये-ऽभिहिते सति वाक्यार्थः, स्फुटतया कामप्युज्ज्वलताम् आधत्ते तत् सादृश्यमेव, उपमालङ्कारतया व्यपदिश्यत इति भावः ।

अस्मिन् लक्षणे 'सुन्दरम्' इति पदं सर्वाधिकं महत्त्वपूर्णमस्ति । यदि तन्न स्यात् तदा रूपक-दृष्टान्तादिषु लक्षणं प्रसज्येत । यतः ( १ ) रूपकापह्नुति-परिणाम-भ्रान्तिमदुल्लेखादिषु, अभेदगर्भं सादृश्यं भवति । ( २ ) दृष्टान्त-प्रतिवस्तूपमा-दीपक-तुल्ययोगितादिषु च भेदगर्भम् । उभयत्रापि वाक्यार्थोपस्कारकं सादृश्यमस्त्येव । किन्तु लक्षणे सादृश्यस्य विशेषणं 'सुन्दरं' तेषु लक्षणस्य प्रसक्तिं वारयति यतस्तत्रत्यं सादृश्यं चमत्काराधायकं नास्ति किन्तु रूपणदृष्टान्तीकरणादीनि एव चमत्काराधा-

युक्तानि सन्ति। पण्डितराजस्य व्याख्यानुसारेण सौन्दर्यं = चमत्कृत्याधायकत्वं, चमत्कृतिश्च = आनन्दविशेषः सहृदयहृदयप्रमाणकः।

एवमेव सुन्दरपदग्रहणेन, अनन्वयव्यतिरेकयोर्लक्षणस्य प्रसक्तिः वार्यते।

(१) 'गगनं गगनाकारम्' इत्यादौ सादृश्यं चमत्काराधायकं नास्ति। द्वितीयसब्रह्मचारिनिवर्तनमात्रार्थं, वर्णितमपि सादृश्यं तात्पर्यविषयतां नालम्बते। अनन्वयस्य नामकरणमपि प्रकटयति यत्तत्र सादृश्यं तात्पर्याविषयतया, प्रधानवाक्यार्थेऽन्वयं न लभते। एवञ्च तस्याचमत्काराधायकत्वं स्पष्टमेव।

•(२) 'तवाननस्य तुलनां दधातु जलजं कथम्' इत्यादौ व्यतिरेके निषेध एव चमत्कारी। सादृश्यं तु निषेधप्रतियोगितयोपात्तमपि, अप्रधानं सदचमत्काराधायकमेव।

(ख) मुखमिव चन्द्र इति प्रतीपे, चन्द्र इव मुखं मुखमिव चन्द्र इति उपमेयोपमायाञ्च सादृश्यस्य चमत्काराधायकत्वान्नातिप्रसङ्गः शङ्कनीयः, यतः पण्डितराजमतानुसारेण तयोरुपमात्वमेवेष्यते। प्रतीपादिनामकरणं तु प्राचीनमतानुसारेण। वस्तुतस्तु तत्रोपमैवेति सारांशः। अतएव स्वप्रसंगप्राप्तामुपमेयोपमामवतारयन् पंडितराजो ब्रूते—

"अथास्या एव भेद उपमेयोपमा निरूप्यते" इति (पृ० ३५६)

अत्र नागेशाः—'यत्र स्वसादृश्यबुद्धिकृतः चमत्कारस्तत्रैवोपमा। अनन्वये तु न स्वसादृश्यबुद्धिकृतः किन्तु निरुपमत्वबुद्धिकृतः— इति नोपमात्वम्। तथैव उपमेयोपमायामपि न परस्परसादृश्यबुद्धिकृतः, अपितु 'अनयोरेव साम्यं 'न तृतीय एतत्सदृशः' इति बुद्धिकृतः। अतो नास्ति तस्या अपि उपमात्वम्। 'अहमेव गुरुः' इति प्रतीपेऽपि उपमानतिरस्कृतत्वकृत एव चमत्कारो न तु सादृश्य-बुद्धिकृतः इति नास्ति प्रतीपस्याप्युपमात्वम्। अलङ्कारभेदे च चमत्कारनिदानभेद एव निदानम् रूपकोत्प्रेक्षादौ तथा क्लृप्तत्वात् सहृदयानुभवसाक्षिकत्वाच्च' इत्यादिवचनैः पंडितराजमतं, निराकुर्वन्ति।

(ग) लक्षणे निर्दिष्टं सादृश्यं, कल्पितमपि भवितुमर्हति। तथात्वेपि चमत्काराधायकत्वस्य न काचित् क्षतिः। परमसुकुमारीभवता (अतिकोमली-

कृतेन ) सुवर्णेन यस्या अङ्गानि निर्मितानि, सा कान्तापि ( सुवर्णनिर्मिता कान्ता प्रतिकृतिरिति यावत् ) आश्लेषादिभिराह्लादं जनयत्येव। कल्पनयापि अमन्दानन्दः कविनाऽविष्क्रियते। कविः चन्द्रं पावकं च पृथक् पृथक् स्थानादुपादाय स्वेच्छया 'चन्द्राधिकरणमनलं प्रकल्प्य' तादृशमनलं नायिकामुखे, कोपस्योपमानत्वेन वर्णयितुं प्रभवति। तादृशं वर्णनञ्च चमत्काराधायकमेव भविष्यति। यथा—

( १ ) त्वयि कोपो ममाभाति सुधांशाविव पावकः। यथा च—

( २ ) स्तनाभोगे पतन् भाति कपोलात् कुटिलोऽलकः।
शशाङ्कबिम्बतो मेरौ लम्बमान इवोरगः॥ इत्यादि।

लक्षणे, उपमानस्य, उपमेयस्य वा सन्निरूपितत्वं नास्ति। एवं कविकल्पनोत्पादिता अपि पदार्था ग्रहीतुं शक्यन्ते। 'स्तनाभोगे' इत्यादौ उपमानान्तरं नास्तीति प्रतीतिं ये मन्यन्ते तैरपि, उपमात्वनिरासः कर्तुं न युज्यते प्रत्युत विशिष्टोपमात्वमेव स्वीकरणीयम्।

( घ ) कविकल्पनातिरिक्तत्वेन, अपरावपि द्वावुपायौ स्तः यावाश्रित्योपमायां सादृश्यनियोजनं क्रियते कविना—( १ ) बिम्बप्रतिबिम्बभावः ( २ ) वस्तुप्रतिवस्तुभावश्च।

"वस्तुतः भिन्नयोरपि ययोर्द्वयोः पदार्थयोः समानधर्मप्रयुक्तसादृश्यमूलकमभेदाध्यवसानं तयोः बिम्बप्रतिबिम्बभावः।"

वस्तुतो भिन्नेतरयोः ( न भिन्नयोः ) किन्तु आश्रयभेदेन शब्दभेदेन वा भिन्नवत् प्रतीयमानयोश्च ययोर्द्वयोः पदार्थयोर्यत्राभेदाध्यवसानं, तयोर्वस्तुप्रतिवस्तुभावः। यथा—

'भुजो भगवतो भाति, चञ्चंश्चाणूरचूर्णने।
जगन्मण्डलसंहारे वेगवानिव धूर्जटिः'॥

इत्यत्र चाणूरजगन्मण्डलयोर्वस्तुतः भिन्नयोः, महाकायत्वादिना ( हेतुना ) समानधर्मप्रयुक्तसादृश्यमूलकाद् अभेदाध्यवसानाद् बिम्बप्रतिबिम्बभावः। चूर्णनसंहारयोः चाञ्चल्यवेगवत्त्वयोश्चाश्रयभेदाद् भिन्नयोरिव प्रतीयमानयोः ( वस्तुतश्च ) एकरूपयोरभेदाध्यवसानाद् वस्तुप्रतिवस्तुभावः। इत्थं बिम्बप्रतिबिम्ब-वस्तुप्रतिवस्तुभावापन्नसाधारणधर्मस्य सिद्धौ सत्यां सर्वथा भिन्नयोरपि धूर्जटिर्भगवद्भुजयोरुपमानताया उपमेयतायाश्च सिद्धिर्भवति।

(ङ) "कोमलातपशोणाभ्रसंध्याकालसहोदरः ।
काषायवसनो याति कुङ्कुमालेपनो यतिः ॥

अत्र संध्याकालात्मके उपमाने कोमलातपत्वं शोणाभ्रत्वञ्च द्वौ धर्मौ । यत्यात्मके उपमेये च काषायवसनत्वं, कुंकुमालेपनत्वं च । एवं नैकोऽपि धर्मं उभयसाधारणः । अत्र चन्द्रमुखादिवत् लुप्तोपमात्वाङ्गीकारेणापि न कार्यसिद्धिः, यतः—तत्र तु, आह्लादकतादिसाधारणधर्मो ध्यानपथमागन्तुमर्हति, किं त्वत्र कश्चिद्–उभयनिष्ठश्चमत्काराधायकः साधारणधर्मो नैव ध्यानपथमवतरति । तथा सति बिम्बप्रतिबिम्बभावरीत्या, उभयोरपि सन्ध्यायत्योरसाधारणेषु धर्मेषु सत्सु अरुणत्वेन, सादृश्यमूलकमभेदाध्यवसानं विधातुं शक्यते । न च भ्रमेणार्थसिद्धिर्न भवितुं शक्नोतीति वाच्यम् । आहार्यभेदबोधेनापि, अत्यन्तमसन्नभेदश्चमत्काराधायको भवत्येव । 'त्वयि कोपो ममाभाति' इत्यादौ कल्पनामात्रतो यथा निष्पत्तिस्तथैव प्रकृते, साधारणधर्मस्यापि । एवमेव—

"विलसत्याननं तस्या नासाग्रस्थितमौक्तिकम् ।
आलक्षितबुधाश्लेषं, राकेन्दोरिव मण्डलम् ॥"

इत्यत्रापि बुधमौक्तिकयोः ( भिन्नयोरपि ) विद्यमानेन शुभ्रत्वेन आननचन्द्रबिम्बयोः साधारणधर्मनिष्पत्तिः । न तु पूर्वपक्षिमतानुसारेण लुप्तोपमात्वमाश्रित्य सौन्दर्यादेः साधारणधर्मस्य ध्यानपथावतारणं, शोभायाः ( 'विलसति' इति प्रकटितायाः ) च समानधर्मत्वाङ्गीकरणं युक्तम् , यतः उपमेयस्य, उपमानस्य शोभयोरपि असाधारणत्वं भवति, ( लुप्तोपमाश्रयणे च 'कोमलातप' इत्यादिषु पद्येषु कार्यनिष्पत्तिर्न भवति । सामान्यसिद्धान्त एव स्थिरीकर्त्तव्यः ) ।

उदाहरणम्—

गुरुजनभयमद्विलोकनान्तःसमुदयदाकुलभावमावहन्त्याः ।
दलदरविन्दसुन्दरं हा हरिणदृशो नयनं न विस्मरामि ॥

अत्र दलदरविन्दशब्दस्य उपमानवाचकस्य, सुन्दरशब्देन, सामान्यवचनेन समासे ( "उपमानानि सामान्यवचनैः" इति नियमेन ) सति कमलनयनयोरार्थी उपमा, सकलवाक्यार्थस्य विप्रलम्भशृंगारस्य, स्मृतेरुपस्कारणद्वारेण ( स्मृतिनामानं ) संचारिभावमुपस्कृत्य उपस्कारकत्वादलङ्कारपदवीमारोहति ।

टिप्पणी—यत्र वाक्यार्थोपस्कारकता न भविष्यति तत्र केवलमुपमा भविष्यति न तु उपमालङ्कारः। यथा—'स्तनाभोगे पतन् भाति' इत्यादि पद्ये, दीक्षितमत-खण्डनप्रसङ्गे पण्डितराजेन प्रतिपादितमस्ति यदत्र पद्ये उपमामात्रमस्ति न त्वलङ्कारः। यद्यपि तेन स्वयमेव लक्षणविवेचनप्रसङ्गे सा कल्पितोपमालङ्कारत्वेन स्वीकृतास्ति। यदा कदा परमतखण्डनोत्साहे पंडितराजाः स्वोक्तमपि विशाल-हृदयतया खण्डयन्तीत्यवधेयम्। यथा रसादीनां संलक्ष्यक्रमत्वसाधनप्रसङ्गे प्रथमानन-स्याऽन्ते—अभिनवगुप्ताचार्यं स्वमते संस्थाप्यापि, पूर्णविवेचनोपरान्तं विमुखी-कुर्वन्ति।

अन्येषां लक्षणानां खण्डनम्—

(क) साधर्म्यमुपमा—भेदे सति—उपमानोपमेययोर्भेदे सति, (अर्थात् भिन्नपदार्थयोः उपमानोपमेयभावे सति सादृश्यमुपमा) इति काव्यप्रकाशोक्तं लक्षणं नातीव रमणीयम्। यतो हीदं लक्षणं निषेधप्रतियोगिनं व्यतिरेकालङ्कारमति-व्याप्नोति तत्रोभयोः पदार्थयोः भिन्नत्वादेव। पुनश्च, 'यस्य निषेधे पर्यवसानं न भवेत्' तादृशे सादृश्ये, लक्षणघटकतया विवक्षितेऽपि न निस्तारः। तथा सति 'भेदे' इति घटकस्य वैयर्थ्यमापद्यते, ततस्तेनैव घटकेन अनन्वयालङ्कारस्थस्य (यस्य वारणाय 'भेदे' इति पदमपेक्षितमासीत्) निषेधपर्यवसायिनः सादृश्यस्य वारणं जनिष्यते। न च भेदपदस्य, सादृश्यतायाः निषेधापर्यवसितत्वे तात्पर्यग्राहकता स्वीकरणीयेतिवाच्यम् काव्यालङ्कारप्रस्तावे लौकिकालौकिक-प्रधानवाच्यव्यङ्ग्योपमा-सामान्यलक्षणकरणस्य अनौचित्यात्। सुन्दरपदस्यापि लक्षणेऽनिवार्यता स्वीकर-णीया येन यथा गौस्तथा गवय इत्याद्युपमाया उपमालङ्कारप्रस्तावे निरासो भवेत्।

(२) 'भेदाभेदतुल्यस्य साधर्म्यमुपमा' इत्यलङ्कारसर्वस्वोक्तमपि लक्षणं पूर्वोक्त-दोषग्रस्तमेव।

(३) 'प्रसिद्धगुणेन उपमानेन, अप्रसिद्धगुणस्योपमेयस्य सादृश्यमुपमा-इत्यलङ्कार-रत्नाकरोक्तमपि न भव्यम्। श्लेषमूलकायामुपमायां श्लिष्टशब्दस्य या साधारणधर्मता कविकल्पिता भवति तत्र लक्षणस्य अव्याप्तिर्भविष्यति। पुनश्चोपमानं तावत् (चन्द्रादि) क्वापि आह्लादकत्वादिगुणैः प्रसिद्धो न भवति केवलं चन्द्रादि-रूपेणैव प्रसिद्धो भवति। अयं सर्वस्तावत्कविकल्पनाया एव चमत्कारो भवति।

( ख ) अप्पयदीक्षित उपमाया लक्षणद्वयमाहुः—

( १ ) उपमिति-क्रियानिष्पत्तिमत्साहश्यवर्णनम्—अदुष्टम्, अव्यङ्ग्यम्—उपमालङ्कारः ।

( २ ) स्वनिषेधापर्यवसायि साहश्यवर्णनम्—उपमालङ्कारः । तच्चिन्त्यम् । ( १ ) वर्णनं नाम विलक्षणः शब्दराशिः, विलक्षणो ज्ञानसन्दोहो वा । उभयथापि तस्य शब्द-वाच्यता न सम्भवति । एवं स्थितौ तस्य ( वर्णनस्य ) अर्थालङ्कारतैव बाधिता । वर्णनस्य शब्दात्मकत्वकल्पेऽपि ज्ञानात्मकत्वे, ( मानसत्वे ) तस्यालङ्कारताऽभावो दुर्वार एव ।' पुनश्च लक्षणे 'अव्यङ्ग्यम्' इति पदं निरर्थकं यतः तादृशं वर्णनं कदापि व्यङ्ग्यं भवत्येव न । अथ यदि वर्णनविषयीभूतम्—अदुष्टम्-अव्यङ्ग्यम् । साहश्यमुच्यते तदा यथा गौस्तथा गवयः—इत्यत्रापि उपमालङ्कार आपद्यते । इत्थमेव अष्टाध्याय्याः ( १।२।५६ ) सूत्रे 'कालोपसर्जनं तुल्यम्' इत्यत्रापि । ५३ सूत्रात् ( 'तदशिष्यं संज्ञाप्रमाणत्वम्' इत्यस्मात् ) अशिष्यत्वस्य अनुवृत्तिमादाय, ५६ सूत्रात् ( प्रधानप्रत्ययार्थवचनम्-अर्थस्य-अन्यप्रमाणत्वात् इत्यस्मात् ) प्रधानप्रत्ययार्थवचनरूपम्—उपमानमादाय, कालोपसर्जनयोरुपमेयता भवति । यस्यायमर्थः, अतीतायाः रात्र्याः पश्चार्धेन च सहितः कालः ( दिवसः )—अद्यतनः । 'विशेषणमुपसर्जनम्' इत्यादि यत् प्राक्तनैराचार्यैरनुविहितम्-तत्राप्यशिष्यत्वं तुल्यम्, लोकत एव सिद्धेः । अर्थात् प्रत्ययार्थः प्रधानम्—इत्यादि यथा अशिष्यम्, तथा अद्यतनोऽयं कालः विशेषणं चोपसर्जनम् ( अप्रधानं ) भवतीत्यादिकमपि अशिष्यम् ।

अत्र प्रधानप्रत्ययार्थवचनस्य कालोपसर्जनयोश्च अशिष्यत्वरूपसामान्यधर्मेण साहश्यं प्रतिपन्नं भवति । दीक्षितकृतस्य लक्षणस्य 'अदुष्टमि'ति पदं तु तन्निवारयितुं न क्षमम् । वाक्यं विभज्य "कालः प्रधानप्रत्ययार्थवचनेन तुल्यः" 'उपसर्जनं प्रधानप्रत्ययार्थवचनेन तुल्यम्' इत्याकारकेण वाक्यद्वयेन निर्दोषत्वमाप्स्यते ।

न चोक्तस्थलेषु, उपमितिक्रियायाः ( तुलनायाः ) निष्पत्तावपि—उपमायामपेक्षितं साहश्यवर्णनं नास्ति । यतः वर्णनपदस्यार्थः चमत्कारविषयकः कविव्यापारोऽस्ति,—इति वाच्यम् । यदि दीक्षितलक्षणे चमत्कारित्वं साहश्यविशेषणत्वेन निवेश्यते तर्हि 'उपमितिक्रियानिष्पत्तिमत्' इत्यस्य अंशस्य वैयर्थ्यम् । अनिष्पन्नं साहश्यं दूरीकर्तुं, चमत्कारित्वविशेषणमेव समर्थम् ।

( २ ) इत्थं द्वितीयलक्षणेऽपि निषेधापर्यवसायित्वं निरर्थकम्। एतन्निर्देशाभावेऽपि व्यतिरेकानन्वययोः ( ययोः निरासाय विशेषमतन्नियोजितम् ) उपमालक्षणस्य अतिव्याप्तिर्निवारयितुं शक्यते यदि चमत्कारित्वं ( सुन्दरत्वं ) सादृश्यविशेषणत्वेनादीयेत। यतः—एतयोरलङ्कारयोः सादृश्यनिरूपणं निषेधायैव भवति तस्य ( सादृश्यस्य ) प्रधानता चमत्कारित्वं वा न भवति।

ननु दीक्षितलक्षणयोः—'उपमितिक्रियानिष्पत्तिमत्' 'स्वनिषेधापर्यवसायि'—इति विशेषणद्वयं नास्ति लक्षणशरीरघटकम् अपि तु 'लक्षणयोः दत्तं वर्णनपदं सादृश्ये चमत्कारित्वरूपस्य विशेषणस्य बोधकमस्ति' इत्यर्थे तात्पर्यग्राहकमात्रमस्तीति नास्ति तस्य वैयर्थ्यमिति चेन्न।

"वाक्यार्थोपस्कारकत्वमपि लक्षणे नितरामनिवार्यम्" तदभावे अनलङ्कारभूतायामुपमायां लक्षणस्यातिव्याप्तिर्भविष्यत्येव। यथा 'स्तनाभोगे' इत्यादि पद्ये केवलमुपमास्ति नोपमालङ्कारो यतो नात्र उपमानोपमेयसादृश्यादुपमास्वरूपादस्ति कश्चिदतिरिक्तो वाक्यार्थः ( रसादिनिष्ठः ) यस्तयाऽलङ्क्रियेत। न चेयं लक्षणे लक्ष्याऽस्तीति वाच्यम्। तथा सति 'अव्यङ्ग्यमि'ति पदस्य वैयर्थ्यम्, व्यङ्ग्योपमानिवारणप्रयासश्च (लक्षणे निर्दिष्टस्य) निष्फलत्वम्। न चात्र, अभेदप्रधानोत्प्रेक्षा अस्तीति वाच्यं कल्पितोपमायाः स्वयं दीक्षितेन 'चित्रमीमांसायाम्' स्वीकृतत्वात्। पुनश्च अनलङ्कारोपमां संग्रहीतुं लक्षणमिदं घटितमिति न विश्वसनीयम्, यतः—'व्यापार–उपमानाख्यो भवेद् यदि विवक्षितः। क्रियानिष्पत्तिपर्यन्तमुपमालङ्कृतिस्तु सा' इति स्वकृतसूत्रे अलङ्कारभूतोपमैव दीक्षितेन निरदेशि। तत्रैव च "अलङ्कारभूतोपमालक्षत्वे तदेवादृश्याव्यङ्ग्यत्वविशेषितमित्यभ्यधायि। इत्थं दीक्षितकृतं विवेचनमसंस्थुलमेव।

**टिप्पणी**—अत्र चन्द्रिकाटीकायाः भाषानुवादकारः—"एतच्चिन्त्यम्, स्वयं पंडितराजेन 'स्तनाभोगे' इत्यादिपद्यमुपमालङ्कारत्वेन स्थिरीकृतं किन्त्वत्र खण्डितम्। वस्तुतः श्लोकवाक्यस्य शृंगाराभिव्यक्तिपरत्वे स्वीकृते श्लोकेऽस्मिन् विद्यमानोपमा वाक्यार्थमुपस्करोतीति निर्वाह्यम्' इति लिखति। इत्थं—

> "स्वतःसिद्धेन भिन्नेन सम्मतेन च धर्मतः।
> साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकदोपमा॥"

( स्वतःसिद्धेन–अकल्पितेन, भिन्नेन–उपमेयादतिरिक्तेन, तथा च सम्मतेन—

लिङ्गादिभेददोषरहितेन कविसमयप्रसिद्धेन, अन्येन—अप्रस्तुतेन वस्तुना, वर्ण्यस्य—वर्णनीयस्य प्रस्तुतस्य वस्तुनः धर्मतः—साधारणधर्मयुक्तमिति भावः—एकदा-वारमेकं साम्यं सादृश्यं चेद् वाच्यम्—अभिधाव्यापारबोध्यम् ( अव्यङ्ग्य-मिति यावत् ), तदा तदुपमालङ्कारः ) इति विद्यानाथोक्तं लक्षणं नास्ति युक्तम्, व्यतिरेके प्राप्ते, निषेधप्रतियोगिनि—सादृश्ये अतिव्याप्तेः ।

एवम् "उपमानोपमेयत्वयोग्ययोरर्थयोर्द्वयोः । हृद्यं साधर्म्यमुपमेत्युच्यते काव्यवे-दिभिः" इति प्राचां लक्षणमपि प्रत्युक्तम् । 'हृद्यं साधर्म्यम्' इत्येतावतः एव लक्षणत्वं पर्याप्तम् । लक्षणोक्तानाम्—अन्यविशेषणानां तु निरर्थकत्वम् ।

## उपमेयोपमालङ्कारस्य स्वरूपम्

( १ ) तृतीयसदृशव्यवच्छेदबुद्धिफलकवर्णनविषयीभूतम् । ( २ ) परस्परम् उप-मानोपमेयभावमापन्नयोरर्थयोः सुन्दरं सादृश्यम् = उपमेयोपमा । यथा—

कौमुदीव भवती विभाति मे, कातराक्षि, भवतीव कौमुदी ।
अम्बुजेन तुलितं विलोचनं लोचनेन च तवाम्बुजं समम् ॥

अत्र कौमुदीनायिके, नयनाम्बुजे च परस्परमुपमानोपमेयभावमापन्ने स्तः । तृतीयसदृशपदार्थस्य चात्र व्यवच्छेदः । ( अत्र तुलितं सममिति उपमावाचकवैल-क्षण्यं स्वयं ग्रन्थकारवक्ष्यमाणरीत्या दुष्टमिति चिन्त्यम् ) । यथा वा—

निखिले निगमकदम्बे लोकेऽप्येष निर्विवादोऽर्थः ।
शिव इव गुरुर्गरीयान् गुरुरिव सोऽयं सदाशिवोपि तथा ॥

अत्र गुरुशिवौ परस्परमुपमानोपमेयभावमापन्नौ । तृतीयसदृशपदार्थस्य च व्यवच्छेदः । उपमानोपमेयतया विवक्षितात् पदार्थयुगलादतिरिक्तस्य सादृश्य-विशिष्टपदार्थस्य निवृत्तिरिति भावः ।

प्रत्युदाहरणानि—( अशुद्धानि उदाहरणानि वा ) ।

( १ ) तडिदिव तन्वी भवती भवतीवेयं तडिल्लता गौरी । अत्र तानवगौरि-मभ्यामनुगामिधर्माभ्यां प्रयोजितमुपमाद्वयं न तृतीयं सदृशं व्यवच्छिनत्ति । अत्र सादृश्यद्वयकथनस्य फलं नास्ति तृतीयस्य व्यवच्छेदः, अपितु तयोरेवोपमानोपमेययोः भिन्नभिन्नसमानधर्ममूलकसादृश्ययोर्ज्ञानम् ।

( २ ) सदृशी तव तन्वि निर्मिता, विविधा नेति समस्तसम्मतम् ।
अथ चेन्निपुणं विभाव्यते मतिमारोहति कौमुदी मनाक् ॥

अत्र तृतीयसदृशपदार्थस्य व्यवच्छेदे फलितेऽपि परस्परोपमानोपमेयभाव एव नास्ति ।

विशेषः—लक्षणे लिङ्गवचनभेदादिदुष्टसादृश्यवारणाय सुन्दरमिति सन्निवेशितमित्यवधेयम् ।

दुष्टसादृश्यस्योदाहरणानि—

( क ) कमलमिति वदनं तस्याः कमलं वदनायते जगति—अत्र । क्विप्क्यङो-वैलक्षण्यम् ( भिन्न प्रयोग करना ) दोषः ।

( ख ) कमलमिव वदनमस्या वदनेन समं तथा कमलम् = अत्र इव-पदघटितोपमा श्रौती समपदघटिता अपरा चार्थी । एतादृशं वैलक्षण्यं ( वैभिन्न्यमिति यावत् ) सहृदयोद्वेजकत्वाद् दोषः ।

## अन्येषां मतानां खण्डनानि

( १ ) अन्योन्येनोपमा बोध्या, व्यक्त्या वृत्त्यन्तरेण वा ।
एकधर्माश्रया या स्यात्सोपमेयोपमा मता ॥

इति चित्रमीमांसा-कृता दीक्षितेन कृतं लक्षणं न साधु ।

अहं लतायाः सदृशीत्यखर्वं गौराङ्गि, गर्वं न कदापि यायाः ।
गवेषणेनालमिहापरेषामेषापि तुल्या तव तावदस्ति ॥

अस्यां परस्परोपमायां लक्षणस्यातिव्याप्तिः । तनुत्वादिकोऽत्र ( अनुक्तः ) एकधर्मः ( सामान्यधर्मः ), अभिधया च परस्परसादृश्ययुक्तयोः लतानायिकयोरुपमा ( इत्थं दीक्षितकृतं पूर्णं लक्षणं संगच्छते ) ।

( २ ) अत्र 'सदृशी' 'तुल्या' इत्यंशद्वयेन सादृश्याश्रयत्वस्यैवास्मत्पदार्थे ( गौराङ्गीनायिकादौ ) अन्वय इति युक्तिरपि दीक्षितस्य यदि भवेत्तर्हि सापि न स्वीकार्या, यतः सदृशादिपदोपस्थितावपि 'मुखस्य सदृशश्चन्द्रः चन्द्रस्य सदृशं मुखम्' इत्यादि पद्येषु सर्वैरुपमेयोपमा स्वीक्रियत एव ।

( ३ ) पुनश्च यदि श्लोकस्योत्तरार्द्धं लक्ष्यीकृत्य काव्येऽस्मिन्नुपमेयोपमैव मन्येत तदपि न युक्तं यतो गर्वनिरासार्थपरत्वमेवोत्तरार्द्धवर्णितोपमायाः प्रयोजनं

न तु तृतीयसदृशव्यवच्छेदः। तृतीयसदृशव्यवच्छेदश्चोपमेयोपमाया जीवितम्, यथा स्वयमेव दीक्षितेन स्वग्रन्थे 'भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलम्' इत्यत्र काव्ये तृतीयसदृशव्यवच्छेदाभावादुपमेयोपमात्ववारणस्य प्रयासो विहितः।

(४) दीक्षितस्य लक्षणे 'व्यक्त्या वृत्त्यन्तरेण वा' इत्यंशोऽपि निष्प्रयोजनः, 'खमिव जलं जलमिव खम्' इत्यादौ खजलयोः सादृश्यान्वये, प्रतियोगित्वस्य (पारस्परिकसादृश्यस्येत्यर्थः) संसर्गविधयैव भानं, न तु तत्र कस्यापि पदस्य क्वापि वृत्तिः।

## अलंकारसर्वस्वकारमतस्यालोचना

'द्वयोः पर्यायेण (भिन्नयोर्वाक्ययोरित्यर्थः) तस्मिन् (उपमानतायामुपमेयतायां चेति भावः,), 'उपमेयोपमा' इत्यत्रालङ्कारसर्वस्वकारकृते लक्षणे द्वयोरितिपदस्य व्यर्थत्वं, पर्यायेणेतिपदेनैव तत्प्रयोजनसिद्धेः यथा—गगनं गगनाकारमित्यादावनन्वयालङ्कारेऽतिव्याप्तिवारणं वाक्यभेदाभावात्।'

(२) द्वयोरितिपदस्य (लिङ्गवचनभेदादीनां वारणाय, कविप्रसिद्धिस्फूर्तये वा) यथाकथञ्चित् स्पष्टार्थत्वेपि 'पर्यायेणे'ति पदस्य तर्कहीनता। 'तद्वल्गुना' इत्यादि प्रसिद्धोपमेयोपमोदाहरणे वाक्यभेदाभावाल्लक्षणस्याव्याप्तिः। 'अभिरामतासदन' इत्यादिकाव्यवत्, शब्दतः वाक्यैक्येऽपि, अर्थतो जायमानं वाक्यभेदमादाय, 'पर्यायेणे'ति पदस्य सार्थकत्वेऽपि, निम्नश्लोकेषु लक्षणस्यातिव्याप्तिः।

रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसन्निभैः।
भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम्॥
सविता विधवति विधुरपि सवितरति दिनन्ति यामिन्यः।
यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि॥

'अहं लतायाः सदृशी' इत्यादि पद्ये च। यतोऽत्र सर्वेषु, द्वयोः पर्यायेणोपमानतोपमेयते स्तः। तथापि नैतानि, उपमेयोपमाया उदाहरणानि किन्तु परस्परोपमायाः। अतः तृतीयसदृशव्यवच्छेद एवोपमेयोपमाया जीवितमिति साहित्यिकानां सिद्धान्तः। स च पण्डितराजस्य लक्षण एव कौशलेन सन्निवेशितः।

( ३ ) अलङ्कारसर्वस्वव्याख्यात्रा विमर्शिनीकारेण 'रजोभिः' इत्यादौ य उपमानान्तरतिरस्कारः प्रतिपादितः स खण्डनीय एव, द्वयोरुपमयोरेकधर्मकत्वाभावात्। आद्याया उपमाया अनुगामिधर्मप्रयोज्यत्वात् द्वितीयायाश्च बिम्बप्रतिबिम्बभावापन्नधर्मप्रयोज्यत्वात्।

## अंलकाररत्नाकरस्य खण्डनम्

'परस्परमुपमानोपमेयत्वमुपमेयोपमा' इति लक्षणं विधाय 'सविता विधवति' इत्यादिपद्यं रत्नाकरेणोदाहारि। तदुदाहरणं तस्य स्वकीयेनैव 'स च ( उपमानोपमेयभावश्चेत्यर्थः ) उपमानान्तरनिषेधार्थः' इति ग्रन्थेन विरुद्धम्। नात्र उपमानान्तरनिषेधः प्रतीयते न चेदमुपमेयोपमाया उदाहरणम्।

**विशेषः**—इयं चोपमेयोपमा यदि कस्याप्यर्थस्य ( वाच्यस्य व्यङ्ग्यस्य वा ) उत्कर्षाधायिका तदाऽलङ्कारः, अन्यथा, उपमेयोपमासंज्ञां भजमानापि, अलङ्कारभावं न भजते। अयं नियमश्च अलङ्कारान्तरस्य विषयेऽपि ज्ञेयम्।

( १ ) व्यङ्ग्या उपमेयोपमा—

गाम्भीर्येणातिमात्रेण महिम्ना परमेण च।
राघवस्य द्वितीयोऽब्धिरम्बुधेश्चापि राघवः॥

अत्र द्वितीयशब्दस्य सादृश्यविशिष्टत्वे शक्त्यभावात् व्यक्तिरेव। अथवा—

सुधासमुद्रं तव रम्यवाणी वाचं क्षमाचन्द्र, सुधासमुद्रः।
माधुर्यमध्यापयितुं दधाते खर्वेतरामान्तरगर्वमुद्राम्॥

अत्र वागादिकर्तृकस्य परस्पराध्यापनस्य बाधान्माधुर्यसंक्रान्तिविशेषो लक्षणया बुध्यते। तत्प्रयोजनं चोपमानोपमेयभावः।

( २ ) अनुगामिधर्मयुक्ता ( उक्तधर्मा ) उपमेयोपमा—

निखिले निगमकदम्बे लोकेष्वप्येष निर्विवादोऽर्थः—आदि। अत्र गरीयस्त्वम् अनुगामी धर्मः।

( ३ ) बिम्बप्रतिबिम्बभावमापन्ना ( उक्तधर्मा )—

रमणीयस्तबकयुता विलसितवक्षोजयुगलशालिन्यः।
लतिका इव वनिता वनिता इव रेजिरे लतिकाः॥

अत्र परस्परं वस्तुप्रतिवस्तुभावमापन्नाभ्यां रमणीयत्वविलसितत्वाभ्यां विशेषणाभ्यां युतत्वशालित्वाभ्यां च विशेष्याभ्यां पुटितः स्तबकस्तनरूपो धर्मः परस्परं, बिम्बप्रतिबिम्बभावमापन्नः ।

( ४ ) उपचरितधर्मयुक्ता ( उक्तधर्मा )—

कुलिशमिव कठिनमसतां हृदयं जानीहि हृदयमिव कुलिशम् ।
प्रकृतिः सतां सुमधुरा सुधेव, हि प्रकृतिरिव च सुधा ॥

अत्र पृथ्वीनिष्ठकठिनत्वस्य मनसि, सुधानिष्ठमाधुर्यस्य च प्रकृतावुपचारः ।

( ५ ) केवलशब्दात्मकधर्मयुक्ता—( उक्तधर्मा )

अविरतचिन्तो लोके वृक इव पिशुनोऽत्र पिशुन इव च वृकः ।
भारतमिव सच्चित्तं, सच्चित्तमिवाथ भारतं सकृपम् ॥

अत्र अविरतचिन्तसकृपरूपौ श्लिष्टशब्दौ एव साधारणधर्मौ ।

( ६ ) व्यक्तधर्मा ( agaiust उक्तधर्मा )

वारिधिराकाशसमो वारिधिसदृशस्तथाकाशः ।
सेतुरिव स्वर्गङ्गा, स्वर्गङ्गेवान्तरा सेतुः ॥

अत्र समुद्राकाशयोरपारत्वं सेतुस्वर्गङ्गयोश्च दुर्घटत्वम् = व्यज्यमानौ धर्मौ ।

नोट :—( १ ) एषा स्फुटे वाक्यभेदे पुनश्च अस्फुटेऽपि संभवति । यथा—'अभिरामतासदन' इत्यादौ ।

( २ ) उपमाया इवास्या अपि पूर्णालुप्तादयो भेदाः संभवन्ति । इत्योऽम् ।

## अनन्वयालङ्कारः

द्वितीयसदृशव्यवच्छेदफलकवर्णनविषयीभूतं यदेकोपमानोपमेयकं सादृश्यं तदन्वयः । स च कस्याप्युपस्कारकत्वेऽलङ्कारः । अन्यथा शुद्धोऽनन्वयः ।

लोहितपीतैः कुसुमैरावृतमाभाति भूभृतः शिखरम् ।
दाहज्वलनज्वालैः कदाचिदाकीर्णमिव समये ॥

अत्र रक्तपीतपुष्पाच्छादितं पर्वतस्य शृङ्गं, पूर्वकाले वनाग्निज्वालाव्याप्तेन स्वेनैव (शिखरेणैव) उपमीयते। इदं नास्ति तस्योदाहरणम्। यतो नात्र स्वसदृशद्वितीयव्यवच्छेदकफलकवर्णनविषयीभूतता। एवम्—

स्तनाभोगे पतन् भाति कपोलात्कुटिलोऽलकः।
सुधांशुबिम्बतो मेरौ लम्बमान इवोरगः॥

इदमपि नास्त्युदाहरणम्, द्वितीयस्वतुल्यव्यवच्छेदकफलकवर्णनविषयीभूतत्वे-ऽप्येकोपमानोपमेयकत्वाभावात्।

उदाहरणम्—

कृतक्षुद्राघौघानथ सपदि संतप्तमनसः
समुद्धर्तुं सन्ति त्रिभुवनतले तीर्थनिवहाः।
अपि प्रायश्चित्तप्रसरणपथातीतचरितान्
नरानूरीकर्तुं त्वमिव जननि त्वं विजयसे॥

अत्र गङ्गैवोपमानमुपमेयञ्च यत्र तादृशं सादृश्यं श्रीगङ्गाविषयकरत्युपस्कारक-त्वादनन्वयालंकारः। द्वितीयसदृशपदार्थस्यात्र व्यवच्छेदः।

स च पूर्णो लुप्तश्चेति तावद् द्विविधः। पूर्णस्तूपमावत् षड्विधोऽपि संभवति।

दीक्षितमतखण्डनम्—

'अद्य या मम गोविन्द जाता त्वयि गृहागते।
कालेनैषा भवेत् प्रीतिस्तवैवागमनात् पुनः॥'

अत्र गृहागतं श्रीकृष्णं प्रति विदुरवाक्ये, इयं त्वदागमनजन्या प्रीति-र्बहुकालानन्तरं पुनरपि त्वदागमनेनैव तुल्या भवेन्नान्येन, इत्युक्तिभङ्ग्या त्वदागमनप्रभवप्रीतेः सैव सदृशी नत्वितरवस्तुप्रभवेति व्यज्यते' इति चित्रमीमां-साकृताऽप्पयदीक्षितेन लिखितम्। तन्नास्ति समीचीनम्। अनन्वयस्थले सादृश्यं यदि प्रधानवाक्यार्थेऽन्वयं लभते तदाऽनन्वयो भवितुं नार्हति। अत्र तु कालद्वय-संभवे द्वे प्रीती परस्परमुपमानोपमेयभावमापन्ने स्तः। अतो नास्त्यनन्वयः। त्वदा-गमनजन्यायाः प्रीतेः सदृशी, कालान्तरीणत्वदागमनजन्या प्रीतिरस्तीति प्रत्ययस्य सर्वजनसिद्धत्वात्। 'स्वस्मिन् सादृश्यस्याबाधितत्वाद् योगार्थाभावेनान्वय' इत्युपमाप्रकरणे चित्रमीमांसायां स्वयं दीक्षितेनैवाभिधानात्।

## असमालङ्कारः

सर्वथैवोपमानिषेधोऽसमाख्योऽलंकारः । साक्षात्परम्परया वोपमाया आत्यन्तिकाभावो वर्णनविषयीभूतः=असमालंकारलक्षणम् ।

यद्यप्ययमलंकारोऽनन्वयोऽस्ति नितरां व्यङ्ग्यस्तथापि तच्चमत्कारानुगुणतया पृथगलंकारसंज्ञां नाप्नोति । वाच्यतादशायां तु स्वातन्त्र्येण चमत्कारित्वात् पृथग्व्यपदेशभाक् । यथा—

'भूमीनाथ शहाबदीन भवतस्तुल्यो गुणानां गणै-
रेतद्भूतभवप्रपञ्चविषये नास्तीति किं ब्रूमहे ।
धाता नूतनकारणैर्यदि पुनः सृष्टिं नवां भावये-
न्न स्यादेव तथापि तावकतुलालेशं दधानो नरः ॥

यथा वा—

'भुवनत्रितयेऽपि मानवैः परिपूर्णे बिबुधैश्च दानवैः ।
न भविष्यति नास्ति नाभवन्नृप यस्ते भजते तुलापदम् ॥

उभयत्रापि राजस्तुतेरुत्कर्षत्वादसमालङ्कारः । उपमानलुप्तोपमया भेदोऽस्यालङ्कारस्य—

उपमानलुप्तोपमायां सदृशनिषेधः क्वाचित्को भवति । असमालंकारे चात्यन्तिकः । असमालङ्कारे सर्वथैवोपमाननिषेधेन सादृश्यस्यानियोजनान्नोपमाया गन्धोऽपि । उपमानलुप्तोपमायां तु भिन्ना स्थितिः । यथा—

'यस्य तुलामधिरोहसि लोकोत्तरवर्णपरिमलोद्गारे ।
कुसुमकुलतिलक चम्पक, न वयं जातु जानीमः ॥'

अत्र, 'यस्य तुलामधिरोहसि न तं वयं जानीम' इत्युक्त्या अस्माकमसर्वज्ञत्वादस्मदगोचरः कोऽपि तवोपमानं भविष्यतीति क्वाचित्क एव सदृशनिषेधो नात्यन्तिकः ।

## अलङ्काररत्नाकरस्यालोचना

'ढुं ढुं कृत्वा मरिष्यसि, कण्टककलितानि केतकीवनानि ।
मालतीकुसुमसदृक्षं भ्रमर, भ्रमन्न प्राप्स्यसि ॥'

इत्यत्र रत्नाकरमतेनासमालङ्कारो नोपमानलुप्तोपमा, तस्यासंभवदुपमाना-ग्रहणविषयत्वात्। पण्डितराजमतेनात्रोपमानलुप्तैव। 'मालतीकुसुमसदृशं भ्रमर भ्रमन्नपि न प्राप्स्यसि' इत्युक्त्या, वर्त्ततां नाम तत्सदृशं क्वापि त्वया तु दुष्प्रापमेवेतिप्रतीतेः, सत्त्वादात्यन्तिकोपमाननिषेधस्याभावादुपमानलुप्तोपमैवात्र। अन्यथा 'मालतीकुसुमसदृशं नास्ति' इत्येव ब्रूयान्नतु प्राप्स्यसीति।

## अनन्वयालङ्कारस्य क्षेत्रेऽसमस्याप्रवेशः

अथासमालङ्कारव्यञ्जनादेव चमत्कारसिद्धेरनन्वयालङ्कारस्य पृथगलङ्कारता कथमिति चेत् सत्यम्। दीपकादेरुपमाभिव्यक्त्यैव चमत्कारोपपत्तौ सत्यपि यथा पृथगलङ्कारता तथैवानन्वयस्यापि। न च 'दीपकादावुपमाया व्यङ्ग्यत्वेपि गुणीभावो लभ्यते। अनन्वये तु मुख्यतयासमालङ्कारो व्यज्यत इति दृष्टान्तवैषम्यम्' इति वाच्यम्। यथा दीपकादौ गुणीभूतव्यङ्ग्यसत्त्वेपि ( उपमाध्वनिसत्त्वेपि ) नालङ्कारत्वं हीयते तथाऽनन्वयेऽसमरूपप्रधानव्यङ्ग्यसत्त्वेपि कथं नालङ्कारत्वं स्वीकर्त्तव्यम्?

( शङ्का ) दीपकाद्यलङ्कारकाव्ये गुणीभूतव्यङ्ग्यस्य ( उपमायाः ) सत्त्वादस्तु नाम गुणीभूतव्यङ्ग्यत्वं ध्वनित्वं तु न क्वाप्यलङ्कृतिकाव्ये दृष्टमिति चेत्—

( समाधानं ) न। पर्यायोक्तालङ्कारादिकाव्ये ध्वनित्वमलङ्कारत्वं च सामानाधिकरण्येनावतिष्ठेते। एवमत्रापि ज्ञातव्यम्। यतो ध्वनित्वालङ्कारत्वयोः सामानाधिकरण्ये नास्ति कोऽपि विरोधः। स्वस्मिन् स्वसादृश्यरूपमनन्वयशरीर-मादायानन्वये वाच्यालङ्कारव्यपदेशः स्यात्।

अयमलङ्कारः क्वचिदुपमानस्य, निषेधात्क्वचिच्च साक्षादुपमाया एव निषेधात्प्राप्यते। तत्र प्रथमस्तावदादौ दर्शितः। द्वितीयो यथा—

पूर्णमसुरै रसातलममरैः स्वर्गो वसुन्धरा च नरैः।
रघुवंशवीरतुलना तथापि खलु जगति निरवकाशैव॥'

टिप्पणी—असमालङ्कारः पण्डितराजस्य मौलिकी सृष्टिरस्ति। प्राञ्चो नाङ्गीकृतवन्तोऽमुमलङ्कारम्। पण्डितराजस्तु विच्छित्तिविशेषमस्मिन्निरीक्ष्य स्वयं तदनुकूलोदाहरणनिर्माणपूर्वकं स्वीचकारामुमलङ्कारम्। स्वस्मिन् स्वसादृश्यं प्रकटयताऽनन्वयालङ्कारेणाविषयीकृतमिदं भिन्नस्वरूपं सर्वथैवोपमाननिषेधात्मकमलङ्कारान्तरं

यदि न स्वीक्रियते तर्हि सादृश्यमूलकानेकालङ्काराणामुपमयैव गतार्थत्वाल्लोप एव प्रसज्येत। वस्तुतः प्राचीनाः स्वयमुदाहरणानुकूलकाव्यनिर्माणाशक्ता उदाहरणानुपलम्भादेव नाङ्गीचक्रुरेनम्। पण्डितराजस्तु स्वयं लक्षणानुकूलकाव्यनिर्माणनिष्णातो मेनेऽमुं पृथगलङ्कारम्।

## परिणामालङ्कारस्य स्वरूपम्

विषयी ( उपमानम् ) यत्र विषयात्मतयैव प्रकृतोपयोगी न स्वातन्त्र्येण स परिणामः। उपमेयरूपेण उपयुज्यमानम्—उपमानम्=परिणामालङ्कारः। अत्र उपमाने, उपमेयस्याभेदो युज्यते। रूपके तु नैवं किन्तु विपरीतम्। तत्र तावदुपमानं स्वातन्त्र्येणैव स्वात्मनैव प्रकृतोपयोगि भवति, उपमेयस्य चोपमानरूपेणोपयुज्यमानत्वे वाक्यार्थः संगच्छते। परिणामः—'विशेषणं विशेष्येण बहुलम्' इत्यनेन सूत्रेण निर्दिष्टस्य विशेषणसमासस्य आयत्तः, रूपकालङ्कारश्च 'मयूरव्यंसकादयश्च' इत्यस्य।

उदाहरणं—समानाधिकरणो वाक्यगः परिणामालङ्कारः—

अपारे संसारे विषमविषयारण्यसरणौ
मम भ्रामं भ्रामं विगलितविरामं जडमतेः।
परिश्रान्तस्यायं तरणितनयातीरनिलयः
समन्तात् संतापं हरिनवतमालस्तिरयतु॥

हरिश्चासौ नवतमालः—हरितमालः। अत्र हरिरुपमेयभूतः तमालश्चोपमानभूतः। उपमानम्—उपमेयरूपेणोपयुज्यमानं प्रकृतोपयोगि जायते। भगवदात्मतयैव तमालस्य संसारतापनिवर्तनक्षमत्वात्। ननु हरेरेवोपमानत्वेन, रूपकमेवास्त्विति चेन्न, मार्गश्रमसन्तप्तजनसन्तापापहारकत्वस्य शोभाविशेषशालित्वस्य च तमाल एव सत्त्वेन तस्यैव उपमानतयोपादानात्।

अत्र यद्यपि 'हरिनवतमालः' इति समस्तं पदम् तथापि 'हरिः तमालः' इति विग्रहकालिकविभक्तिमादाय समानविभक्तिकत्वं बोध्यम्। अयं च परिणामः वाक्यगः यतः परिणामस्य शरीरं प्रकृतकार्योपयोगित्वपर्यन्तम्—'तिरयतु' इति पदं यावत्

अस्ति। कार्यबोधकश्चेदं पदं 'तिरयतु' समासेन नास्ति घटितम्। 'हरिरिह तमालः' इति पाठे प्रकृतकार्योपयोगित्वस्य परिणामशरीरेऽप्रवेशेऽपि वाक्यगतत्वं स्पष्टमेव।

(२) समानाधिकरणः समासगो यथा—

महर्षेर्व्यासपुत्रस्य श्रावं श्रावं वचः-सुधाम्।
उप (अभि) मन्युसुतो राजा परां मुदमवाप्तवान्॥

अत्र वचः—उपमेयभूतं, सुधा चोपमानभूता (अत्रापि उपमानम्, उपमेयरूपेण उपयुज्यमानमेव प्रकृतोपयोगि, वचनात्मतयैव सुधायाः श्रवणकार्ये उपयोगित्वात्। अयमपि पूर्वोदाहरणयुक्त्या समानाधिकरणः परिणामः। किन्तु पूर्वोदाहरणभिन्नताऽस्य समासगतत्वे। 'स्नात्वा कालकः' इतिवत् मयूरव्यंसकादित्वात् समासेन 'श्रावं श्रावं वचःसुधाम्' इत्यस्य समस्तैकपदत्वात्। प्रकृतकार्योपयोगित्वस्य परिणामशरीरेऽप्रवेशे तु 'वचःसुधाम्' इति समस्तपदमादायापि परिणामस्य समासगतत्वं निष्पद्यते।

(३) व्यधिकरणः परिणामो यथा—

अहीनचन्द्रा लसताननेन, ज्योत्स्नावती चापि शुचिस्मितेन।
एषा हि योषा सितपक्षदोषा तोषाय केषां न महीतले स्यात्॥

अत्र काक्वा, विरहिजनतोषजनकत्वमपि लभ्यते। तच्च शुक्लपक्षरजन्याः विरहिवैक्लव्योद्दीपकत्वाद्, स्वात्मना बाधितम्। योषारूपेण रजन्या उपयुज्यमानत्वे तु संगच्छत इति भवति परिणामः। (स च परस्परसापेक्षबहुसंघात्मकतया सावयवः परिणामः। तत्र प्रथमार्थगतौ द्वावयवौ 'मुखेन पूर्णचन्द्रा' 'स्मितेन ज्योत्स्नावती' इत्याकारकौ। व्यधिकरणौ, उपमानोपमेययोः विभिन्नविभक्तिकत्वात्। उत्तरार्द्धगतश्च 'सितपक्षदोषा योषा' इत्याकारकः समानाधिकरण एव।

(१) तारानायकशेखराय जगदाधाराय धाराधर-
च्छायाधारककन्धराय गिरिजासङ्गैकशृङ्गारिणे।
नद्या शेखरिणे दृशा तिलकिने नारायणेनास्त्रिणे,
नागैः कङ्कणिने नगेन गृहिणे नाथाय सेयं नतिः॥

इति दीक्षितप्रदत्तं व्यधिकरणपरिणामोदाहरणं न साधु। यतः शृङ्गारिताऽत्र भूषणान्यपेक्षते। शेखरादीनामुपमानानां नद्याद्युपमेयरूपेणोपयुज्यमानत्वे न प्रकृतो-

पयोगः प्रत्युत स्वयमुपमानरूपेणैव प्रकृतोपयोगः। अतो रूपकमिदम्। इत्थमेव 'द्विर्भावः पुष्पकेतोः' इत्यादिपद्ये कोविदानन्दजनकत्वम्, राज्ञः ( उपमेयस्य ) मन्मथादि ताद्रूप्येण ( उपमानाभेदेन ) यथा संभवति न तथा केवलस्वरूपेण ( राजरूपेणेति भावः ) अतो नात्र परिणामः।

( २ ) 'आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः' इति सूत्रयित्वा अंलकार-सर्वस्वकारः परिणामे उपमेयरूपेण, उपमानस्योपयोगो भवति' इत्यादि व्याख्यातवान्। अत्रापि चिन्त्यते। यदि अस्य प्रकृतोपयोगित्वस्य='प्रकृतकार्ये उपयोग' इति भावो भवेत्तदा—

दासे कृतागसि भवत्युचितः प्रभूणां
पादप्रहार, इति सुन्दरि, नास्मि दूये॥
उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रै-
र्यद् भिद्यते तव पदं ननु सा व्यथा मे॥' इति।

तेनैवोदाहृते रूपकोदाहरणेऽतिव्याप्तिः कण्टकानां ( उपमानभूतानां ) प्रकृत-कार्ये ( खेदव्यथारूपे ) उपयोगित्वात् ( यदि च पुनः 'उपमानस्य, प्रकृतविषयात्म-तया उपयोगः' इति भावः स्यात्तर्हि—

"अथ पक्त्रिमतामुपेयिवद्भिः, सरसैर्वक्त्रपथाश्रितैर्वचोभिः।
क्षितिभर्त्तुरुपायनं चकार प्रथमं, तत्परतस्तुरङ्गमाद्यैः॥"

इत्यत्र तदुक्ते व्यधिकरणपरिणामोदाहरणेऽसंगतिः स्यात्। यतो राजमेलने ह्युपायनस्य ( उपमानभूतस्य ) स्वात्मनैवोपयोगः।

**टिप्पणी**—अत्र नागेशाः—( १ ) शेखरादीनां शृङ्गारितोपपादकत्वं न युक्तम्। 'नारायणेनास्त्रिणे' इत्यस्य शृङ्गारितोपपादकत्वाभावात्। किं तु नमस्यता-संपादकशिवनिष्ठोत्कर्षबोधकानीमानि विशेषणानि। तदुपपादकता च शेखरस्य नदीतादात्म्येनैवेति परिणाम एवायं, शेखरस्य नीचजनसाधारणत्वात्।'

( २ ) अथ पक्त्रिमताम् ( परिपक्वताम् ) इत्यादौ च 'यत्किञ्चिद्रूपोपायनस्य राजसंघट्नानुपायत्वात्, विलक्षणवचनतुरङ्गमादिरूपस्यैव च तदुपायनत्वात्, एवञ्च राजसंघटनोपयोगित्वं तुरङ्गमादिरूपेणैवोपायनस्य। नेदं व्यधिकरणरूपकं किन्तु परिणामः' इति, निश्चकषुः।

केचित्तु—रूपकमेव द्विविधं मत्वा परिणामस्य पृथक्त्वं खण्डयन्ति। तथाहि परिणामो द्विविधः—

( १ ) उपमेयस्योपमानरूपेण।

( २ ) उपमानस्य चोपमेयरूपेण। 'वदनेन्दुना तन्वी शिशिरीकुरुते दृशौ, वदनेन्दुना तन्वी स्मर तापं विलुम्पति'' इति क्रमशः उदाहरणे स्तः। एवं च परिणामद्वयात्मकमिदं रूपकमेव भवितुमर्हति।

अत एवोक्तं—'तद्रूपकमभेदो य उपमानोपमेययोः' ( मम्मटेन ) इति। तस्मान्न रूपकात्परिणामोऽतिरिच्येत' इत्याहुः।

अत्र नागेशाः—'चमत्कृतिनिदानत्वेन अलङ्कारभेद इति सिद्धान्तितत्वात् अन्यत्रेवात्रापि भेद एवोचितः' इति प्राहुः। यत्र प्रकृतोपयोगित्वे विषयीमुख्यस्तत्र परिणामः, यत्र च विषयस्तत्र रूपकम्। चमत्कारस्य द्विविधत्वादलङ्कारयोरपि पृथगस्तित्वं स्वीकर्त्तव्यमेव।

## रूपकस्य निरूपणम्

उपमेयतावच्छेदकपुरस्कारेण मुखादिकं पुरस्कृत्य, न तु तिरोधाय शब्दान्निश्चीयमानम् ( शब्दात्मकप्रमाणजन्यनिश्चयगोचरम् न तु मुखेऽस्मिन् चन्द्रत्वप्रकारकं चाक्षुषं ज्ञानं मे जायताम्' इतीच्छाजन्यं यत् 'मुखमिदं चन्द्रः' इत्याकारकं निश्चयात्मकं चाक्षुषं ज्ञानं तदिव प्रात्यक्षिकाहार्यनिश्चयगोचरम् ) उपमेये उपमानतादात्म्यं ( उपमेये उपमानाभेदः )—रूपकम्। तदेव वाक्यार्थोपस्कारकत्वविशिष्टं सत्—रूपकालङ्कारः। अपह्नुतौ स्वेच्छया उपमेयस्य ( मुखादेः ) निषेधो भवति। भ्रान्त्यलङ्कारे भ्रमजनकदोषेणोपमेयस्य प्रतिबध्यमानत्वम् अतिशयोक्ताबध्यवसानं, निदर्शनायां ( 'अमायां तन्मुखं पश्य चन्द्रदर्शनकौतुकी' इत्यादौ ) साध्यवसानाया लक्षणायाः साम्राज्यम्। इत्थं चतुर्णामेषाम्, 'उपमेयतावच्छेदकपुरस्कारेण' इति घटकाद् व्यावृत्तिः। शब्दादिति कथनात् प्रात्यक्षिकाहार्यनिश्चयगोचरतादात्म्यस्य निरासः। मुखामयोः सादृश्याभावाद्। ननु शुद्धारोपविषयकं तादात्म्यमपि रूपकत्वेन स्वीक्रियतामिति चेन्न, सादृश्यमूलकतादात्म्यस्यैव ( न तु सादृश्येतरसम्बन्धान्तरमूलकतादात्म्यस्यापि ) रूपकत्वेन अङ्गीकारात्।

तथा चोक्तं—

( १ ) 'तद्रूपकमभेदो य उपमानोपमेययोः' ( मम्मटेन )

( २ ) 'उपमैव तिरोभूतभेदं रूपकमुच्यते' ( दण्डिना )।

उपमायां भेदाभेदघटितमेव सादृश्यं भासते। रूपके तु शुद्धाभेदघटितमेव सादृश्यं भासते। रूपके तादात्म्यस्य भानं त्रिविधतया भवति—

( १ ) यत्र उपमानोपमेययोः समानविभक्त्यन्तत्वेन निर्देशस्तत्र तादात्म्यं—कस्यापि पदस्य अर्थो न भवति, अतस्तत्र तादात्म्यभानं संसर्गतया भासते! यत्र पुनस्तयोः भिन्नविभक्त्यन्तत्वेन निर्देशः, तत्र कुत्रचिद् ( 'मुखं चन्द्रत्वमाप्नोति' इत्यादौ ) लक्षणया चन्द्रत्वपदस्य अर्थः ( अर्थभूतं ) तादात्म्यं द्वितीयाया अर्थे (कर्मणि) विशेषणतया भासते, कुत्रचिच्च ( 'मुखे ) चन्द्रत्वम्' इत्यादौ लक्षणया चन्द्रत्वपदस्यार्थः तादात्म्यं ( चन्द्रतादात्म्यं ) विशेष्यतया भासते )।

( २ ) रत्नाकरः प्रतिपादयति यत् सारोपलक्षणायाः स्थले रूपकं भवति। सा लक्षणा गौणी भवतु शुद्धा वा सर्वत्र स्याद् विशेषेण रूपकम्। अर्थात् सादृश्यमूलक-तादात्म्यस्येव सम्बन्धान्तरमूलकतादात्म्यस्यापि रूपके निवेशः कार्यः। "भिन्नयोः। सामानाधिकरण्यनिर्देशः" इत्येतावदेव रूपकलक्षणं युक्तम्। किन्तु तस्यैतन्मतमस-मीचीनम्—अपह्नुत्यादौ, भिन्नयोः समानाधिकरणस्य सत्त्वाल्लक्षणस्यातिव्याप्तिर्भवि-ष्यति पुनश्च 'सादृश्यमूलकं स्मरणं स्मरणालङ्कारः न तु चिन्तादिमूलम्'—इति स्वयं रत्नाकरेणोक्तम्। तत्र चिन्तादिसंचारिमूलस्य स्मरणस्यापि स्मरणालङ्कारत्वमभ्युपे-तव्यम्। इत्थं रत्नाकरस्य प्रतिपादनशैली परम्पराविरोधगर्भा।

( १ ) अप्पयदीक्षितो ब्रवीति यत् बिम्बाविशिष्ट ( बिम्बप्रतिबिम्बभावापन्न-विशेषणरहिते ) अनिह्नुते ( निषेधेन अस्पृष्टे ) निर्दिष्टे ( शब्देनाभिहिते ) विषये ( उपमेये ) यदा उपमानम् उपरंजकतामेति ( आहार्यनिश्चयगोचरं तादात्म्यं व्रजति ) तदा रूपकं भवति।

'बिम्बाविशिष्टे निर्दिष्टे विषये यद्यनिह्नुते।
उपरञ्जकतामेति विषयी रूपकं तदा॥
त्वत्पादनखरत्नानां यदलक्तकमार्जनम्।
इदं श्रीखण्डलेपेन "पाण्डुरीकरणं विधोः॥"

इत्यत्र नास्ति रूपकं, किन्तु निदर्शना। यतोऽत्रोपमेयं (मार्जनम्) बिम्बप्रतिबिम्बभावापन्नविशेषणयुक्तं वर्तते। ('यथा चन्द्रः स्वतः शुभ्रत्वाद्-अनासञ्जनीयधावल्यः तथा नखाः स्वतोऽरुणत्वाद् अनासंजनीयारुण्याः' इति साहश्येन, नखानां चन्द्रस्य च बिम्बप्रतिबिम्बभावः) तथा च अलक्तकचन्दनयोः स्ववर्णस्य आसञ्जकत्वेन बिम्बप्रतिबिम्बभावः)।

(२) 'कमलमनम्भसि, कमले च कुवलये तानि कनकलतिकायाम्'—इत्यतिशयोक्तौ न लक्षणस्यातिव्याप्तिः। उपमेयस्य शब्देन अनिर्दिष्टत्वात्।

'उपरञ्जकतामेति' इति घटकेन ससन्देहोत्प्रेक्षासमासोक्तिपरिणामभ्रान्तिष्व-लङ्कारेष्वतिव्याप्तिनिरासः सर्वत्राहार्यनिश्चयगोचरस्य तादात्म्यस्य अभावात् (ससंदेहोत्प्रेक्षयोः निश्चयस्यैवाभावात् समासोक्तौ व्यवहारमात्रसमारोपात्, परिणामे उपमानताद्रूप्यस्याभावात्, भ्रान्तौ च प्रवृत्त्यादिपर्यन्तं भ्रमात्मक एवानाहार्यः—वास्तविको निश्चयो भवति।)

दीक्षितस्य मतं खण्डनीयमेव। उपमेयस्य बिम्बप्रतिबिम्बभावापन्नविशेषण-युक्तत्वेऽपि रूपकं सम्भवत्येव। यथा—'अलङ्कारसर्वस्वटीकायां विमर्शिन्यां 'कन्दर्प-द्विप' इत्यादिपद्ये (यत्र बिम्बप्रतिबिम्बभावापन्नधर्ममूलकसादृश्येन उपमानोपमे-ययोः ताद्रूप्यमस्ति) पुनश्च "त्वत्पादनखरत्नानाम्" इत्यादौ तु रूपकमेवास्ति न निदर्शना यतः स्वयमेव दीक्षितेन "उपमानोपमेययोरन्यतरस्मिन्—अन्यधर्मारोपः" इति पदार्थनिदर्शनायाः लक्षणं कृतम्। पूर्वोक्ते पद्ये धर्मस्य धर्मे आरोपो नास्ति-अपितु बिम्बप्रतिबिम्बभावापन्नपदार्थघटितयोः वाक्यार्थयोरेकस्मिन्नन्यस्या-रोपोऽस्ति।

(१) वाक्यनिदर्शनाऽपि न संभवति यतो यत्र श्रौतः (शाब्दः) अभेदः—उद्देश्यविधेयभावश्च स्यातां तत्र वाक्यार्थः रूपकं भवति। यत्र च आर्थः (अर्थबलगम्यः) अभेदः—उद्देश्यविधेयभावस्यानालिङ्गनं स्यातां तत्र निद-र्शना। यथा श्लोकं परिवर्त्य यदि "त्वत्पादनखरत्नानि यो रञ्जयति यावकैः। इन्दुं चन्दनलेपेन पाण्डुरीकुरुते हि सः" इत्येवं क्रियेत तदा निदर्शना भवेत्।

"यो यावकैः नखान् रञ्जयति स चन्दनेनेन्दुं पाण्डुरीकुरुते" इत्यादौ रञ्जनपाण्डुरीकरणयोरर्थोऽभेदो द्वयोरपि शब्दयोर्भिन्नत्वात्। अत्र चोद्देश्यविधेय-

भावस्याभावः, द्वयोरपि वाक्ययोः स्वतन्त्रत्वात्। एवं सति पूर्वोक्तं पद्यं वाक्यार्थरूपकस्योदाहरणम्।

(२) निर्दिष्टे येन केन रूपेण (शब्दादभिहिते उपमेयतावच्छेदकरूपेण स्थिते वा इति पदमप्युपहासास्पदम्। उपमेयस्य येन केन रूपेण शब्दमात्रादभिहितत्वे 'सुन्दरं कमलं भाति लतायामिदमद्भुतम्' इत्यत्रातिशयोक्तौ अतिव्याप्तिः, तत्रापि 'सुन्दरम्' 'इदम्' इत्येताभ्यां ('पदार्थः मुख्यपदार्थेनान्वेति न पदार्थैकदेशेन' इति मतेन) उपमेयस्य (आननस्य) प्रतिपादनात्। उपमेयतावच्छेदकरूपेण निर्दिष्टत्वे, 'अनिह्नुते' इति तृतीयविशेषणस्य वैयर्थ्यम्। भ्रान्तिमति दोषजनितभ्रमेण उपमेयस्य प्रतिबध्यमानतया नास्ति अतिव्याप्तिवारणावश्यकता। येनेदं विशेषणं स्वीक्रियते।

(३) पुनश्च—इदं तृतीयं विशेषणं तावन्महान्तमनर्थं प्रस्तौति। अनेन स्वयं दीक्षितस्योपरि प्रहारो भवति। पर्यस्तापह्नुतेः "नायं सुधांशुः" इति कुवलयानन्दनिर्दिष्टे उदाहरणेऽतिव्याप्तिर्भवति यतस्तत्राप्युपमेयमनिह्नुतम् (उपमेयतावच्छेदकरूपेण स्थितम्) अस्ति। न चेदं रूपकभेदे इति वाच्यम्। त्वदुक्तिविरोधापत्तेः। (इदमत्रावधेयं पण्डितराजेनेदं पद्यम्— अपह्नुतिविवेचने ह्दारोपरूपकत्वेन निर्णीतमस्ति)।

(४) अन्ते च चित्रमीमांसायाम्—अलङ्कारभूतरूपकलक्षणे अव्यङ्ग्यत्वविशेषणप्रक्षेपो दीक्षितस्य नोचितः, नित्यव्यङ्ग्यस्य रसादेरपि स्थितिविशेषेऽलङ्कारत्वस्य स्वीकृतया व्यङ्ग्यालङ्कारत्वयोरविरोधाच्च। प्रधानव्यङ्ग्यरूपकवारणाय उपस्कारकत्वमेव सर्वालङ्कारसाधारणं विशेषणमुचितमिति सम्यक्तया अवधारणीयम्।

१. "तद्रूपकमभेदो य उपमानोपमेययोः" इति मम्मटोक्तं लक्षणमपि न हृदयावर्जकम्, अपह्नुत्यादौ उपमानोपमेययोरभेदस्य प्रतीतिसिद्धतया तत्रातिप्रसङ्गात्। अथ लक्षणे 'उपमानोपमेययोः' इति कथनेन, उपमेयतावच्छेदकं (मुखत्वादिकम्) पुरस्कृत्य, उपमानतावच्छेदकेन (चन्द्रत्वादिना) विशिष्टस्य चन्द्रादेरुपमानस्य—अभेदो रूपकम्' इत्यर्थलाभे जाते अपह्नुतौ उपमेयतावच्छेदकस्य पुरस्काराभावान्नातिप्रसङ्ग इति चेत्कथ्यते, तदपि नास्ति कार्यसाधकम्। 'नूनं मुखं चन्द्रः' इत्याद्युत्प्रेक्षायां तथाप्यतिप्रसक्तेः। न च निषेधसम्भावनादयो रूपकस्य बाधकाः। यथा त्कस्याभःवे—क्लिर्भवति तथैव तदभावे सति रूपकमिति युज्यते वक्तुम्। यत्र विशेषशास्त्रं न प्रवर्त्तते तत्रैव सामान्यशास्त्रप्रवृत्तिः। अत्र तु

लक्षणं रूपकस्य धर्मत्वाद् विशेषं वस्तु वर्तते। एष धर्मो यदि उत्प्रेक्षायामप्यस्ति तदा कः तस्माद् विषयाभिरस्य विषयान्तरं ग्राहयिष्यति। न हि घटत्वं स्वाधिकरणाद् घटात् पृथिवीत्वं द्रव्यत्वं वा सामान्यधर्मं निरस्य विषयान्तरं ( घटत्वमात्रं ) ग्राहयेत्। एवमेव अपह्नुत्युत्प्रेक्षयोः निषेधसम्भावने दृष्ट्वा नैतत् वक्तुं शक्यते यत्तत्राभेदो नास्ति। अस्ति चाभेदः—इति तत्रापि रूपकस्यातिप्रसङ्गो भविष्यत्येव। निश्चीयमानत्वेनाभेदो विशेषणीय इति चेत् पंडितराजोक्त एव पर्यवस्यति।

तदिदं रूपकं सावयवं निरवयवं परम्परितं चेति त्रिविधम्। परस्परसापेक्षनिष्पत्तिकानां ( अन्योन्यापेक्षया सिद्ध्यतां ) रूपकाणां समूहः सावयवम्। यथा—

सुविमलमौक्तिकतारे, धवलांशुकचन्द्रिकाचमत्कारे।
वदनपरिपूर्णचन्द्रे सुन्दरि राकासि नात्र सन्देहः॥

( २ ) सावयवभिन्नरूपकत्वं निरवयवरूपकत्वम्। यथा—

'बुद्धिर्दीपकला ( ज्वाला ) लोके यया सर्वं प्रकाशते।
अबुद्धिस्तामसी रात्रिर्यया किञ्चिन्न भासते॥'

अत्र परस्परसापेक्षरूपकसमूहाभावः।

( ३ ) यत्र च समर्थकत्वेन विवक्षितः—आरोप एव आरोपान्तरस्य निमित्तं तत्परम्परितम्। यदि श्लेषमूलक आरोपस्तदा श्लिष्टपरम्परितम्। शुद्धारोपत्वे शुद्धपरम्परितम्।

यथा—कमलावासकासारः क्षमाधृतिफणीश्वरः।
अयं कुवलयस्येन्दुरानन्दयति मानवान्॥

कमलायाः—लक्ष्म्याः वास एव कमलानां वारिजानाम् आवासः तत्र विषये, कासारः सरोवररूपः। क्षमायाः—तितिक्षायाः धृतिः धारणमेव क्षमायाः पृथिव्याः धृतिः तत्र विषये फणीश्वरः—शेषनागरूपः। तथा—कोः पृथिव्याः वलयं मण्डलमेव कुवलयं—रात्रिकमलविशेषः तस्य इन्दुश्चन्द्रः—अयं वर्णनीयो राजा मानवान् लोकान् सुखयति। अत्र श्लेषमूलकस्य समर्थकस्य कमलावासाद्यारोपस्य कासाराद्यारोपं प्रति निमित्तत्वात् राज्ञि ( उपमेये च ) कासारादीनामनेकपदार्थानाम् आरोपः। अत इदं मालाश्लिष्टपरम्परितरूपकम्।

एवमेव—अहितापकरणभेषज नरनाथ भवान् करस्थितो यस्य।
तस्य कुतो हि भयं स्यादखिलामपि मेदिनीं चरतः॥

अहितानां—शत्रूणाम् , अपकरणम्—अपकार एव, अहीनाम्—सर्पाणाम् , तापकरणम्—तापोत्पादनम् , तत्र भेषज—औषधस्वरूप। हे राजन्! भवान् यस्य सपक्षः तस्य अहिभयरूपं हि भयं ( निश्चिन्तभयं ) कुतो भवेन्न भवेदिति भावः। अत्र सर्पतापोत्पादनस्य, शत्रूणामपकरणे, भेषजस्य च नृपे आरोपः। अत्र 'शत्रूणामपकरणमेव सर्पाणां तापोत्पादनम्' इति श्लेषमूलकः—आरोपः समर्थकः। नृपे भेषजाभेदस्यारोपः—च समर्थनीयतया कवेरभिमतः।

शुद्धपरम्परितस्योदाहरणम्—

देवाः के पूर्वदेवाः समिति मम नरः सन्ति के वा पुरस्ता-<br>
देवं जल्पन्ति तावत् प्रतिभटपृतनावर्तिनः क्षत्रवीराः।<br>
यावन्नायाति राजन् नयनविषयतामन्तकत्रासिमूर्त्ते<br>
र्मुग्धारिप्राणदुग्धाशनमसृणरुचिस्त्वत्कृपाणो भुजङ्गः॥

अत्र श्लोके द्वे रूपके वर्णिते।

तत्रैकस्मिन् रूपके अरिप्राणे दुग्धारोपः, द्वितीये च कृपाणे भुजङ्गारोपः। अनयोश्च प्रथमारोपः समर्थकत्वेन विवक्षितः। श्लेषाभावात् शुद्धत्वं मालात्मकताया अभावाच्च केवलत्वमस्येति बोध्यम्।

प्राचीसंध्या समुद्यन्महिमदिनमणेः, मानमाणिक्यकान्ति-<br>
र्ज्वालामाला कराला कवलितजगतः क्रोधकालानलस्य।<br>
आज्ञाकान्तापदाम्भोरुहतलविगलन्मञ्जुलाक्षारसाभा<br>
क्षोणीन्दो संगरे ते लसति नयनयोरुद्भटा शोणिमश्रीः॥

अत्र समर्थनीये रूपके शोणिमश्रियां सन्ध्यादीनामनेकपदार्थानामारोपः। समर्थके रूपके च प्रतापादौ ( महिम्नि ) सूर्यादेरारोपः। विना द्वितीयमेनमारोपं प्रथमारोपो न निष्पद्यते यतो नयनशोणिम्नि सन्ध्याद्यारोपः, प्रतापे सूर्यारोपं, नियमेनापेक्षते। यद्यपि सावयवे रूपकेऽपि—आरोपः, आरोपान्तरस्य समर्थकः—निमित्तम्। किन्तु तत्र, आरोपातिरिक्तेन कविसमयसिद्धसादृश्यद्वारेणापि आरोपान्तरस्य सिद्धिः। यथा—"सुविमलमौक्तिकतारे" इत्यादौ मौक्तिकेषु तारादीनामारोपं विनापि औज्ज्वल्यमात्रेण सुन्दर्यां राकाया आरोपस्य सिद्धिः। किन्तु शुद्धपरम्परिते तु—एक आरोपः—इतरमारोपं नियमेनापेक्षते।

## उदाहरणालङ्कारः

'सामान्येन निरूपितस्यार्थस्य सुखप्रतिपत्तये तदेकदेशं निरूप्य तयोरवयवावयविभाव उच्यमान उदाहरणम् ।'

यथा—

अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति ।
निखिलरसायनराजो गन्धेनोग्रेण लशुन इव ॥

न चात्रोपमा वक्तव्या । तयोः (पदार्थलशुनयोः) सामान्यविशेषभावेन साहश्यानुपपत्तेः । नात्रोपमायामिव इवशब्दादीनामिव सहशादिशब्दानामपि प्रयोगोऽत्र सम्भाव्यते ।

**नियामकाः शब्दाः—**

'इव' 'यथा' 'निदर्शनं' 'दृष्टान्तम्' इत्यादयः शब्दा उदाहरणालङ्कारस्य नियामकाः सन्ति । यथा—

उपकारमेव कुरुते विपद्गतः सद्गुणो नितराम् ।
मूर्च्छां गतो मृतो वा निदर्शनं पारदोऽत्र रसः ॥

**विकस्वरालङ्कारस्यान्तर्भावः—**

चन्द्रालोकादिग्रन्थेषु प्रतिपादितस्य विकस्वरालङ्कारस्य नास्त्यावश्यकता पृथक्तयाऽङ्गीकरणस्य । यथा—

'अर्थिभिश्छिद्यमानोऽपि स मुनि (दधीचि) र्न व्यकम्पत ।
विनाशेऽप्युन्नतः स्थैर्यं न जहाति द्रुमो यथा ॥'

अत्र 'विनाशेऽप्युन्नतः स्थैर्यं न जहाति' इत्यस्यार्थान्तरन्यासस्य शोभोत्कर्षाधायकं चतुर्थचरणखण्डगतमुदाहरणमेव ।

**अर्थान्तरन्यासादस्य भेदः—**

अर्थान्तरन्यासेऽवयवावयविभावबोधकस्यैवादेः शब्दस्य प्रयोगो न क्रियते । पुनश्च तत्रोदाहरणालङ्कारवत् सामान्यविशेषयोरेकविधेयान्वयो दृश्यते । इत्थं चोभयोरपि भेदः स्फुट एव ।

प्राचां मतम्—प्राञ्चो नेममलङ्कारमतिरिक्तत्वेन मन्वते । उपमयैवास्य गतार्थतां गदन्ति । 'निर्विशेषं न सामान्यम्' इति नियमादमितगुणदोषादयः शब्दा अपि विमलविद्याकामुकतादिविशेषबोधका एव सन्तीति तादृशविशेषमादाय विशेषान्तरस्य सादृश्योल्लासः स्वीकर्त्तव्यः । इवादिभिः शब्दैः, प्रारम्भे प्रतीयमानस्यापि सामान्यविशेषभावस्य, सादृश्य एव पर्यवसितत्वात् । इति ।

## ससंदेहालङ्कारः

सादृश्यमूला भासमानविरोधका समबला नानाकोट्यवगाहिनी धी रमणीया = ससंदेहालङ्कृतिः ।

संशये विरोधो न भासते मानाभावात् । इत्यतो लक्षणान्तरमाह—

'मरकतमणिमेदिनीधरो वा तरुणतरस्तरुरेष वा तमालः ।
रघुपतिमवलोक्य तत्र दूराद्दृषिनिकरैरिति संशयः प्रपेदे ॥'

अयं शुद्धः ससंदेहः । निश्चयगर्भो यथा—

तरणितनया किं स्यादेषा न तोयमयी हि सा
मरकतमणिज्योत्स्ना वा स्यान्न सा मधुरा कुतः ।
इति रघुपतेः कायच्छायाविलोकनकौतुकै-
र्वनवसतिभिः कैः कैरादौ न सन्दिदिहे जनैः ॥

निश्चयान्तो यथा—

चपला जलदाच्च्युता लता वा
तरुमुख्यादिति संशये निमग्नः ।
गुरुनिःश्वसितैः कपिर्मनीषी
निरणैषीदथ तां वियोगिनीति ॥

अप्पयदीक्षितमतखण्डनम्—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं स विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥

इत्यत्र चन्द्रादीनां सन्देहधर्मिणामनेकत्वम्। प्रकारस्तु, वर्णनीय-वनिता-स्रष्टृत्वमेकमेव। अतोऽनेककोटिकत्वविरहे सति 'नानाकोट्यवगाहित्वरूपस्य लक्षणांशस्याव्याप्तिरिति निष्चकषु'रप्पयदीक्षिताः। तन्न। अत्र हि अस्याः सर्गविधौ यः प्रजापतिरभूत्स किं चन्द्रः, किं नु मदनः, किं वा नु वसन्त इति संशयः प्रजापतिधर्मिकश्चन्द्रत्वादिना नाकोटिक एवेति कुत्राव्याप्तिः।

## उल्लेखः

एकस्य वस्तुनो निमित्तवशाद् यद्यनेकैर्ग्रहीतृभिरेकप्रकारकं ग्रहणं तदुल्लेखः।

यथा— नरैर्वरगतिप्रदेत्यथ सुरैः स्वकीयापगे-
त्युदारतरसिद्धिदेत्यखिलसिद्धसंघैरपि।
हरेस्तनुरिति श्रिता मुनिभिरस्तसङ्गैरियं
तनोतु मम शंतनोः सपदि शन्तनोरङ्गना॥

अत्र लिप्सारुचिभ्यां निमित्ताभ्याम् अनेकैर्ग्रहीतृभिरनेकप्रकारकं ज्ञानम्। गङ्गाविषयकरतिभावोपस्कारकतयाऽलङ्कारः। शुद्ध एवायमुल्लेखालङ्कारः। अयं रूपकभ्रान्त्यादिसङ्कीर्णोऽपि दृश्यते। यथाऽपह्नुतिसंकीर्णः—

वनितेति वदन्त्येतां लोकाः सर्वे वदन्तु ते।
यूनां परिणता सेयं तपस्येति मतं मम॥

अत्र विषयतावच्छेदकस्य ( वनितात्वस्य ) परसम्मतत्वेन निषेध्यतया कथनादपह्नुतिसङ्कीर्णः।

### उल्लेखस्य द्वितीयः प्रकारः—

यत्र ग्रहीत्रनेकत्वेऽसत्यपि विषयाश्रयसमानाधिकरणादीनां संबंधिनामन्यतमानेकत्वप्रयुक्तमेकस्य वस्तुनोऽनेकप्रकारत्वम्, तत्र द्वितीयोल्लेखः। यथा—

दीनव्राते दयार्द्रा निखिलरिपुकुले निर्दया किं च मूढा
काव्यालापेषु तर्कप्रतिवचनविधौ कर्कशत्वं दधाना।
लुब्धा धर्मेष्वलुब्धा वसुनि, परविपद्दर्शने कांदिशीका
राजन्नाजन्मरम्या स्फुरति बहुविधा तावकी चित्तवृत्तिः॥

अत्र दीनव्रातादीनां विषयाणामनेकत्वाच्चित्तवृत्तेरनेकत्वम्। राजविषयकरतिभावोपस्कारकतयाऽलङ्कारः। अयं शुद्धः। संकीर्णो यथा—

उपरि करवालधाराकाराः क्रूरा भुजङ्गमपुङ्गवात् ।
अन्तः साक्षाद् द्राक्षादीक्षागुरवो जयन्ति केऽपि जनाः ॥

अत्रोपमाव्यतिरेकाभ्यां तयोः समुच्चयेनोत्प्रेक्षया च सङ्कीर्णः ।

द्वयोर्भेदः—पण्डितराजस्य दृष्ट्यां प्रथमोल्लेखे ज्ञानसमूहस्यालङ्कारत्वं, द्वितीयोल्लेखे च प्रकारसमूहस्य । तेषां शब्देषु—

"प्रथमनिरूपितोल्लेखप्रकारे तत्तद्ग्रहीतृकतत्तत्प्रकारकज्ञानसमुदायस्य चमत्कारजनकताया अनुभवसिद्धत्वेनालङ्कारत्वम् । द्वितीये तु प्रकारे 'यः शिष्टेषु सदयः दुष्टेषु करालः' इत्यादौ तत्तद्विषयभेदभिन्नस्य प्रकारसमुदायमात्रस्य तथात्वम् । इति ।

## स्मरणालङ्कारः

सादृश्यज्ञानोद्बुद्धसंस्कारप्रयोज्यं ( तन्मूलकं न तु तज्जन्यं ) स्मरणम्-स्मरणालङ्कारः । किमपि वस्तु दृष्ट्वा यत् तत्सदृशं वस्त्वन्तरं स्मर्यते तच्च स्मरणं रसादीनामुपस्कारकत्वेन सहृदयाह्लादकजनकं तदा स्मरणालङ्कारो भवति ।

अत्र लक्षणे, जन्यत्वमपहाय प्रयोज्यत्वनिवेशेन 'एकीभवद्' इत्यादिपद्ये तल्पनिद्रयोः स्मरणस्य, सादृश्यज्ञानोद्बुद्धसंस्कारजन्यत्वाभावेऽपि, सादृश्यज्ञानोद्बुद्धसंस्कारमूलकत्वेन ( सैन्यं दृष्ट्वा पयोधेः स्मरणं व्यङ्ग्यं, तन्मूलकञ्च तल्पनिद्रयोः स्मरणम् ) नालङ्कारत्वहानिः ।

( १ ) स्मृतेः सादृश्यमूलकत्वे = अलङ्कारता, स्मृतेः व्यञ्जनत्वं = भावना ( स्मृतिभावध्वनित्वमित्यर्थः )

( २ ) सादृश्यमूलकत्वव्यङ्ग्यत्वयोरभावे = वस्तुमात्रता । क्रमेणोदाहरणानि—

( १ ) दोर्दण्डद्वयकुण्डलीकृतलसत्कोदण्डचण्डध्वनि-
ध्वस्तोद्दण्डविपक्षमण्डलमथ त्वां वीक्ष्य मध्येरणम् ।
वल्गद्गाण्डिवमुक्तकाण्ड-वलयज्वालावलीताण्डव-
भ्रश्यत्खाण्डवरुष्टपाण्डवमहो को न क्षितीश स्मरेत् ॥

( ज्वालावल्या उद्धतनृत्येन नश्यत् यत् खाण्डववनं तत्र स्थितं रुष्टम् अर्जुनं न ध्यायेत् )

( २ ) तन्मञ्जु मन्दहसितं श्वसितानि तानि
सा वै कलङ्कविधुरा मधुराननश्रीः ।
अद्यापि मे हृदयमुन्मदयन्ति हन्त,
सायन्तनाम्बुजसहोदरलोचनायाः ॥

( चिन्ताविशेषोऽत्र विभावः, नायकस्य गात्रनिश्चलत्वादय आक्षेपगम्याः— ( न तु वाच्याः सर्वत्र ये ) अनुभावाः । इत्येतैर्व्यक्तः स्मृतिभावः ) ।

( ३ ) दरानमत्कन्धरबन्धमीषन्निमीलितस्निग्धविलोचनाब्जम् ।
अनल्पनिश्वासभरालसाङ्ग्याः स्मरामि सङ्गं चिरमङ्गनायाः' ॥

( अत्र सादृश्यज्ञानाभावात् , चिन्तोद्बुद्धसंस्कार प्रयोज्यत्वेऽपि नालङ्कारता, अपितु वस्तुमात्रता ) ।

## भ्रान्तिमतः ( भ्रान्तेः ) अलङ्कारस्य विवेचनम्

सदृशे धर्मिणि ( न तु मीलित-सामान्य-तद्गुणालङ्कारवत् सदृशे धर्मे ) तादात्म्येन धर्म्यन्तरप्रकारकोऽनाहार्यः ( न तु रूपकबोधवत् कल्पितः ), सादृश्य-प्रयोज्यः ( न तु 'अकरुणहृदय प्रियतम मुञ्चामि त्वामितः परं नाहम्' इत्यादि प्रकटितोन्मादवद् वियोगादिमहाविपत्तिजन्यः अतस्मिंस्तबुद्ध्यात्मकः ) चमत्कारी ( कविप्रतिभोत्थितः ) निश्चयः ( न तु सन्देहवत् सामान्यज्ञानात्मकः )=प्रकृते ( अलङ्कारप्रकरणे ) भ्रान्तिः ( अलङ्कारशास्त्रप्रसिद्धभ्रान्तिपदार्थः ) सा च ( भ्रान्तिः ) पशुपक्ष्यादिगता यस्मिन् वाक्येऽनूद्यते स भ्रान्तिमान् अयं निश्चय-श्चैको विवक्षितः । अन्यथाऽनेकनिश्चयस्थले तूल्लेखस्य प्रसङ्गः स्यात् ! तथा चाहुः—( प्रमात्रन्तरधीः भ्रान्तिरूपा यस्मिन्ननूद्यते स भ्रान्तिमानिति ख्यातोऽ-लङ्कारे त्वौपचारिकः ) ।

अतोऽत्र भ्रान्तिमात्रम् ( लक्षणे घटितः ) अलङ्कारः । भ्रान्तिमानलङ्कार इति व्यवहारस्त्वौपचारिकः ।

उदाहरणम्—

"कनकद्रवकान्तिकान्तया मिलितं राममुदीक्ष्य कान्तया ।
चपलायुतवारिदभ्रमान्ननृते चातकपोतकैर्वने ॥"

अत्र चातकगतहर्षोपस्कारकतया तद्गता ( सीतायुक्ते रामे गता ), भ्रान्तिः ( विद्युत्सहितमेघस्य निश्चयः ), सादृश्यप्रयोज्यत्वाच्चमत्कारित्वाद्-अनाहार्यत्वाच्च, अलङ्कारसंज्ञां लभते ।

यत्तु उत्तरोत्तरभ्रान्तौ दीक्षित उदाजहार—

शिञ्जानैर्मञ्जरीति स्तनकलशयुगं चुम्बितं चञ्चरीकै-
स्तत्त्रासोल्लासलीलाः किसलयमनसा पाणयः कीरदष्टाः ॥
तल्लोपायालपन्त्यः पिकनिनदधिया ताडिताः काकलोकै-
रित्थं चोलेन्द्रसिंह ! त्वदरिमृगदृशां नाप्यरण्यं शरण्यम् ॥

अत्र पण्डितराजेन मार्मिकी समालोचना कृता यया दीक्षितस्य अविशेषज्ञत्वं पद्यनिर्मातुश्च असामर्थ्यं स्फुटमुपलक्ष्यते । तथाहि—

( १ ) स्तनकलशयुगे मञ्जरीसादृश्यं न कविसमयप्रसिद्धम् । अतस्तन्मूला भ्रमराणां भ्रान्तिरयुक्तोपनिबद्धा । दोषान्तरवशात् । न च कविप्रतिभया यदि भ्रमराणां तादृशी भ्रान्तिस्तदा नासावलङ्कारः, अपितु भ्रान्तिमद् वाक्यमेव केवलम् ।

( २ ) स्तनयुगे कलशरूपकस्य योजनेन, मञ्जरीभ्रान्तिरूपं सादृश्यमूलकम्, अलङ्कारान्तरं सहृदयान् उद्वेजयति । सादृश्यमूलकाऽलङ्कारे तद्विध एव ( सादृश्य-मूलकः ) अपरोऽलङ्कारो न शोभते । यथा 'मुखकमलं तव चन्द्रवत् प्रतीमः' इत्यत्र । प्रत्युतकलशरूपकेण मञ्जरीसादृश्यस्य तिरस्कार एव ।

( ३ ) पाणयः कीरदष्टाः इत्यत्र विधेयस्य अविमर्शः । कीरैः दष्टाः—इत्यनेन भाव्यम् ।

( ४ ) 'पिकनिनदधिया' इत्यस्य स्थाने 'पिकनिकरधिया' इत्यनेन भाव्यम् , यतः पिका एव काकानां ताडनयोग्याः; न तु पिकनिनदाः । न च पिकनिनदभ्रम आलपन्तीषु ( स्त्रीषु ) सम्भवति, सादृश्यप्रयोज्याभावात् । किं च पिकानां कूजि-तादिपदैरेव, शब्दो वर्ण्यते न तु सिंहदुन्दुभ्यादिशब्दप्रयोगयोग्यैः निनदादिभिः ।

( ५ ) पुनश्च प्रथमद्वितीयचरणस्थाभ्यां विशेषणाभ्यां सह 'त्वदरिमृगदृशाम्' इति षष्ठ्यन्तं पदं, व्यवहितमपि जातान्वयमपि यथाकथञ्चिद् अन्वेतुं शक्यते ।

किन्तु तृतीयचरणस्थेन 'आलपन्त्य:' इति विशेषणेन सह 'त्वदरिमृगदृशाम्' इत्यस्य विशेष्यस्यान्वयो दुरुपपाद एव। एष चान्वयो वक्तुरभिमतः। न चैष निष्पन्नः पद्ये। अतोऽत्र 'अभवन्मतसम्बन्धो दोषः। विभक्तिपरिणामेन (आलपन्तीनाम् इति रूपेण विभक्तिपरिणामेन) तद्दोषनिरासेऽपि भग्नप्रक्रमताऽसंष्ठुलताभ्यां दोषाभ्यामाक्रान्तमेव पद्यमेतत्।

दीक्षितैस्तु भ्रान्त्यलङ्कारस्यांशमात्रमादाय पद्यमेतदुदाहृतमिति दिक्।

## परेषां लक्षणानां खण्डनम्

(१) दीक्षितस्य—

'कविसम्मतसादृश्याद् विषये (उपमेये) विहितात्मनि।
आरोप्यमाणानुभवो यत्र स भ्रान्तिमान् मतः॥'

इति लक्षणं न साधु। रूपकव्यावृत्तये 'पिहितात्मनि' इति विषयविशेषस्य व्यर्थत्वात्। यतो, न हि रूपकवाक्ये आरोप्यमाणस्य उपमानस्यानुभवो वर्ण्यते किन्तु सोऽनुभवस्तु रूपकवाक्याज्जायते। रूपकवाक्ये पूर्वोक्तलक्षणेनातिव्याप्तौ निरस्तायामपि रूपकेऽतिव्याप्तिर्न निरस्यते यतो दीक्षितस्य लक्षणं भ्रान्तिमतः (भ्रान्तियुक्तस्य) वाक्यस्यास्ति। ननु, लक्षणेऽस्मिन्ननुभवान्तं (आरोप्यमाणानुभवः) भ्रान्तेर्लक्षणम्, अग्रिमं च भ्रान्तिमतः (वाक्यस्य)। एवं च रूपकेऽतिव्याप्तिनिरासाय 'पिहितात्मनि इत्यंशः संगच्छते' इति चेन्न, अनुभवत्वघटितस्य भ्रान्तेः अनुभूयमानाभेदात्मके रूपके कथमपि प्रवृत्तिर्न युज्यते। सन्देहालङ्कारे (यत्र 'मरकतमणिमेदिनीधरो वा तरुणतरस्तरुरेष वा तमालः' इत्यादौ उपमेयभूतो रामादिः पिहितात्मैवास्ति), उल्लेखालङ्कारे (यत्र 'कमलमिति चञ्चरीकाः, चन्द्र इति चकोरास्त्वन्मुखमनुधावन्ति' इत्यादौ, उपमेयो निह्नुतस्वरूपो भवत्येव) च, अतिव्याप्तिर्भविष्यति।

भ्रान्त्या संकीर्ण उल्लेख इति चेत्, न हि एतावता, उल्लेखांशस्य, अतिव्याप्तिर्नास्तीति (दोषो नास्ति इति), शक्यते वक्तुम्। दोषस्तु लक्षणे तदापि स्थास्यति। 'दुग्धजलभागानां व्यामिश्रता अस्ति' एतावता दुग्धलक्षणं जलांशातिव्याप्तिकं कर्तुं न शक्यते।

( १ ) 'सादृश्याद् वस्त्वन्तर-प्रतीतिर्भ्रान्तिमान्' इत्यलङ्कारसर्वस्वकारविहितं लक्षणमपि न साधु, संशयोत्प्रेक्षयोरतिव्याप्तेः। प्रतीतिपदस्य निश्चयपरत्वे, रूपकज्ञाने-अतिव्याप्तिः। 'विषयतावच्छेदकानवगाहिनी प्रतीतिः'—इति लक्षणपरिष्कारे अतिशयोक्तिज्ञानेऽतिव्याप्तिः।

## भ्रान्त्यलङ्कारे साधारणधर्मस्थितिः

( १ ) 'कनकद्रवकान्तिकान्तया' इत्यादिपद्ये सीतातडितोः बिम्बप्रतिबिम्बभावः।

( २ ) रामं स्निग्धतरश्यामं विलोक्य वनमण्डले।
धाराधरभिया धीरं नृत्यन्ति स्म शिखावलाः॥

इत्यादौ स्निग्धश्यामत्वयोरनुगामित्वम्।

## अपह्नुतिविवेकः

उपमेयतावच्छेदकनिषेधसामानाधिकरण्येन आरोप्यमाणम् उपमानतादात्म्यम्—अपह्नुतिः। यस्मिन्नधिकरणे मुखत्वादेर्निषेधः शब्दतोऽर्थतो वा प्रतिपाद्यते तस्मिन्नेवाधिकरणे चन्द्रादेरुपमानस्य तादात्म्यमारोप्यते। 'मुखचन्द्र' इत्यादिरूपके तु मुखत्वचन्द्रयोरेकाधिकरणवृत्तिताप्रतीतेः—अविरोधः। 'चन्द्रधिया चकोरास्त्वन्मुखमभिधावन्ति' इति भ्रान्त्यलङ्कारेऽपि तयोरविरोध एव। अपह्नुतौ तु तयोर्विरोधो गम्यते।

( १ ) 'स्मितं नैतत् किन्तु प्रकृतिरमणीयं विकसितं
मुखं ब्रूते मूढः, कुमुदमिदमुद्यत्परिमलम्।
स्तनद्वन्द्वं मिथ्या, कनकनिभमेतत्फलयुगं
लता रम्या सेयं भ्रमरकुलनम्या न रमणी॥'

इति श्लोके, उपमेयतावच्छेदकीभूतानां स्मितत्वादीनां निषेधसम्बन्धिष्वधिकरणेषु ( स्मितादिषु ) उपमानभूतानां विकासादीनां तादात्म्यमारोपितमस्ति एषाऽपह्नुतिः। सा चात्र सावयवा। साध्यसाधकभावापन्नानामवयवानां समूहोऽत्र प्राप्यते।

(२) "श्यामं सितञ्च सुदृशो न दृशोः स्वरूपं
किं तु स्फुटं गरलमेतदथामृतं च।
नो चेत् कथं निपतनादनयोस्तदैव
मोहं मुदं च नितरां दधते युवानः॥

एषा निरवयवा। 'नो चेत्' इत्यादिना बाधकहेतो रूपवर्णनात्–हेत्वपह्नुतिः।

अस्मिन्नलङ्कारे क्वचिन्नञादिभिः साक्षात्, क्वचित् परमतसिद्धत्वाद्युपन्यासैश्च भ्रान्त्याद्यलङ्कारव्यवधानेन निषेधे बोध्यमाने प्रायशो वाक्यस्य भेदः। यथा पूर्वोक्तयोरुदाहरणयोः। यत्र पुनः मिषच्छलच्छद्मकपटव्याजादिशब्दैर्निषेधः, तत्र वाक्यस्यैक्यम्। यथा—'वदने विनिवेशिता भुजङ्गी पिशुनानां रसनामिषेण धात्रा' इत्यादौ। क्वचिदपह्नवपूर्वकत्वं, क्वचिदारोपपूर्वकत्वं, क्वचित्ताद्रूप्यनिषेधयोरेकस्य शाब्दत्वम्–अपरस्यार्थत्वं, क्वचिदुभयोः शाब्दत्वम्, आर्थत्वं क्वचित्तयोः, क्वचित् पुनः विधेयत्वम् अनुवाद्यत्वञ्चेत्यनेके तस्याः प्रकाराः।

अपह्नुतिध्वनेरुदाहरणम्—

दयिते रदनत्विषां मिषादयि, तेऽमी विलसन्ति केसराः।
अपि चालक (च+अलक) वेशधारिणो मकरन्दस्पृहयालवोऽलयः॥

अत्र 'नैता रदनत्विषः, किन्तु किञ्जल्कपरम्पराः'। न चैतेऽलकाः, अपि त्वलयः, इति द्वे अपह्नुती प्राकट्येन निवेदिते। ताभ्यां 'न त्वं नारी किं तु कमलिनी' इति तृतीयापह्नुतिः। व्यञ्जनव्यापारेण निवेद्यते।

दीक्षितास्तु—

त्वदालेख्ये कौतूहलतरलतन्वीविरचिते
(उत्कंठावशात् चपलया कृशाङ्ग्या, निर्मिते तवालेख्ये सति),
विधायैका चक्रं रचयति सुपर्णीसुतमपि।
अपि स्विद्यत्पाणिस्त्वरितमपमृज्यैतदपरा
करे पौष्पं चापं मकरमुपरिष्टाच्च लिखति॥

इति पद्यम् अपह्नुतिध्वनित्वेन प्राहुः। अत्र 'नायं साधारणः पुरुषः, किन्तु पुण्डरीकाक्षः' इत्येकया 'नायं विष्णुरपि तु मन्मथः' इत्यपरया व्यञ्जितम्। तत्र विचार्यते अपह्नुतेर्द्वौ भागौ—उपमेयनिषेधः, उपमानारोपश्च। तयोर्मध्ये, उपमाना

रोपभागस्तु 'पुण्डरीकाक्षोऽयम्' इत्याकारकः, चक्रसुपर्णलेखनेनाभिव्यङ्क्तुं शक्यः किन्तु द्वितीयो भागः 'नायं साधारणः पुरुषः' इत्याकारो नास्त्यत्र व्यञ्जकाभावात्।

ननु 'तादात्म्यारोपो निषेधमन्तरेण दुर्घट' इति चेन्न। "मुखं चन्द्रः" इत्यादि-रूपके निषेधमन्तरेणैव तादात्म्यारोपो भवति। यदि निषेधमन्तरेण तादात्म्यारोपो न स्यात्तदा रूपकस्यैवोच्छेदो जायते। श्लोकस्योत्तरार्धे 'नायं पुण्डरीकाक्षः' 'अपि तु मन्मथः' इति निषेधतादूप्ये स्तः, तथापि नेयमपह्नुतिः, "प्रकृतस्य (उपमेयस्य) निषेधेन यदन्यस्य प्रकल्पनम्' इति दीक्षितलक्षणस्यैव तत्रासत्त्वात्, यतो नास्त्यत्र विष्णोः प्रकरणम् अपि तु राज्ञः। एवं दीक्षितजगन्नाथयोर्लक्षणस्य विचक्षणधिया पालनं क्रियेत यदि, तदा पूर्वोक्तं पद्यं 'राजा पुण्डरीकाक्ष' इत्याकारक-रूपकस्योदाहरणमेव भवितुं शक्नोति नापह्नुतेः। यदि च 'अपह्नुतिः अपह्नुत्य किञ्चिदन्यार्थसूचनम्' इति दण्डिकृतं लक्षणं (यत् स्वयं चित्रमीमांसायां दीक्षितैः खण्डितम्) स्वीक्रियेत तदाऽत्र पद्ये अपह्नुतिरपि स्वीकर्तुं शक्यते।

## पर्यस्तापह्नुतिविषये, पण्डितराजस्य मतम्

कुवलयानन्दे दीक्षितैः—'अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिस्तु सः।'

इति लक्षणमभिधाय। 'नायं सुधांशुः किं तर्हि, सुधांशुः प्रेयसीमुखम्' इत्युदाहरणं प्रादायि! तत्रायं विरोधो जगन्नाथस्य यदसौ नेममलङ्कारमनुमनुते, उदाहरण-लाभाभावात् पुनश्चास्मिन् भेदे, अपह्नुतेः सामान्यं लक्षणं न संगच्छते।

'प्रकृतं (उपमेयं) यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः।' विषयापह्नवे वस्त्वन्तरप्रतीतावपह्नुतिः' इति मम्मटालङ्कारसर्वस्वकारलक्षणयोः, उपमेय-निषेधस्य (उपमेयापह्नवस्य), अपह्नुतावावश्यकता सूच्यते। 'नायं सुधांशुः' इत्यादौ तावदुपमेयस्य (प्रेयसीमुखस्य) नास्ति निषेधोऽपह्नवो वा। चित्र-मीमांसायां स्वयं दीक्षितैर्विहितम्—

"प्रकृतस्य निषेधेन यदन्यत्वप्रकल्पनम्।
साम्यादपह्नुतिर्वाक्यभेदाभेदवती द्विधा॥

इति लक्षणमपि नात्र प्रवर्तते। तस्मादत्र काव्ये दृढारोपं रूपकमेव स्वीकर्तुं युज्यते नापह्नुतिः।

विमर्शिनीकारस्यापीदमेवाभिमतम्। यतोऽसौ 'न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते'। इत्यत्र विषस्य निषेधपूर्वकं ब्रह्मस्वविषये आरोप्यमाणत्वात्, इदारोपं रूपकमेव नापह्नुतिरिति स्पष्टमेवोवाच। अपि च यदि 'नायं सुधांशुः' इत्यत्र पर्यस्तापह्नुतिरुच्यते तदा तत्र दीक्षितकृतस्य रूपकलक्षणस्य ('बिम्बाविशिष्टे निर्दिष्टे, विषये यद्यनिह्नुते। उपरञ्जकतामेति विषयी, रूपकं तदा' इत्यस्य) अतिव्याप्तिदुर्वारैव यतो ह्यस्मिन् लक्षणे 'अनिह्नुतत्वम्' इति विशेषणम् उपमेयस्य वर्त्तते। तच्चानिह्नुतत्वम् प्रकृतोदाहरणम् उपमेयस्य स्पष्टमेव दृश्यते। युक्त एव चायं विरोधः, यतो बहुमतानुसारेण रूपकस्यैवेदमुदाहरणम्। अथापि चित्रमीमांसायां प्राचीनमतानुसारेण रूपकलक्षणम्, कुवलयानन्दे च दण्डिरत्नाकराद्यनुसारेण अपह्नुतित्वोक्तिरिति सामञ्जस्यं विधेयम्।

## उत्प्रेक्षा·स्वरूपम्

उत्प्रेक्षालक्षणे पंडितराजैन्यायदर्शनवर्णितस्य अभावपदार्थस्य प्रयोगो विहितः। अभावस्य च द्वौ प्रकारौ तेनोपात्तौ (१) अन्योन्याभावः येन द्वयोर्धर्मिणोः अभेदसंबंधेन, अभिन्नता वार्यते। (२) अत्यन्ताभावः—येन द्वयोः पदार्थयोः शाश्वती भिन्नता (समवायसंबंधेन) निर्दिश्यते, अन्योन्याभावो द्वयोर्धर्मिणोरेव भवति यथा घटपटयोः। अत्यन्ताभावश्च—एकस्मिन् धर्मिणि अन्यजातीयस्य धर्मस्यापि संभवति। यथा वायौ रूपाभावः, 'ब्रह्मणि मोहाभावो वा। एवं लक्षणस्य द्वौ प्रकारौ संजातौ—(क) तद्भिन्नत्वेन (चन्द्राद्युपमानभिन्नत्वेन) प्रमितस्य (ज्ञातस्य) पदार्थस्य (मुखादेः) रमणीयतद्वृत्तितद्धर्मसंबंधनिमित्तकं (रमणीयं चमत्कारकम्, तस्मिन् मुखादौ वृत्तिः विद्यमानता यस्य तत् यत् आह्लादिकत्वादि, तस्य तद्धर्मसंबंधनिमित्तकं = चन्द्रादिधर्मसंबन्धप्रयुक्तं) तत्त्वेन चन्द्रत्वादिना संभावनमुत्प्रेक्षा। अर्थात् तयोः द्वयोः पदार्थयोर्विद्यमानं कञ्चित् सुन्दरं धर्मं निमित्तीकृत्य कृता संभावना = उत्प्रेक्षा। [अत्र लक्षणे त्रयः तच्छब्दाः प्रयुक्ताः। प्रथमेन विषयी (उपमानं), द्वितीयेन विषयः, तृतीयेन पुनर्विषयी धर्त्तव्यः। संभावनम् = ज्ञानविशेषः] इयं संभावना अभेदसंबंधेनास्ति, अतो धर्म्युत्प्रेक्षा। यथा 'नूनं मुखं चन्द्रः' इत्यत्र मुखचन्द्रवर्त्ति, आह्लादिकत्वादिकं सुन्दरं धर्मं निमित्तीकृत्य कृता मुखस्य चन्द्रत्वेन संभावना,

अथवा 'तनयमैनाकगवेषण' इत्याद्याख्यायिकायां गङ्गाया हिमालयभुजत्वेन संभावना। यथा गङ्गायां शैत्यं श्वैत्यं च स्तः तथैव हिमालयेपि अतः तस्य भुजेऽपि। एवमेव 'भुजा गवेषणस्य साधनमस्ति' इति ज्ञानाद् भुजाया लंबीकरणत्वस्य जलधिजठरप्रविष्टत्वस्य च फलोत्प्रेक्षा क्रियते। एषा फलोत्प्रेक्षा च गङ्गाहिमालयभुजयोः साधारणधर्मनिमित्तीकरणे स्वरूपोत्प्रेक्षाया अङ्गत्वं व्रजति। ( भुजे एतौ धर्मौ फलोत्प्रेक्षया सम्पादितौ गङ्गायाश्च सहजावेव ) इत्थं गङ्गायाः ( विषयस्य ) हिमालयभुजत्वेन ( विषयित्वेन = तत्त्वेन ) सम्भावना।

( १ ) तदभाववत्त्वेन ( मोहादेरत्यन्ताभावयुक्तत्वेन ) प्रमितस्य पदार्थस्य रमणीयवत्समानाधिकरणतद्धर्मसम्बन्धनिमित्तकं ( रमणीयम् सुन्दरम् तत्समानाधिकरणं ब्रह्मादि समानाश्रयं कविपरम्पराविदितम् अविचार्यकारित्वादिकम् तस्य तद्धर्मसंबंधनिमित्तकं मोहादिधर्मसंबंधप्रयुक्तम् ) तद्वत्त्वेन ( मोहादियुक्तत्वेन ) संभावनम्। उत्प्रेक्षा। यथा—

निधिं लावण्यानां तव खलु मुखं निर्मितवतो,<br>
महामोहं मन्ये सरसिरुहसूनो ( कमलजस्य ) रुपचितम्।<br>
उपेक्ष्य त्वां यस्माद् विधुमयमकस्मादिह कृती (अकस्मात्=ससंभ्रमतायां),<br>
कलाहीनं दीनं विकल इव राजानमकरोत् ( चन्द्रं निर्मितवान् )॥

राजानम्=सर्वश्रेष्ठम्। ( अस्याः कल्पनायाः, मूलभूता, चन्द्रस्य राजेति संज्ञास्ति ) विकलो विधिः 'त्वन्मुखं राजपदयोग्यम् चन्द्रो वा तत्पदयोग्यः' इति विवेक्तुं नाशकदिति भावः। अत्र—मोहाभाववत्त्वेन ज्ञातस्य ब्रह्मणो मोहसमानाधिकरणरमणीयाविचार्यकारित्वरूपधर्मसंबन्धं निमित्तीकृत्य, मोहवत्त्वेन संभावना। इयं च समवायसंबंधेन। अतो धर्मोत्प्रेक्षा।'

लक्षणस्य प्रतिपदव्यावृत्तिप्रदर्शनम्—( १ ) 'तद्भिन्नत्वेन प्रमितस्य' इति वचनेन संभावनायाम् आहार्यता ( बाधकालिकेच्छाजन्या कल्पना ) सिद्ध्यति। 'लोकोत्तरप्रभाव त्वां मन्ये नारायणं परम्' इत्यत्र नास्ति उत्प्रेक्षा यतोऽसामान्ये राजनि अलौकिकप्रभाववशाद् अनाहार्या ( सत्या ) नारायणत्वसंभावनात्रास्ति। नारायणत्वं काममसत्यं परं नारायणत्वसंभावना तु सत्यैव। अनया आहार्यतया

'रामं स्निग्धतरश्यामं विलोक्य वनमण्डले।<br>
प्रायो धाराधरोऽयं स्यादिति नृत्यन्ति केकिनः॥'

इति संभावनायामपि नास्ति लक्षणस्य अतिप्रसङ्गः । अर्थात् नास्त्यत्रोत्प्रेक्षा । इत्थमेव 'धाराधरधिया धीरं नृत्यन्ति स्म शिखावलाः' इति पंक्तिपरिवर्त्तनोद्भूता भ्रान्तिः नास्ति बाधकालिकेच्छाजन्या यतो बाधितार्थविषयकेण इच्छाजन्येन ज्ञानेन न भवितुं शक्नोति नर्तनप्रवृत्तिर्मयूराणाम् ।

( ३ ) रमणीयतद्वृत्तितद्धर्मसंबंधनिमित्तकमिति कथनेन 'वदनकमलेन बाले' इत्यत्र जगज्जयसंभावनायां नातिप्रसङ्गः साधारणधर्माभावात् । स्मितं साधारणधर्मो भवितुं न शक्नोति यतस्तन्न जगद्रूपस्य संभावनायाः विषयस्य धर्मः, न च विजित-स्वरूपस्य संभावनायाः विषयिणः । एवं

"प्रायः पतेद् द्यौः शकलीभवेद् ग्लौः, सहाचलैरम्बुधिभिः स्खलेद् गौः ।
नूनं ज्वलिष्यन्ति दिशः समस्ता यद् द्रौपदी रोदिति हा हतेति ॥"

स्वर्गपतनसंभावनायामपि नातिप्रसङ्गः । रोदनकारणीभूतकेशग्रहणादिजन्यं पापं, न स्वर्गस्य ( संभावनाया विषयस्य )। न च पतनत्वस्य ( संभावनायाः विषयिभूतस्य ) साधारणधर्मः । रमणीयत्वविशेषणोपादानात् 'प्रायः स्थाणुना अनेन भवितव्यं, नूनं पुरुषेणानेन भाव्यं 'दूरस्थोऽयं देवदत्त इव भाति' इत्यादौ निश्चलत्वचञ्चलत्वादिसाधारेणधर्मनिमित्तायां संभावनायां नातिव्याप्तिरिति बोद्धव्यम् ।

सा चोत्प्रेक्षा द्विविधा वाच्या प्रतीयमाना च । नूनमित्यादिभिः व्यञ्जाचार-क्रियादिभिश्च सहिता—वाच्या । प्रतिपादकशब्दरहितसामग्रीयुता—प्रतीयमाना । प्रत्येकं सापि त्रिविधा । स्वरूपोत्प्रेक्षा हेतूत्प्रेक्षा फलोत्प्रेक्षा चेति । एतदवधेयम् । प्रतीयमानोत्प्रेक्षा ( गम्योत्प्रेक्षा ) व्यङ्ग्योत्प्रेक्षाया भिन्ना । अस्यां केवलं सामग्री-बलादर्थप्राप्तोत्प्रेक्षाया एव वर्णनमिष्यते । यत्र बह्वय उत्प्रेक्षाः स्युस्तत्र विधेयत्वेन स्थिता उत्प्रेक्षैव वक्तव्या ।

## मुख्या उत्प्रेक्षाः

( १ ) जातिगुणक्रियाद्रव्यरूपाणां पदार्थानां जातिगुणक्रियाद्रव्यात्मकैः, निमित्तभूतैः धर्मैः यथासंभवं जातिगुणक्रियाद्रव्यात्मकेषु विषयेषूत्प्रेक्षणं = स्वरूपो-त्प्रेक्षा । तत्र अभेदेन संबंधेन धर्मिस्वरूपोत्प्रेक्षेति ज्ञेयम् ।

प्राचीना मम्मटभट्टादयः 'संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्' इति लक्षयित्वा उत्प्रेक्षायां सर्वत्र अभेदसंबन्धेनैव संभावनामुररीकुर्वन्ति न संबन्धान्तरेण ।

ननु 'निधिं लावण्यानाम्' इत्यादौ 'अस्यां मुनीनामपि मोहमूहे' इत्यादौ च धर्मस्वरूपोत्प्रेक्षायां का गतिः, तत्र मुनिरूपे धर्मिणि मोहरूपधर्मस्य, समवायेन संभावनायाः प्रतीयमानत्वादिति चेन्न। तत्रापि मुनिकर्तृकविलोकनादौ मोहस्य तादात्म्येनैवोत्प्रेक्षणात्। एवं 'लिम्पतीव तमोऽङ्गानि' इत्यत्र न कर्त्तरि, लेपनकर्तृत्वादेरुत्प्रेक्षणम्, किन्तु व्यापनादावेव लेपनादि उत्प्रेक्ष्यते। इत्थं सर्वत्र धर्मोत्प्रेक्षास्थले प्राचीनाभिमतलक्षणसंगतिरवसेया। पंडितराजस्तु लक्षणनिर्माणस्य पुरुषाधीनतया 'सर्वत्र, अभेदेनैवोत्प्रेक्षणम् भवेत्' इत्यत्र नास्ति मानम्। 'अस्यां मुनीनां' 'लिम्पतीव' इत्यादौ समवायादिना (संबन्धान्तरेणैव) उत्प्रेक्षणम् इति सरलं पन्थानमाविष्करोति।

(२) क्रियास्वरूपोत्प्रेक्षा—

कालिन्दजानीरभरेऽर्धमग्ना बकाः प्रकामं कृतभूरिशब्दाः।
ध्वान्तेन वैरादु विनिगीर्यमाणाः क्रोशन्ति मन्ये शशिनः किशोराः॥

इत्यत्र बकेषु (विषयेषु) शशिकिशोराणां (विषयिणाम्) तादात्म्येन संभावनमिति प्रथमं धर्म्युत्प्रेक्षा। ततः 'मन्ये क्रोशन्ति' इति क्रियाप्रतिपाद्या धर्मोत्प्रेक्षा मुख्या। तत्र धर्म्युत्प्रेक्षायां श्वैत्यरूपो धर्मो निमित्तम्। धर्मोत्प्रेक्षायां च (अँधेरे ने श्वैत्य को निगल लिया है) श्वैत्यसमानाधिकरणो निगरणत्वरूपो धर्मो निमित्तम्। किन्तु अयं धर्मो नोभयगतः अपितु शशिकिशोरगत एव। अतस्तस्य धर्मस्य, बकेषु संपत्तये, प्रथमं शशिकिशोरतादात्म्यम् उत्प्रेक्ष्यते।

(३) जातिफलोत्प्रेक्षा—

दिवानिशं वारिणि कण्ठदघ्ने दिवाकराराधनमाचरन्ती।
वक्षोजतायै किमु पक्ष्मलाक्ष्यास्तपश्चरत्यम्बुजपङ्क्तिरेषा॥

अत्र जलावस्थानं तपश्चरणक्रियात्वेनाध्यवसिता तस्याश्च क्रियाया वक्षोजत्वजातिरूपं फलमुत्प्रेक्ष्यते। निमित्तमिह मसृणत्वसमानाधिकरणं समानाकारत्वमेव मन्तव्यम्।

'अस्यां मुनीनामपि मोहमूहे, भृगुर्महान् यत् कुचशैलशीली।
नानारदाह्लादि मुखं श्रितोरुर्व्यासो महाभारतसर्गयोग्यः॥'

यत्=यतः, महान्=पूज्यः, भृगुः=एकः ऋषिः ( वस्तुतः विशालो विशिष्टाकारः पर्वतभागः ) दमयन्तीस्तनपर्वतसेवकः । मुखं=दमयन्तीवदनम् अनारदाह्लादि न अपितु अवश्यं नारदाह्लादकं ( वस्तुतः नानाविधैः दन्तैः आह्लादि )। तथा महाभारतस्य सृष्टि-निपुणः ( वस्तुतः महाभाः=महाकान्तिः, अथ च संभोगस्य सृष्टौ उचितः ) व्यासः=तन्नामा मुनिः ( वस्तुतोऽर्थः-विस्तारः ) श्रितोरुः=दमयन्त्या ऊरुयुगलं श्रितः । तस्मात् अस्यां=दमयन्त्यां मुनीनां=भृग्वादीनाम् अपि मोहम्=मुग्धताम्, ऊहे=तर्कयामि । अत्र मुनिकर्तृक-विलोकनादौ ( दमयन्तीविषयक ) मोहस्य विषयिणः संभावना । यतो ह्येषा साध्यवसानास्ति, अतो विषयस्य ( दर्शनादेः ) अनुपादानं संगच्छते, तदङ्गास-कवृत्तित्वं निमित्तधर्मोऽस्ति ।

इयमपि पद्यस्यास्य प्राक्तनमतानुसारिणी व्याख्या । पण्डितराजस्यात्रेदमस्ति वचनं यत्—

## शाब्दबोधः

रसगङ्गाधरे, शाब्दबोधमधिकृत्य विपुलो विस्तारो व्यधायि पण्डितराजेन । यद्यपि काव्यशास्त्रजिज्ञासूनामयमतीव नीरसायते, काव्यस्य प्रमुखतत्त्वैः साकञ्च नास्ति कश्चित्प्रत्यक्षः संबंधस्तस्य तथापि रसगङ्गाधराधिकारिभिस्तस्य नितरामुपेक्षा नैव गरीयसी । मनोरमाकुचमर्दनतुल्यग्रन्थानां रचयिता जगन्नाथो व्याकरणदर्शनयो-रपि पारदृश्वाऽनूनान आसीत् । शाब्दबोप्रक्रियायाः संक्षिप्तः सारोऽधस्ताद्दीयते ।

परिभाषा—वाक्यान्तर्गतपदानां तदर्थानाञ्च यः संबंधस्तमधिकृत्य वाक्यान्त-र्गतपदानामभिधया लक्षणया वा योऽर्थस्तस्य सम्यग्बोधं एव शाब्दबोधः कथ्यते ।

### नैयायिकवैयाकरणानां मतभेदः—

शाब्दबोधविषये नैयायिकवैयाकरणानामयमस्ति मतभेदो यन्नैयायिकाः कृतिं यत्नं वा तिङ्प्रत्ययस्यार्थत्वेन मन्यन्ते यत्नस्याश्रयं प्रथमान्तपदार्थञ्च मुख्यविशे-ष्यत्वेन । वैयाकरणास्तु कर्त्तारं तिङ्प्रत्ययस्यार्थं भणन्ति व्यापारञ्च मुख्यविशेष्य-त्वेनाङ्गीकुर्वन्ति । यथा 'गज इव गच्छति' इत्यत्र नैयायिकधिया गजपदस्य गजकर्तृकगमने लक्षणा । वर्त्तमानकालिकगजकर्तृकगमनानुकूलव्यापारानुकूल-

कृतिमान् देवदत्तादिक इति बोधाकारः। वैयाकरणदृष्ट्या तु वर्त्तमानकालिक-देवदत्ताभिन्नाश्रयवृत्तिः, गजकर्त्तृकगमनानुकूलव्यापारसदृशो गमनानुकूलो व्यापार इति शाब्दबोधः।

### सादृश्यस्य स्वरूपविषये नैयायिकमीमांसकानां मतभेदः—

'चन्द्र इव सुन्दरं मुखम्' इत्यादौ चन्द्रमुखोभयवृत्तिसौन्दर्यात्मकसमानधर्म एव सादृश्यं न तु पदार्थान्तरमिति वदन्ति नैयायिकाः। मीमांसकास्तु 'समान-धर्मः सादृश्यस्य साधकः केवलं, सादृश्यं तु तदतिरिक्तं पदार्थान्तरमि'ति प्रतिपाद-यन्ति। इदं मतवैभिन्न्यमाश्रित्य शाब्दबोधस्यापि प्रकारद्वयम्। यथा—'अरविन्द-सुन्दरम्' इत्यत्र नैयायिकमतेन, लक्षणयाऽरविन्दसमानधर्मः प्रतीयते। तस्य चाभेदेन (तादृरूप्यसंबंधेन) सुन्दरपदार्थैकदेशेन सुन्दरत्वेनान्वयः। मीमांसक-दृष्टिकोणेन तु पूर्वमरविन्दनिरूपितसादृश्यप्रयोजकं लक्ष्यते। तच्च सुन्दरपदार्थैक-देशेन सौन्दर्येण सममभेदसंसर्गेणान्वेति। तेन, 'अरविन्दनिरूपितसादृश्यप्रयोजका-भिन्नसौन्दर्यवदभिन्नम्' इति शाब्दबोधः।

### परम्परितरूपके रूपकस्यौचित्यम्—

ननु 'सौन्दर्यचन्द्रिकाचन्द्रो राजा' इत्यादौ परम्परितरूपके कथं रूपकत्वम्? अभेदारोपस्य सत्त्वेऽपि तस्य सादृश्यमूलकत्वाभावादिति चेन्न। समर्थकस्य रूपक-स्यारोपेण धर्मैक्यसंपादने सादृश्यस्य निर्विघ्नत्वं स्वीकरणीयम्।

### व्यधिकरणरूपके शाब्दबोधः—

'मीनवती नयनाभ्यां करचरणाभ्यां प्रफुल्लकमलवती।
शैवालिनी च केशैः सुरसेयं सुन्दरी सरसी॥'

इत्यादौ व्यधिकरणरूपकविशेषस्थले तृतीयाया अभेदार्थकत्वात्तस्य च (अभे-दार्थस्य) 'सौजन्यचन्द्रिकाचन्द्र' इत्यत्र प्रतिपादितया दिशा, प्रतियोगित्वमुखस्या-र्थवशादन्वये 'नयननिष्ठाभेदप्रतियोगिमीनवती' इति शाब्दबोधः। मीनवत्त्वञ्च स्वाभिन्नद्वारकम्। अर्थात् सुन्दरी मीनवतीरूपेण तदैव संभाव्यते यदा नयनयोर्मी-नाभिन्नत्वं ज्ञायेत। एतत्स्फोरणायैव नयनाभ्यामित्युक्तम्। मीनाभिन्ननयनवतीति तु पर्यवसितम्। यदि मीनेषु नयनप्रतियोगिकाभिन्नत्वं मन्येत तदा सुन्दर्यां सरसीरूपकं न भवति, प्रत्युत सरस्यां सुन्दरीरूपकमिति।

## परिणामे बोधाकारः

'हरिनवतमाल' इत्यत्र 'भगवदभिन्नतमाल' इति निर्विवादैव धीः। 'आवं आवं वचःसुधाम्' इत्यत्र वचनाभिन्नां सुधामिति बोधाकारः। 'अहीनचन्द्रा लसताऽऽननेने'त्यत्र व्यधिकरणपरिणामेऽभेदस्य तृतीयार्थकत्वाल्लसदाननाभिन्नहीनेतरचन्द्रयुक्तेति शाब्दधीः।

### उदाहरणालङ्कारे बोधाकारः—

'अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति।
निखिलरसायनराजो गन्धेनोग्रेण लशुन इव॥'

इत्यत्रोदाहरणलक्ष्ये वैयाकरणमतेन— अमितगुणपदार्थकर्तृकमेकदोषहेतुकं निन्दाविषयीभवनं, निखिलरसायनराजलशुनकर्तृकोग्रगन्धहेतुकनिन्दाविषयीभवनावयवकमिति बोधः। प्रथमान्तविशेष्यकबोधवादिनां नैयायिकानां दृष्ट्या च—उग्रगन्धहेतुकनिन्दाविषयीभवनाश्रयतादृशलशुनावयवकस्तादृशपदार्थः, एकदोषहेतुकनिन्दाविषयीभवनाश्रय इति धीः।

### क्रियोत्प्रेक्षायां शाब्दबोधाकारः—

'कलिन्दजानीरभरेऽर्धमग्ना बकाः प्रकामं कृतभूरिशब्दाः।
ध्वान्तेन वैराद् विनिगीर्यमाणाः क्रोशन्ति मन्ये शशिनः किशोराः॥'

इत्यत्र क्रियास्वरूपोत्प्रेक्षायां नैयायिकधिया— कलिन्दजानीरार्द्धमग्नकृतभूरिशब्दोभयाभिन्ना बका ध्वान्तनिगीर्यमाणशशिकिशोरोभयाभिन्नाः क्रोशनक्रियानुकूलव्यापारवन्त इवेति बोधाकारः।

व्यापारमुख्यविशेष्यकबोधवादिनां वैयाकरणानां दृष्ट्या च—अभेदेन क्रोशनक्रियोत्प्रेक्षा। तत्र शाब्दे (शब्दनात्मके) वृत्ते, बकविशेषणतया प्रतीयमानमपि शब्दनं विषयतयाऽवतिष्ठते, अध्यवसानवशात्। शब्दकर्तृष्वेव शब्दनस्याध्यवसानेन निर्वाहादित्यर्थः। क्रोशनक्रियायाञ्च तादृशबका विशेषणम्। तादृशबकेषु चाभेदेन तादृशशशिकिशोराः, न तु शशिकिशोरा एव साक्षात्क्रियायाम्। तथा सति बकानामन्वयस्यासङ्गतेः। (उत्प्रेक्षास्वरूपविवेचनं सावहितमवलोकनीयं पूर्वपृष्ठेषु)।

## अभिधायाः स्वरूपम्

निर्विकारस्य सच्चिदानन्दस्वरूपिणो ब्रह्मणो मायाशक्तिरिव शब्दब्रह्मणः शक्तित्रयमङ्गीक्रियन्ते प्राधान्येन ( १ ) अभिधा ( २ ) लक्षणा ( ३ ) व्यञ्जना चेति। शब्दो यदा साक्षात्संकेतितमर्थमभिधत्ते तदा तस्य ( साक्षात्संकेतितार्थस्य ) प्रतीतिरभिधाव्यापारेण स्वीक्रियते तादृशोऽयमर्थश्च 'अभिधेयः' इति 'वाच्यः' इति वाभिधीयते। यदि कश्चिच्छब्दः स्वमुख्यार्थं प्रबाध्य, रूढिवशात्प्रयोजनवशाद्वा कञ्चिदन्यमर्थं बोधयति, तस्य प्रतीतिर्लक्षणाशक्त्या मन्यते, तादृशोऽर्थश्च 'लक्ष्यः' इति कथ्यते। यत्र च शब्दः प्रकरणादिवशाद्वाच्यार्थलक्ष्यार्थयोः प्रतीतिं प्राधान्येनाविधाय सर्वथा नवीनमर्थमभिव्यनक्ति तदा, तस्य नितान्तं नवीनस्यार्थस्य प्रतीतिर्व्यञ्जनाव्यापारेणाङ्गीक्रियते स चार्थो 'व्यङ्ग्यः' इति 'प्रतीयमानः' इति वोच्यते।

**संकेतग्रहः—**

यया शक्त्या शब्दस्य साक्षात्संकेतितार्थस्य बोधो भवति सा शक्तिरभिधेति कथ्यते, तद्युक्तः शब्दश्च 'वाचकः' इति। यथा 'गौः' इतिशब्दः सास्नादिमन्तं पशुविशेषं बोधयति। अत्र 'गौः' इत्यस्मिन् शब्देऽभिधाव्यापारः। एष शब्दश्च सास्नादिमत्पशुविशेषरूपार्थस्य वाचकः। वाचकशब्दः सदा स्ववाच्यार्थमेव बोधयति। लक्ष्यार्थव्यङ्ग्यार्थयोः प्रतीतेः पूर्वमपि मुख्यार्थस्यैव प्रतीतिर्जायते तदनन्तरमेव तस्य बाधनादिकं भवति। एवं शब्दशक्तिविवेचनप्रसङ्गे संकेतस्य प्रमुखं स्थानम्। ननु कोऽस्ति संकेतस्य प्रमुख आधारः? भारतीयदार्शनिकविचारधारानुसारेण संकेतस्य प्रधानाधारोऽस्तीश्वरेच्छा। ईश्वर एव सृष्टिकाले शब्दानां,-तदीयसाक्षात्संकेतितार्थानाञ्च मुख्यं संबंधं स्थापयामास। पारिभाषिकशब्दानां संकेतग्रहस्तु शास्त्रकारेच्छाश्रित एव। परम्परागतः शब्दसंकेतोऽनादिः। आधुनिकाः संकेतास्तु पारिभाषिकाः। अतस्ते शास्त्रकारैर्निहिताः। यथा—'ईकारान्ता ऊकारान्ताश्च शब्दा नदीसंज्ञकाः स्युरिति पाणिनिना विहितः संकेतः। प्रतिद्धो नव्यनैयायिको गदाधरभट्टाचार्यः स्वशक्तिवादे लिखति—

"इदं पदममुमर्थं बोधयत्विति, अस्मात्पदादयमर्थो बोद्धव्य इति चेच्छा संकेतरूपा वृत्तिः। तत्राधुनिकसंकेतः परिभाषा, तया चार्थबोधकं पदं पारिभाषिकं,

यथा शास्त्रकारादिसंकेतितनदीवृद्ध्यादिपदम् । ईश्वरसंकेतः शक्तिस्तया चार्थबोधकं पदं वाचकम् यथा गोत्वादिविशिष्टबोधकं गवादिपदम् । तद्बोध्योऽर्थो गवादिः = वाच्यः । स एव मुख्यार्थ इत्युच्यते ।"

'गौः तिष्ठति' इत्युच्चारिते, गौरिति शब्दः कमर्थं बोधयति ? पुरो दृश्यमानां व्यक्तिं, जातिं वेत्येनं प्रश्नमादाय भारतीयदार्शनिकानामनेकानि मतानि येषां प्रधानानि निम्नतो वर्ण्यन्ते—

( १ ) व्यक्तिशक्तिवादी मन्यते यद् 'घटमानय' इत्युच्चारणोपरान्तमस्माकमादेशपालको घटविशेषमानयति । अतो व्यक्तावेव संकेतः ।

( २ ) ज्ञानशक्तिवादिनां मते शब्दस्य संकेतो न व्यक्तौ न जातौ न च ज्ञानविशिष्टव्यक्तौ, किन्तु ज्ञाने । 'घट' इति प्रोक्ते सर्वप्रथमा शक्तिर्घटशब्दस्य ज्ञानमात्रेऽस्ति न तु व्यवहारगते स्थूले विषये । "पदानां ज्ञाने शक्तिरित्येतन्मते" शक्तिवादः ( परिशिष्टकाण्डम् ) । स्थूलविषयस्य प्रतीतिस्तु पदज्ञानानन्तरम् अभिधया भवति ।

( ३ ) बौद्धदार्शनिका अपोहवादं प्रतिपादयन्ति । गौरिति प्रोक्ते धेन्वतिरिक्ताः सर्वे पदार्था निराक्रियन्ते तस्मिन्नवशिष्टे पदार्थ एव चास्माकं शब्दार्थबोधो भवति । बौद्धा जातिरूपं सामान्यं पदार्थं न मन्यन्ते प्रत्येकं पदार्थञ्च क्षणिकं गदन्तीति तैरपोहवादस्य कल्पना कृता । सामान्यपदार्थस्य निरासाय क्षणिकतावादसिद्धान्तपरिपोषणाय चापोहवादं मन्यन्ते, यतो हि ते कमपि पदार्थं नित्यत्वेन नैवाङ्गीकुर्वन्ति । अन्यपदार्थनिराकरणे योऽवशिष्यते तस्य पदार्थस्य, क्षणिकत्वे परिवर्त्तनशालित्वेऽपि, दीपकलिकायामिव, नदीप्रवाह इव वा स्थायित्वभ्रान्तिः संपद्यते । तथा चोक्तं—

"अपोहो वा शब्दार्थः कैश्चिदुक्तः । जातेरदृष्टत्वेन विचारासहत्वाद् व्यक्तेश्च क्षणिकत्वादुभयत्रापि संकेतस्य कर्त्तुमशक्यत्वाद् गवादिशब्दानामगवादिव्यावृत्तिरूपोऽर्थ इति वैनाशिकमतम्" ( काव्यप्रकाश-बालबोधिनी ) ।

( ४ ) नैयायिकानां मते संकेतस्य ग्रहो, जातिविशिष्टायां व्यक्तौ मन्यते । न्यायसूत्रे मतमिदं व्याचक्षाणा गौतममुनयः प्राहुः—'व्यक्त्याकृतिजातयस्तु

पदार्थः।' अत्रैकवचनप्रयोगो द्योतयति जातिविशिष्टव्यक्तौ संकेतग्रहम्। जगदीश-तर्कालङ्कारः शब्दशक्तिप्रकाशिकेतिनामधेये ग्रन्थे प्राह—

"जात्यवच्छिन्नसंकेतवती नैमित्तिकी मता।
जातिमात्रे हि संकेताद् व्यक्तेर्भानं सुदुष्करम् ॥"

यथा धूमं दृष्ट्वा वह्नेरनुमितिः क्रियते तथैव गौरितिवचने गौरयं शब्दो जातिविशिष्टव्यक्तेरर्थं बोधयति। अस्य जात्यंशं बोधयितुं नेष्यतेऽभिधानाम्नी काचिच्छक्तिः स्वीकर्त्तुम्, प्रमाणाभावात्।

( ५ ) मीमांसका अभिधया, जातौ संकेतग्रहमामनन्ति। पदैर्जातौ संकेतो न तु व्यक्तौ। काव्यप्रकाशे मण्डनमिश्रमतस्योल्लेखः। तदनुसारेण अभिधाशक्ति-र्जातिमेव बोधयति। तद्बोधनोपरान्तं सा क्षीयते, शब्दबुद्धिकर्मणां व्यापारस्य क्षणैकस्थायित्वात्। द्वितीये क्षणे लक्षणया गोत्वविशिष्टा व्यक्तिर्बोध्यते। 'विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे' इति न्यायात्। अस्य मतस्य खण्डनमपि मम्मटेन विहितम्। तथा च इत्युपादानलक्षणा तु नोदाहर्त्तव्या। नह्यत्र प्रयोजन-मस्ति न वा रूढिरियम्। व्यक्त्यविनाभावात्तु जात्या व्यक्तिराक्षिप्यते, यथा क्रियतामित्यत्र कर्त्ता, कुर्वित्यत्र कर्म, प्रविश-पिण्डीमित्यादौ गृहं-भक्षयेत्यादि च।

( ६ ) वैयाकरणमतेन—शब्दस्य संकेतग्रह उपाधौ। यदा वयं कस्यचित्पदार्थ-विशेषस्य बोधं कारयामस्तदा न केवलं व्यक्तेरेव बोधने, जातिमात्रस्य वा बोधनेऽस्माकमभिप्रायो भवति किन्तु जातिगुणक्रियाद्रव्याणां चतुर्णामेव बोधने। एषां चतुर्णां ग्रहणं वैयाकरणमतेनोपाधिशब्देन विधीयते। सूक्ष्मेक्षिकया जात्यादीनि चत्वारि वस्तूनि संश्लिष्टतया तस्मिन्नेव पदार्थे लभ्यन्ते यथा गौः शुक्लश्चलो डित्थ इत्यत्र। व्यक्तिमात्रे संकेताच्चतुर्णामप्यर्थो गोव्यक्तिरेव स्यात्। तथोक्तम्—

"यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथाप्यानन्त्याद् व्यभिचाराच्च तत्र संकेतः कर्त्तुं न युज्यते, इति गौः शुक्लश्चलो डित्थ इत्यादीनां विषयविभागो न प्राप्नोतीति च तदुपाधावेव संकेतः।" ( काव्यप्रकाशः )

उपाधेः द्वौ भेदौ ( १ ) वस्तुधर्मः ( २ ) वक्तृयदृच्छासन्निवेशितश्च। गौः शुक्लश्चल इति त्रयं वस्तुधर्मे सन्निवेश्यन्ते। डित्थ इति चान्त्ये भेदे।

"गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः।"

( इति पतञ्जलिः )

## संकेतस्य प्रकाराः

नैयायिकानां मते संकेतस्य त्रयो भेदाः सन्ति—( १ ) पारिभाषिकम्, (२) नैमित्तिकम्, ( ३ ) औपाधिकम् । "यत्रार्थे यन्नाम, आधुनिकसंकेतवत्तदेव पारिभाषिकम् यथा पित्रादिभिः पुत्रादौ संकेतितं चैत्रादि यथा वा शास्त्रकृद्भिः सिद्धभावादौ पक्षतादि । जातिवाच्यताशक्तिमन्नाम नैमित्तिकं यथा गो-गवयादि । यदुपाध्यवच्छिन्नशक्तिमन्नाम तदौपाधिकं यथाकाश-पश्वादि ।"

( शब्दशक्तिप्रकाशिका )

## भर्तृहरिकृतौ भेदौ

भर्तृहरिमते संकेतस्य द्वौ भेदौ ( १ ) आजानिकः। (२) आधुनिकश्च। आजानिको नित्य आधुनिकश्च कादाचित्को भवति । कादाचित्कस्य प्रयोगः शास्त्रकारैः परिभाषादिषु विधीयते ।

नियामकानि तत्त्वानि—वाक्यपदीयमितिनामके ग्रन्थे, भर्तृहरिः शब्दार्थस्य ज्ञाने संयोगादीननेकान् हेतून् निर्दिदेश—

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥

यथा—'सशंखचक्रो हरिरि'त्यत्र विष्णोरेव शङ्खचक्राभ्यां सह संयोगः । अतो हरिरिति पदस्यार्थो विष्णुरिति । एवमशङ्खचक्रो हरिरित्यत्र विप्रयोगवशाद् विष्णुरित्यर्थ एव बोध्यते । 'कुपितो मकरध्वजः' इत्यत्र कोपरूपाल्लिङ्गात्कामदेवस्य ग्रहणं न तु समुद्रस्य, तस्य तादृशलिङ्गस्याभावात् । आदिना चेष्टादीनामपि ग्रहणं कार्यम् । आचार्यो हेमचन्द्रः काव्यानुशासनमित्यभिधे ग्रन्थे, आदिनाऽभिनयादीनपि जग्राह ।

"आदिग्रहणादभिनयोपदेशनिर्देशसंज्ञेङ्गिताकारा गृह्यन्ते ।"

( काव्यानुशासनम् )

## शक्तिग्रहस्य साधनानि

प्राक्तनाचार्यैः शक्तिग्रहस्याष्टसाधनानि निगदितानि । तथाहि प्रोक्तम्—

'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।'

वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

व्याकरणं यथा वर्त्तमाने लटः प्रयोगः शक्तिग्राहकः । सिद्धपदसान्निध्यम्—यत्र एकं पदं दृष्ट्वाऽपरार्थो गम्यते । यथा 'अत्र मधूनि मधुकरः पिबति' इत्यत्र मधुना पुष्परसार्थो गृह्यते न तु मद्यममृतं वा । एष बोधो मधुकरपदस्य सान्निध्यवशादेव । इत्थमन्यत्रापि ।

## सङ्केतस्य विषये पाश्चात्त्यानां विचारः

पाश्चात्त्यैः साहित्यशास्त्रविज्ञैरपि संकेतग्रहमधिकृत्य बहूनि मतानि प्रकटितानि । अरस्तू–मिलमहोदयानां विवृत्तिस्तत्र नायकायते । मिलमहोदयः संकेतग्रहस्त्रिषु वस्तुषु मन्यते । ( १ ) व्यक्तौ ( २ ) सामान्ये ( ३ ) विशेषणे ।

"The only names of objects which cannot proper things are proper names and these have strictly speaking no significance" etc. "A system of Logic"

किन्तु पाश्चात्त्यानां विवेचनं न तादृशं वैपुल्यं वैदुष्यञ्चावहति यथा भारतीयविपश्चिताम् ।

## अभिधाया विषये पण्डितराजस्य विचाराः

शब्दविशेषादर्थविशेषस्य बोधो भवतीति सर्वेषामनुभवसिद्धं वस्तु । स चार्थस्तेन शब्देन, असंबद्धो न संभवति, अन्यथा घटात्पटप्रत्ययोप्यापतेत् । अतः शब्दार्थयोः परस्परं कश्चन संबन्धविशेषः स्वीकार्यः । तथा च 'यस्यार्थस्य, येन शब्देन संबन्धविशेषस्तिष्ठति तेन पदेन सोऽर्थः प्रत्याय्यते' इति नियमे फलिते नातिप्रसङ्गः । स एव शक्तिपदप्रतिपाद्यः शब्दार्थयोः संबन्धविशेषोऽभिधोच्यते । 'अभिधीयते = उच्यतेऽनया' इति व्युत्पत्तियोगादभिधा नाम ।

"शक्त्याख्योऽर्थस्य शब्दगतः शब्दस्यार्थगतो वा संबन्धविशेषोऽभिधा।" शब्दार्थयोर्बोधकबोध्यभावरूपः=अभिधापदार्थः। स च संबन्धविशेषोऽर्थप्रतियोगिकः शब्दानुयोगिकः शब्दप्रतियोगिकोऽर्थानुयोगिको वेत्यत्रैकतरपक्षपातियुक्तिरूपा विनिगमना नास्तीत्युभयविधोऽपि तादृशः संबन्धोऽभिधापदार्थतया मतः।

## वृत्तिवार्त्तिककारस्य खण्डनम्

यत्तु वृत्तिवार्त्तिके 'शक्त्या प्रतिपादकत्वमभिधा' इति दीक्षितैरुक्तं तत्तुच्छम्। प्रतिपादकत्वम्=प्रतिपत्तिहेतुत्वम्, तस्य ज्ञानं न प्रतिपत्तौ कारणम्। यतः 'शब्दस्य शब्दार्थबोधस्य कारणम्' इत्येतावन्मात्रबोधेन कस्यचिच्छब्दार्थस्य ज्ञानं न भवति। अतः कथं नाम प्रतिपादकत्वमभिधेत्युच्यते। यदि च प्रतिपादकत्वपदस्य प्रतिपत्त्यनुकूलव्यापाररूपमर्थं गृहीत्वा, तस्य (तादृशव्यापारस्य) ज्ञानं प्रतिपत्तेरुपयोगीति भण्यते तथापि नास्ति निस्तारः। लक्षणस्यावयवेन 'शक्त्ये'त्यनेन शब्दगताऽर्थगता वा काचिच्छक्तिः प्रतिपत्तिहेतुतया विवक्षिता सैवाभिधेति दशायाम् 'अभिधया प्रतिपादकत्वमभिधा' इति लक्षणं पर्यवसन्नम्। एवं स्फुटैवासङ्गतिरात्माश्रयश्च दोषः।

शक्तिस्त्रिविधास्ति। (१) केवलसमुदायशक्तिर्यस्या डित्थादिकमुदाहरणम्। (२) केवलावयवशक्तिर्यस्याः पाचक-पाठकादीन्युदाहरणानि। (३) समुदायावयवशक्तिर्यस्याः पङ्कजादीन्युदाहरणानि। एता एव रूढ–योग–योगरूढशब्दैर्व्यपदिश्यन्ते।

## भेदानां विषये विदुषां विचाराः

अत्र केचिद्–'अश्वगन्धारसं पिबेत्' इत्यादिषु विषयविशेषे (औषधार्थे) केवलसमुदायशक्तिः। 'अश्वगन्धा वाजिशाला' इत्यादिषु तु केवलयोगशक्तिः। केवलत्वविशेषितयोः प्रथमद्वितीयभेदयोरुभयत्रापि समुदायावयवशक्त्योरेकशब्दाश्रयत्वे कथं प्रसक्तिरिति तु न शङ्क्यम्। अत्र तादृशशक्त्योः कैवल्यमेवास्ति यतो नास्त्यत्र, उभयशक्तिवेद्ययोरर्थयोरन्वयः। स्वस्वक्षेत्रे तयोः कैवल्यमेव।

कैवल्यं तु अन्वयायोग्यार्थबोधकत्वम्। योगरूढौ यो भवति संकरः सोऽन्वय-योग्यार्थबोधकयोर्भवतीति नास्त्यत्र तस्य प्रसक्तिः।' इति प्राहुः।

अन्ये तु 'अश्वकर्णादिशब्देषु नाभिधायाः प्रथमद्वितीययोर्विधयोः प्रसक्तिः, कैवल्यविरहात्। परन्तु संकरस्य द्वौ भेदौ-योगरूढिर्यौगिकरूढिश्चेति। प्रथमस्योदाहरणं पङ्कजादिशब्दाः। द्वितीयस्य च अश्वगन्धाऽश्वकर्णादयः।' इत्याचक्षते।

'चतुर्थ एवायमभिधाया भेदो यौगिकरूढिनामकः' इत्यपि वदन्त्यन्ये।

## वैयाकरणानां मतम्

'अखण्डा एव हि शब्दाः। तत्र समासेषु पदानां कृत्तद्धिततिङन्तेषु च प्रकृतिप्रत्ययानां विभागः काल्पनिक एवेति कुत्रास्ति योगशक्तिः, विशिष्टस्य विशिष्टार्थे रूढेरेवाभ्युपगमात्। एषास्ति शाब्दिकानां सिद्धान्तभूता सरणिः। तथा च तेषामुक्तिः—

'पदे न वर्णा विद्यन्ते, वर्णेष्ववयवा न च।
वाक्ये पदानामत्यन्तं प्रविभागो न विद्यते ॥' इत्यादि।

एवञ्च योगशक्तेरवसर एव नास्ति। अभिधाया रूढ्याख्य एक एव भेद इति तात्पर्यम्।

केवलसमुदायशक्तिस्वीकारे यदि क्वचित्पुनरुक्त्यापातस्तदा लक्षणया निर्वाहो विधेयः। यथा—

'गीष्पतिरप्याङ्गिरसो गदितुं ते गुणगणान् सगर्वो न।
इन्द्रः सहस्रनयनोऽप्यद्भुतरूपं परिच्छेत्तुम् ॥'

इत्यत्र गीष्पतिपदस्य लाक्षणिकत्वे स्वीकृते, लक्षणया वाणीरूपोऽर्थो गृह्यते तस्य च 'आङ्गिरसः' इतिपदस्य रूढ्यर्थेन बृहस्पतिना सहान्वयो भविष्यति।

## लक्षणायास्तुलनात्मकाध्ययनपुरःसरं स्वरूपविवेचनम्

शब्दस्य शक्तिषु लक्षणाशक्तेर्महदस्ति महत्त्वम्। यत्र शब्दस्य मुख्यार्थः (साक्षात्संकेतितार्थः) बाध्यते (सङ्गतिमन्वयञ्च वा न लभते) तत्र तेन सम्बद्धो-

ऽपरोऽर्थो गम्यते, रूढिवशात् प्रयोजनवशाद्वा। एतादृशस्यार्थस्य बोधयित्री शक्तिर्लक्षणोच्यते तादृशो बाध्यतामापन्नः शब्दश्च लाक्षणिकः। लक्षणायां त्रीणि तत्त्वानि निरपवादमिष्यन्ते मम्मटादीनां मतेन—(१) मुख्यार्थबाधः = वाच्यार्थस्य प्रकरणेऽसङ्गतिः। (२) तद्योगः = वाच्यार्थेन लक्ष्यार्थस्य सम्बद्धत्वम्। (३) रूढिः (लोकव्यवहारारूढो लक्ष्यार्थप्रयोगः) प्रयोजनं (वक्तुर्विशिष्टार्थस्य प्रतिपिपादयिषा) वा।

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनाद्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणाऽऽरोपिता क्रिया॥ (मम्मटः)
मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता॥ (विश्वनाथः)

लक्ष्यार्थः शब्दस्यारोपितार्थो भवति। लक्षणायां, पूर्वोक्तानां तत्त्वानां दण्डचक्रादिन्यायेन त्रयाणां मिलितत्वेन हेतुता भवति न तु पृथक्तया तृणारणिमणिन्यायेन। वृत्तिवार्त्तिककारोऽप्पयदीक्षितो 'मुख्यार्थसंबन्धेन शब्दस्य प्रतिपादकत्वं लक्षणात्वमाह। रूढिप्रयोजनयोः स्वरूपं काव्यप्रकाशे विस्तरशो व्याख्यातम्। तथाहि—

'कर्मणि कुशलः' इत्यादौ दर्भग्रहणाद्ययोगाद् 'गङ्गायां घोषः' इत्यादौ च गङ्गादीनां घोषाद्याधारत्वासंभवान्मुख्यार्थस्य बाधे सति विवेचकत्वादौ (रूढिस्थले) सामीप्यादौ च (प्रयोजनस्थले) संबन्धे, लोकप्रसिद्धिवशात् पावनत्वादिद्योतनरूपप्रयोजनवशाच्च मुख्येन (कुशग्रहणत्वार्थेन घोषाद्याधारत्वार्थेन च) अमुख्यो (दक्षार्थः, तटार्थश्च) लक्ष्येत। ईदृशेषु स्थलेष्वयमारोपितः शब्दव्यापारो लक्षणा कथ्यते।

हेमचन्द्रविश्वनाथौ रूढां लक्षणां स्वीकुरुतः। किन्तु 'कुशलः' इत्युदाहरणं नाङ्गीकुरुतः। विश्वनाथः 'कलिङ्गः साहसिकः' इत्युदाहरणं वक्ति। केचित्तु रूढां लक्षणां न स्वीकुरुतः, यथाह विश्वनाथः—"केचित्तु 'कर्मणि कुशल' इति रूढावुदाहरन्ति तदन्ये न मन्यन्ते, कुशग्राहिरूपार्थस्य व्युत्पत्तिलभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वात्।"

सेयं लक्षणा प्रथमं द्विविधा (१) गौणी (२) शुद्धा च। तत्र गौणी द्विविधा (क) सारोपा (ख) साध्यवसाना च। शुद्धा चतुर्विधा (क) सारोपा सोपदाना (ख) साध्यवसाना सोपदाना (३) सारोपा सलक्षणा (४) साध्यवसाना सलक्षणा। इत्थं षड्विधा प्रयोजनवती निरूढा चैकविधेति सप्तविधा लक्षणा।

प्रयोजनवतीलक्षणाया भेदोपभेदानां विवेचनं विस्तरेण काव्यप्रकाशे लभ्यते। तद्यथा—'आरोप्यमाण आरोपविषयश्च यत्रापह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा=सारोपा लक्षणा। आरोपविषये विषयिणा निगीर्णे सति=साध्यवसाना। एवञ्च—

स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा॥

'कुन्ताः प्रविशन्ति' इत्यादौ कुन्तादिभिः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते तत उपादानेनेयं लक्षणा 'गङ्गायां घोषः' इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गाशब्दः स्वार्थमर्पयति। इत्येवमादौ लक्षणेनैषा लक्षणा। उभयरूपा चेयं शुद्धा, उपचारेणामिश्रितत्वात्।

गौणीलक्षणाया इमावारोपाध्यवसानरूपौ सादृश्यहेतू भेदौ गौर्वाहीक इत्यत्र गौरयमित्यत्र च। अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्ति, यद्वा स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते न तु परार्थोऽभिधीयत इति केचिद्, अथवा साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यत इत्यपरे।

शुद्धाया भेदद्वयस्य (१) आयुर्घृतम्, (२) आयुरेवेदम् इत्युदाहरणे स्तः। तत्र सादृश्यादन्यत्कार्यकारणभावादिसंबन्धान्तरम्।

यतो ह्येते भेदाः प्रयोजनवतीलक्षणायाः सन्तीत्यतोऽत्रैतदवधेयं यत्सर्वेषु स्थलेषु किञ्चित्प्रयोजनमनिवार्यतया तिष्ठति। गौणीभेदयोः (सारोपासाध्यवसानात्मकयोः) प्रयोजनद्वयम्। तत्र 'गौर्वाहीकः' इत्यत्र भेदेऽपि ताद्रूप्यप्रतीतिः। 'गौरयम्' इत्यत्र तु सर्वथैवाभेदावगमः। एवमेव शुद्धाया भेदयोरपि प्रयोजनद्वयम्। यथा 'आयुर्घृतम्' इत्यत्र, अन्यवैलक्षण्येन कार्यकारित्वादि। 'आयुरेवेदम्'

इत्यत्र च सर्वथैवाभेदावगमः। इत्थं, सारोपासोपदानायाः सारोपासाध्यवसानाया-श्चोदाहरणेष्वपि तैक्ष्ण्यादीनि प्रयोजनानि सन्तीति वक्ष्यते। एषु षट्सु भेदेषु प्रथमे चत्वारो भेदा रूपकातिशयोक्तिरूपेण परिणमन्ति। अन्तिमयोर्द्वयोर्ध्वन्याश्रयता मता, यस्य वर्णनमग्रे विधास्यते।

## व्यङ्ग्यार्थाश्रितौ लक्षणाया भेदौ

व्यङ्ग्यार्थदृष्ट्या लक्षणाया द्वौ भेदौ (१) अव्यङ्ग्या (रूढौ) (२) सव्यङ्ग्या (प्रयोजने) चेति। सव्यङ्ग्यायाः पुनर्द्वावुपभेदौ (१) गूढव्यङ्ग्या, (२) अगूढव्यङ्ग्या चेति। तत्र प्रथमस्योदाहरणं यथा—

मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं
समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः।
उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं
बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते॥

इत्यत्र विकसितत्वादीनां स्मितादिष्वनुपपत्तेर्लक्षणया, उन्मुक्तत्वाद्यर्थः। नायिकायां वैचित्र्यरामणीयकादिप्रदर्शनञ्च प्रयोजनम्। अपरो यथा—

'श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम्।
उपदिशति कामिनीनां यौवनमद एव ललितानि॥'

इत्यत्रोपदेशस्य प्रकाशने लक्षणा। अनायासरतिविलासोत्पत्तिश्च प्रयोजनम्। तच्च विदग्धाविदग्धोभयसहृदयसाधारणम्।

अप्पयदीक्षितकृता भेदाः—

(१) वृत्तिवार्त्तिककारोऽप्पयदीक्षितः प्रयोजनवतीलक्षणायाः सप्तभेदान् व्याजहार—

'जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा, सारोपा, साध्यवसाना च, शुद्धा गौणी च। इत्येवं सप्तविधा फललक्षणा।' वृत्तिवा० पृ० १६। अत्र दीक्षितो जहदजहल्लक्षणानामकं भेदमतिरिक्तत्वेन जग्राह। दीक्षितस्येयं कल्पना नास्ति मौलिकी। अद्वैतवेदान्ते ग्रहणमस्या उपलभ्यते। तत्र 'तत्त्वमसि' इत्यस्य सिद्धयेऽस्याः स्वीकृतिरिष्यते।

## (२) विश्वनाथकृता भेदाः—

साहित्यदर्पणप्रणेता विश्वनाथोऽशीतिविधां लक्षणां प्रतिपादयामास। 'एवमशीतिप्रकारा लक्षणा' सा० द० पृ० ७४ (लक्ष्मी-संस्करणम्)। अस्मिन्मतेऽयमस्त्यपरो विशेषो यदत्र रूढिलक्षणाया अप्यष्टौ भेदा मताः। प्राञ्चो लक्षणायाः पदगतत्वमेवाङ्गीकुर्वन्ति किन्तु विश्वनाथो वाक्यगतत्वमपि। किन्तु तदपेक्षया मम्मटस्य वर्गीकरणमेवाधिकं गरीयो नात्र संशयावकाशः। विश्वनाथस्य भेदप्रतिपादनप्रयासोऽपि निष्फल एव यतो रूढिलक्षणायां नास्ति वक्तुः किमपि स्वातन्त्र्यम्। अत एव 'अभिधावृत्तिमातृके'तिनामग्रन्थे मुकुलभट्टविरचिते, काव्यप्रकाशे च मम्मटभट्टप्रणीते कुमारिलभट्टस्यायं श्लोक उद्धृतः—

'निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्।
क्रियन्ते साम्प्रतं काश्चित्काश्चिन्नैव त्वशक्तितः॥'

## (३) पण्डितराजोक्तं लक्षणास्वरूपम्—

पण्डितराजजगन्नाथमतेन 'शक्यसंबन्धो लक्षणा'। यत्किञ्चिच्छक्यार्थप्रतियोगिको यत्किञ्चिदर्थानुयोगिकः संबंधविशेषो लक्षणापदार्थ इति भावः। अयं संबन्धविशेषः स्थलभेदेन नानाविधः। यथा 'गङ्गायां घोषः' इत्यत्र सामीप्यम्, 'मुखचन्द्रः' इत्यादौ सादृश्यम्, 'उपकृतं बहु तत्र किमुच्यते, सुजनता प्रथिता भवता परम्' इत्यादिविपरीतलक्षणायां विरोधः, 'आयुर्घृतम्' इत्यादौ कारणत्वादयश्च संबन्धाः।

मुख्यार्थान्वयस्यानुपपत्तिर्नास्ति लक्षणाया हेतुः। तथा सति 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र लक्षणानुपपत्तिः स्यात्। काकपदसंकेतितस्यार्थस्य रक्षणक्रियान्वयसंभवत्वात्। अस्ति चात्र लक्षणा, अतो मुख्यार्थान्वयस्यानुपपत्तिरिति हेतुत्वं नाङ्गीकार्यं, दुष्टत्वात्। वस्तुतः (१) तात्पर्यस्यानुपपत्तिः (२) रूढिप्रयोजनयोरन्यतरच्च लक्षणायाः कारणम्। तात्पर्यानुपपत्त्या, मुख्यार्थतावच्छेदकरूपेण, मुख्यार्थप्रतियोगिताया अभावः (न्यूनाधिकतां विना, वक्तुरभीष्टार्थस्योपपत्तेरभावः) बोध्यो न तु मुख्यार्थतावच्छेदके (गङ्गात्वादौ) तात्पर्यविषयान्वितावच्छेदकताया अभावः। अर्थान्नास्त्ययं नियमो यद् गङ्गात्वादौ वक्तुरभीष्टार्थस्यानुपपत्तिदशायां लक्षणा मृग्यते। वस्तुतः गङ्गादिशब्दप्रयोगे वक्तुरस्ति महत्प्रयोजनम्। गङ्गात्वा-

दिरूपेणैव तटादीनां प्रतीतिरिष्यते, यथोक्तं मम्मटाचार्येण—'अनयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यम्। तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ ( तादात्म्यप्रतीतौ ) हि प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः।'

संख्या—

पण्डितराजमतेऽपि लक्षणा सप्तविधैव। तत्र निरूढाया अनुकूलप्रतिकूलानुलोमप्रतिलोमलावण्यादयो नीलादयश्च शब्दा उदाहरणानि। 'धर्मस्यानुकूलम्' इत्यादौ मुख्यार्थस्य ( कूलानुगतादिरूपस्य ) बाधाद् अनादिप्रयोगप्रवाहवशाद् एकवस्तुप्रवणत्वरूपेण सादृश्यात्मना संबंधेनानुगुणादयो लक्ष्यन्ते। एवं 'नीलो घटः' इत्यादौ नीलादेर्गुणवाचकतया सामानाधिकरण्येनान्वयस्यानुपपत्तेः ( गुणगुणिनौ कथं समानविभक्तिकौ ? इत्यस्यां शङ्कायामित्यर्थः) समवायात्मना संबंधेन नीलादिपदैर्गुणिनो लक्ष्यन्ते। तत्र आद्यवर्गे (अनुकूलादिशब्देषु) सादृश्यसंबंधेन, द्वितीयवर्गे च ( नीलादिषु ) तदितरसंबन्धेन ( समवायेन ) प्रवर्त्तनाल्लक्षणाया निरूढाया अपि गौणीत्वशुद्धात्वाभ्यां द्वैविध्यमामनन्ति।

## लक्षणासिद्धान्तस्य प्रतिवादाः

भट्टमुकुल-महिमभट्ट-कुन्तकाचार्याः केवलामभिधावृत्तिमेव शब्दव्यापारत्वेन निगदन्ति।

( १ ) भट्टमुकुलस्य 'अभिधावृत्तिमात्रिका'नाम्नि ग्रन्थेऽन्तिमकारिकायामेतादृशः संकेतो लभ्यते येन लेखकस्य लक्षणाया अभिधाङ्गभिन्नत्वेन स्वीकारेऽरुचिः प्रतीयते—"इत्येतदभिधावृत्तं दशधाऽत्र विवेचितम्"—कारिका १२। अभिधाया दशसु प्रकारेष्वेव लक्षणाया भेदा अपि समावेशिता भट्टमुकुलेन। अभिधाभेदभूताया लक्षणाया विशदवर्णनीयत्वस्य हेतुमवगमयन् भट्टमुकुलः प्राह—

लक्षणामार्गावगाहित्वं तु ध्वनेः सहृदयैर्नूतनतयोपवर्णितस्य विद्यत इति दिशमुन्मूलयितुमिदमत्रोक्तम्।'

( २ ) अपरोऽभिधावादी विख्यातनामा महिमभट्टः। अयं शक्तिमात्रमेव शब्दव्यापारं मन्यते—

'शब्दस्यैकाभिधाशक्तिरर्थस्यैकेव लिङ्गता।' ( व्यक्तिविवेकः )।

महिमभट्टो लक्ष्यार्थमनुमित्याश्रितं वदति । 'गङ्गायां घोषः' इत्यत्र तत्प्रतीतिरनुमितिजन्यैव तन्मतेन । एवं 'गौर्वाहीकः' इत्यत्र साहश्यप्रतीतिरपि । तस्य शब्देषु—

"गोत्वारोपेण वाहीके तत्साम्यमनुमीयते ।
को ह्यतस्मिन्नतत्तुल्ये तत्त्वं व्यपदिशेद् बुधः ॥"

महिमभट्टानुसारेण कोऽपि शब्दोऽभिधावृत्तिं कदापि नैव परिहरति—

'मुख्यवृत्तिपरित्यागो न शब्दस्योपपद्यते'
( व्यक्तिविवेकस्य प्रथमो विमर्शः )

( ३ ) तृतीयोऽभिधावादी कुन्तकमहोदयो गण्यते । यद्यपि कुन्तकः कुत्रचिदपि स्पष्टशब्देषु लक्षणाया निषेधन्न विदधाति तथापि तदीयस्याभिधावादस्य संकेतस्तत्रान्वेष्टुं शक्यते यत्रासौ वक्रोक्तिं विचित्राभिधास्वरूपिणीं व्याहरति—

'वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा ।'
( वक्रोक्तिजीवितम् ) ।

## लाक्षणिकताया विषये पाश्चात्त्यविपश्चितां विचाराः

भाषाया लाक्षणिकप्रयोगानाश्रित्य बहवोऽनर्घा विचाराः पाश्चात्त्यविद्वद्भिराविष्कृताः । अरस्तूमहोदयो लक्षणां चतुर्विधां व्याजहार—( १ ) जातेर्व्यक्तौ (२) व्यक्तेर्जातौ ( ३ ) व्यक्तेर्व्यक्तौ ( ४ ) साधर्म्यगता चेति । साधर्म्यगता यथा—सन्ध्याया दिवसवार्धक्येनोक्तिः, वार्द्धक्यस्य च जीवनसन्ध्यात्वेन भणितिः । आङ्ग्लभाषायामस्या इदमुदाहरणमस्ति—

Yet hath my night of life some memory. (मम जीवनरात्रिः काञ्चित्स्मृतिं वहति । )—

हिन्दीभाषायामस्या उदाहरणत्वेन कामायनीमहाकाव्यस्याधस्तान्लिखिताः पङ्क्तयः—

जब कामना सिन्धु तट आई
ले सन्ध्या का तारा दीप
फाड़ सुनहली साड़ी उसकी
तू क्यों हंसती अरी प्रतीप।
( प्रगृह्य सन्ध्या ज्वलदृक्षदीपकं
यदा समायाति तटं नभोऽम्बुधेः।
विदार्य तस्या अरुणं रुचां तदा
हसस्यमन्दं सितचन्द्रिकामिषात् ॥ )

आलोचकप्रवरस्य रिचर्ड्‌समहोदयस्य मतेन लाक्षणिकता सा गूढशक्तिरस्ति यया काव्ये बहूनि तत्त्वानि, अनुभवगोचरतां यान्ति।

'Metaphor is a semi-surreptitious method by which a great variety of elements can be wrought into the fabric of experience'

—'Principles of Literary Criticism.'

## लक्षणाया ध्वन्याश्रयता

मम्मटादिप्रतिपादितयोर्लक्षणलक्षणोपादानलक्षणयोः स्थाने पंडितराजेन जहत्स्वार्थाऽजहत्स्वार्थाभिधेयलक्षणे अभिमते। लक्षणाया अन्ये भेदा मम्मटादितुल्या एव। प्रयोजनवत्या लक्षणाया भेदेषु चतुर्णां भेदानामलङ्कारात्मना ( रूपकातिशयोक्त्यादिरूपेण ) परिणतत्वाद् द्वौ भेदावेव ध्वन्याश्रयतया स्थितौ—जहत्स्वार्था, अजहत्स्वार्था चेति। तन्मूलौ च ध्वनेर्द्वौ प्रभेदौ—

( १ ) जहत्स्वार्थामूलो ध्वनिर्यथा—

कृतं त्वयोन्नतं कृत्यमर्जितं विपुलं यशः।
यावज्जीवं सखे तुभ्यं दास्यामो विपुलाशिषः॥

इयं कस्यचिदपकारिणं प्रत्युक्तिः। त्वया कृतेऽप्यपकारे परमदुःखजनके मधुरमेव यो वदेन्न परुषं, तस्मिन्=एवंजातीयके, मयि पापमाचरतस्तव पापिष्ठत्वं कथं शक्यते वक्तुमिति व्यङ्ग्यम्।

(२) अजहत्स्वार्थमूलो ध्वनिर्यथा—

बधान द्रागेव द्रढिमरमणीयं परिकरं
किरीटे बालेन्दुं नियमय पुनः पन्नगगणैः।
न कुर्यास्त्वं हेलामितरजनसाधारणधिया
जगन्नाथस्यायं सुरधुनि ! समुद्धारसमयः ॥

अत्र 'जगन्नाथस्य' इत्यनेन शक्यः (जगन्नाथपदस्य मुख्यार्थः) एवानेकपापविशिष्टत्वेन लक्ष्यते। पापानां पदान्तरेणानिर्वाच्यत्वं च व्यङ्ग्यम्।

'कुन्ताः प्रविशन्ति' इति मम्मटादिनिर्दिष्टोदाहरणे व्यङ्ग्यं तैक्ष्ण्यादि कुन्तादिवाच्यार्थगतमेव किन्तु पूर्वोक्तोदाहरणे पापानामनिर्वाच्यत्वं व्यङ्ग्यं नास्ति वाच्यार्थवृत्ति (जगन्नाथव्यक्तिवृत्ति) इत्यवधेयम्।

टिप्पणी—मम्मटेन लक्षणामूलध्वनिकाव्यस्य द्वौ भेदौ प्रोक्तौ। (१) अर्थान्तरसंक्रमितवाच्यध्वनिः। (२) अत्यन्ततिरस्कृतवाच्यध्वनिः। ध्वनिकारेणापीमावेव भेदौ वर्णितौ। तथाहि—

"अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम्।
अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम् ॥"

ध्वनिविवेचनप्रसङ्गे लक्षणाव्यापारस्य महदस्ति महत्त्वम्। मम्मटेन काव्यप्रकाशस्य चतुर्दशकारिकायां प्रकारान्तरेण लक्षणाया एव महत्त्वं विशदीकृतम्। तथा च—

"यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ॥" इति।

## रसगङ्गाधरे प्रतिपादितो रूपकोपमाया भेदस्तत्र च लक्षणायाः कार्यम्

लक्षणाविवेचनाध्याये पंडितराजेन केचन बहुमूल्या विचारा आविष्कृता येषां ज्ञानं विना रसगङ्गाधरपारीणत्वोत्सेको ग्लानायते विदुषाम्। तदेषां विचाराणां सारोऽधस्ताद्दीयते—

'मुखं चन्द्रः' 'चन्द्रसदृशं मुखम्' इत्यत्र रूपकोपमालक्ष्ययोर्यद्यपि बोधस्तुल्य एव सहृदयस्य तथापि रूपकस्थले लक्षणया तत्फलीभूतं (लक्षणाप्रयोजनभूतं)

यदस्ति मुखचन्द्रयोस्ताद्रूप्यसंवेदनं तदाश्रित्य रूपकोपमयोर्भेदः। तथाहि, रूपकेऽभेदज्ञानं भवति। उपमायां तन्न भवति। रूपके 'चन्द्रसदृशं मुखम्' इत्याकारिकायां पदार्थोपस्थितावपि शाब्दबोधस्य स्वरूपं 'चन्द्ररूपं मुखम्' इति भवति। उपमायां तु पदार्थोपस्थितिः शाब्दबोधश्चोभावपि 'चन्द्रसदृशं मुखम्' इत्याकारतां व्रजतः। तथाहि—सादृश्यं द्विविधमस्ति (१) भेदयुक्तम्, (२) भेदरहितञ्च। तत्र भेदयुक्तं सादृश्यमुपमाया मूलं भेदरहितञ्च रूपकस्य।

केचिदाचक्षते—'मुखं चन्द्रः'-'वाहीको गौः' इत्यादौ लक्षणामन्तरेणैव चन्द्रादीनां मुखादिभिः सहाभेदान्वयः संभवति। स च (अभेदान्वयः) 'मुखं चन्द्रः' इत्यादावाहार्योऽङ्गीकार्यः। अपि च रूपकालङ्कारे 'उपमानवाचकस्य चन्द्रादिपदस्य चन्द्रादिसदृशत्वे लक्षणा' इति प्राचां सिद्धान्तः। तत्र सादृश्यं= लक्ष्यतावच्छेदकम्, तच्चास्ति समानधर्मरूपम्। तत्रायं प्रश्नः—सः समानधर्मो लक्ष्यांशे सुन्दरत्वादिना विशेषरूपेण प्रतीयते यद्वा सामान्यरूपेण ? नाद्यः, 'सुन्दरं मुखं चन्द्र' इत्यादौ पौनरुक्त्यापत्तेः। नान्त्यः, सादृश्यस्य शब्देनोपात्ततयोपमात्वापत्तेः।

एनां प्रस्थापनां निराकुर्वन् पण्डितराजो ब्रवीति—

"चमत्कारिसाधारणधर्मानुपस्थितिदशायामुपमालङ्कारस्येव रूपकालङ्कारस्यापि नास्ति निष्पत्तिरचमत्कारो वेति सकलहृदयसिद्धम्। कथमन्यथा, 'भारतं नाकमण्डलम्' 'नगरं विधुमण्डलम्' इत्यादिवाक्यश्रवणानन्तरमुन्मिषन्त्या रूपकप्रतिपत्तेः सुपर्वालङ्कृतसकलकलादिश्रवणोत्तरमेव समुन्मेषः सर्वेषाम् (सहृदयविदुषाम्)।"

इदं प्रतिपाद्य पण्डितराजः (१) 'रूपके लक्षणामन्तरेणैवाभेदान्वयो भवति।' (२) 'साधारणधर्मस्वरूपं सादृश्यं रूपकमध्यं न प्रविशति'। इत्यात्मकौ विरोधितर्कौ प्रहरति। चमत्कारत्वाभावेऽलङ्कारत्वमेव नश्यतीति रूपकस्थले लक्षणां विनैव द्वयोरभेदान्वयः कियानपि तोषकरः स्याद्दार्शनिकानां, तथापि सहृदयानां नावहति स संतोषम्। पुनश्च रूपकोपमयोः साधारणधर्मसद्भावतदभावौ नैव भेदजनकौ। 'मुखं चन्द्रः' इत्यादि प्रसिद्धोदाहरणेऽप्ययमस्ति विशेषो यत्तत्र साधारणधर्मः (आह्लादकत्वादिः) प्रसिद्धतया स्वबोधकश्रुतिं नापेक्षते। तत्र तस्याध्याहारः क्रियते।

**वस्तुतो रूपकोपमयोरयं भेदः—**

(१) रूपकं विशेषसमासस्य (मयूरव्यंसकादयश्चेतिविहितस्य) अधीनम्। उपमा चोपमितसमासस्य ('उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इतिसूत्रप्रतिपादितस्य) अधीना।

(२) रूपकेऽन्तिमपदस्य प्राधान्यम्। उपमायां पूर्वपदस्य। यथा राजनारायणेतिरूपके नारायणपदप्राधान्येन लक्ष्म्यालिङ्गनमुपपद्यते। यथा च पादाम्बुजेत्युपमायां पादपदप्राधान्येन तस्य (पदस्य) सुन्दरनूपुरनिनादमनोहरत्वमुपपन्नं भवति।

**सादृश्यस्य प्रतीतिः सामान्यरूपेण—**

लक्ष्यतावच्छेदकीभूतस्य सादृश्यस्य सामान्यरूपेणैव प्रतीतिर्भवति रूपके। न चैवं सादृश्यस्य शब्दोपात्ततयोपमात्वापत्तिरिति युक्तं वक्तुम्। रूपके लक्ष्यं भेदाघटितसादृश्येन युक्तं भवति। अतो नास्त्युपमायास्तत्र प्रसक्तिः—'सादृश्यमुपमा भेदे' इति तत्सिद्धान्तात्।

## रूपकस्थलेऽभेदेन द्वयोरर्थयोरन्वयस्यानुपपत्तिः

ननु—

'विद्वन्मानसहंस वैरिकमलासंकोचदीप्तद्युते
दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर।
सत्यप्रीतिविधानदक्ष, विजयप्राग्भावभीम प्रभो
साम्राज्यं वरवीर वत्सरशतं वैरञ्चमुच्चैः क्रियाः॥

इत्यत्र परम्परितरूपकस्थले, मानसशब्दस्यार्थद्वये कृते राजा हंसरूपत्वं याति। राज्ञश्च हंसरूपतायां कृतायां, मानसशब्दस्यार्थद्वयं लभ्यते। एवञ्च रूपकश्लेषयोरितरेतराश्रयत्वादन्योन्याश्रयदोषापत्तौ सत्यां, द्वयोरर्थयोरभेदज्ञानफलकः श्लेष एव सिध्यति। इत्थमन्येष्वपि रूपकेषु वाच्यार्थयोरभेदान्वयपद्धतिरेव गरीयसी न तु सादृश्यमूलकलक्षणेति चेन्न। 'परम्परितरूपकेऽन्योन्याश्रयो नाशङ्कनीयः। सकलसिद्धेः (कवितोत्पत्तेः) कल्पनामयत्वेन, कल्पनायाश्च स्वप्रतिभाधीनत्वात्। शिल्पिभिः परस्परावष्टम्भमात्राधीनस्थितिकाभिः शिलेष्टिकाभिर्गृहविशेषनिर्माणाच्चेति।'

न च 'रूपके सादृश्यमूलकलक्षणायाः फलं ताद्रूप्यबोधो नास्ति, तत्सदृश इति शब्दादपि सादृश्यबोधे ताद्रूप्यबोधापत्ते'रिति वाच्यम्। ताद्रूप्यज्ञानं लक्षणायाः प्रयोजनमस्ति, न तु सादृश्यज्ञानस्य तत्प्रयोजनम्। 'तत्सदृशः' इत्यत्र तावल्लक्षणैव नास्ति।

## ध्वनेः स्वरूपम्

(१) कवीनां वाणीषु वाच्यार्थलक्ष्यार्थातिरिक्तत्वेन सर्वाधिकमहत्त्वशालि प्रतीयमानं (व्यङ्ग्यं) वस्त्वस्ति। इदमेव तदस्ति वस्तु यत्साहित्यविज्ञानयोरभिव्यक्तिक्षेत्रे पृथक्करोति। पाश्चात्यालोचकप्रवरो रिचर्ड्समहोदयो लिखति—'काव्यविज्ञानयोर्भेदमधिकृत्य भाषायां द्विविधौ प्रयोगौ भवतः। तयोरेको वैज्ञानिकोऽपरश्च भावात्मकः। सत्काव्ये शब्दाः संगीतात्मकशब्दसमूहवदाचरन्ति (They operate like musical phrases—principles of literary Criticism, Ch. 34.) रिचर्ड्समहोदयस्यैतन्मतानुसारं काव्ये शब्दार्थयोर्न तन्महत्त्वं यत्ताभ्यां प्रकटितायाः भावात्मकव्यञ्जनायाः। पाश्चात्यविपश्चिद्भिरेष यो निष्कर्ष आधुनिककाले दीयते तस्य स्वरूपं भारतीयैराचार्यैर्बहुशताब्दीपूर्वमेव प्रकाशितमासीदित्यवधेयम्, तथा चोक्तं ध्वनिकारेण—

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥

अयं प्रतीयमानोऽर्थो नाभिधया गृह्यते न च लक्षणया। अतः साहित्याचार्यैरस्यार्थस्य प्रतीत्यर्थमीदृशी शक्तिराविष्कृता या शब्दार्थयोरुपसर्जनीकृतस्वरूपतामापाद्य काव्यस्य वास्तविकमर्थं बोधयति। यथा किञ्चिद् वस्तु कुत्रचित्पूर्वत एव विद्यमानं गूढद्रव्यादिकं प्रकटयति तथैवैषा शक्तिः मुख्यार्थलक्ष्यार्थयोः सूक्ष्मावरणावृतं गूढं व्यङ्ग्यार्थमाविष्करोति। आचार्यो हेमचन्द्रः काव्यानुशासने व्यञ्जनां परिभाषमाणः प्राह—"तच्छक्त्युपजनितार्थावगमपवित्रित—प्रतिपत्तृप्रतिभासहायार्थद्योतनशक्तिर्व्यञ्जकत्वम्।" एवं वाच्यार्थो व्यङ्ग्यप्रतीतेराधारस्त्वस्ति किन्तु स चरमोद्देश्यत्वेन न स्वीकर्त्तुं शक्यते। अत एव पंडितराजादिमते—

रमणीयार्थप्रतिपादकत्वं काव्यत्वमुच्यते । अयं रमणीयार्थश्च प्रकारान्तरेण निर्देशकः ।

( २ ) व्यञ्जनायाः परिभाषा—मम्मटाचार्यो व्यञ्जनायाः काञ्चिन्निश्चितां परिभाषां नैव चकार । स केवलं व्यञ्जनाया अभिधामूल-लक्षणामूलात्मको भेदौ विधाय तयोः स्वरूपविवेचनमाचचार । यथा अभिधामूलव्यञ्जनाया विषये प्राह—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥

यथा च लक्षणामूलाया विषये—

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ॥ इत्यादि ।

( फले = शीतत्वपावनत्वादिके ) अनेन विवेचनेन व्यञ्जनायाः स्वरूपं तु सम्यक्तयाऽवगन्तुं शक्यते किन्तु शास्त्रीया परिभाषा नाप्यते । विश्वनाथकृता व्यञ्जनायाः परिभाषाऽत्र प्रसङ्गेऽतितरां समीचीना—

विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः ।
सा वृत्तिर्व्यञ्जना नाम.................. ॥

( ३ ) अभिधालक्षणाभ्यां व्यञ्जनाया भिन्नता—

कश्चिद्वक्ता 'गङ्गायां घोषः' इति वाक्यं प्रयुज्य घोषस्य शीतत्वपावनत्वादीनि प्रतिपादयितुं वाञ्छति । तत्र सर्वप्रथमं भागीरथखातत्वावच्छिन्नजलप्रवाहे घोष-स्थितिरूपमुख्यार्थस्य बाधज्ञानं भवति । ततः सामीप्यसंबंधात् 'गङ्गातटे घोषः' इति लक्ष्यार्थस्य प्रतीतिर्जायते । तृतीये क्षणे च घोषस्य शीतत्वपावनत्वादेर्बोधो भवति । कापि शक्तिरेकतोऽधिकमर्थं बोधयितुं न शक्नोति । तृतीयार्थस्य कृते तृतीया शक्तिर्मन्तव्याऽस्ति । सा शक्तिर्व्यञ्जनैव । वृत्तिवार्त्तिककारेण दीक्षिते-नायमर्थो निम्नप्रकारेण विशदीकृतः ।

"लक्षणायां काव्यशोभातिशयाधायकतयाऽप्यधिकं, श्रोतुकामस्य प्रवाहतादा-त्म्यप्रतिपत्त्या तद्गतातिशयितपावनत्वद्योतनाय, तस्मिन् गङ्गापदं प्रयुङ्क्ते ।

इत्थं 'गङ्गायां घोषः' इत्यादौ ये पावनत्वादयो धर्माः प्रतीयन्ते न तेषु गङ्गादिशब्दानां साक्षात्संकेतः । अतोऽत्राभिधाया न प्रसक्तिः । एवं तान्

धर्मान् बोधयितुं लक्षणापि न समर्था। शैत्यादीनां लक्षणीयत्वं न भवति यतः— लक्ष्यं ( तटादिकं ) न मुख्यं ( साक्षात्संकेतितम् ) नाप्यत्र बाधो योगः फलेन नो ( शैत्यादिना तटस्य योगो—संबंधो नास्ति )। न प्रयोजनमेतस्मिन् ( शैत्यादावपि किञ्चिदन्यत्प्रयोजनं नास्ति ), न च शब्दः स्खलद्गतिः (गङ्गाशब्दः नास्ति शैत्यादिप्रत्यायनेऽसमर्थः)॥ एवमपि प्रयोजनं चेल्लक्ष्यते तत् प्रयोजनान्तरेण तदपि प्रयोजनान्तरेणेति मूलक्षयकारिणी अनवस्था भवेत्। तथा चोक्तम्—

"प्रयोजनेन सहितं लक्षणीयं न युज्यते।"

तथा च—

"ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्॥"

तटादौ ये विशेषाः पावनत्वादयस्ते चाभिधातात्पर्यलक्षणाभ्यो व्यापारान्तरेण गम्याः। तच्च व्यञ्जनध्वननद्योतनादिशब्दवाच्यमवश्यमेषितव्यम्।

यत्र च संयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽपि अनेकार्थस्य शब्दस्य क्वचिदर्थान्तरप्रतिपादनं तत्र नाभिधा नियमनात्तस्याः। न च लक्षणा मुख्यार्थबाधाद्यभावात्। अपि तु व्यञ्जनमेव व्यापारः। यथाह लोचनकारः।

"तस्माद् अभिधातात्पर्यलक्षणाव्यतिरिक्तश्चतुर्थोऽसौ व्यापारो ध्वननद्योतनव्यञ्जनप्रत्यायनावगमनादिसोदरव्यपदेशनिरूपितोऽभ्युपगन्तव्यः"।

( ४ ) व्यङ्ग्यार्थप्रतीतौ शब्दार्थयोः साहचर्यम् :—व्यङ्ग्यार्थबोधने कुत्रचिच्छब्दः सहायको भवति कुत्रचिच्चार्थः। एवञ्च व्यञ्जना द्विप्रकारका—

( १ ) शाब्दी ( २ ) आर्थी च। ननु व्यञ्जनायाः शब्दशक्तित्वे आर्थीत्वमिति वदतो व्याघात इति चेन्न व्यञ्जनायाः शब्दशक्तित्वेऽपि यदि कुत्रचित् काव्ये शब्दप्रमाणसंवेद्यः कश्चिदर्थोऽर्थान्तरमभिव्यनक्ति तत्रार्थस्य व्यञ्जकता शब्दस्य च सहायकत्वम्। न हि प्रमाणान्तरसंवेद्योऽर्थो व्यञ्जकः। अत एवोक्तम्—

शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः।
अर्थस्य व्यञ्जकत्वे, तच्छब्दस्य सहकारिता॥

( ५ ) शाब्दी लक्षणामूला व्यञ्जना—द्विप्रकारका भवति ( १ ) अर्थान्तरसंक्रमितवाच्या ( २ ) अत्यन्ततिरस्कृतवाच्या।

( ६ ) शाब्दी अभिधामूला—अभिधामूलायां शाब्दीव्यञ्जनायां त्रीणि तत्त्वान्यावश्यकीयानि ( १ ) शब्दस्यानेकार्थत्वम् ( २ ) अभिधाशक्तेः कस्मिंश्चित्प्रकरणादौ नियन्त्रितत्वम् ( ३ ) प्रतिभाबलात् सहृदयस्य अप्राकरणिकार्थप्रतीतिः। शब्दशक्तिमूलव्यञ्जनाया विषये ध्वनिकारस्येदं मतम्—"यस्मिन् काव्ये यस्मादलङ्कारः ( न तु वस्तुमात्रम् ) शब्दशक्त्या प्रकाशते स शब्दशक्त्युद्भवो ध्वनिः" वस्तुद्वये शब्दशक्त्या प्रकाशमाने तु श्लेषः—

"आक्षिप्त एवालङ्कारः शब्दशक्त्या प्रकाशते।
यस्मिन्ननुक्तः शब्देन, शब्दशक्त्युद्भवो हि सः॥"

आर्थी व्यञ्जना—( ध्वनिकारेण पदपदांशवाक्यादिकानां व्यञ्जकत्वं ( 'न्यक्कारो ह्ययमेव' इत्यादौ ) प्रतिपाद्य ध्वनेर्भेदोपभेदप्रदर्शनपूर्वकं शब्दस्य गरिमाऽऽविष्कृतः। विना शब्दसाहाय्यकम् आर्थी व्यञ्जना न संभवति। तथापि, आर्थीव्यञ्जनायाः क्षेत्रमतीव विपुलम्। अभिधालक्षणाभ्यामर्थबोधनशक्तिः केवलं शब्देऽस्ति नार्थे। किन्तु व्यङ्ग्यार्थबोधनक्षमता, उभयोरपि शब्दार्थयोर्भवति। यथाह ध्वनिकारः—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥ ( कारिका १ )

यत्रार्थाद् व्यङ्ग्यार्थप्रतीतिस्तत्रार्थीव्यञ्जनायास्त्रयो भेदा भवन्ति ( १ ) वाच्यसंभवा ( वाच्यार्थाद् व्यङ्ग्यार्थस्य ) ( २ ) लक्ष्यसंभवा ( लक्ष्यार्थात् तस्य ) ( ३ ) व्यङ्ग्यसंभवा ( व्यङ्ग्यार्थात्तस्य )।

आर्थीव्यञ्जनायाः स्वरूपं मम्मटेन काव्यप्रकाशस्य तृतीयोल्लासे विस्तरशो व्याख्यातम्। तद्यथा—

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसंनिधेः।
प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम्॥
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा॥

वक्तृवैशिष्ट्याद्, वाच्यार्थस्य व्यङ्ग्यार्थप्रत्यायकता यथा—

अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि, त्वरितम्।
श्रमस्वेदसलिलनिःश्वासनिःसहा विश्राम्यामि क्षणम्'॥

अत्र, चौर्यरतगोपनं गम्यते। बोद्धव्यवैशिष्ट्यात् (प्रतिपाद्यवैशिष्ट्यात्) यथा—

'औनिद्र्य' दौर्बल्यम्' इत्यादौ दूत्यास्तत्कामुकोपभोगो व्यज्यते। आदिशब्दाच्चेष्टादीनां ग्रहणम्। तद्यथा चेष्टावैशिष्ट्यात्—

'द्वारोपान्तनिरन्तरे मयि तथा सौन्दर्यसारश्रिया
प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम्।
आनीतं पुरतः शिरोंऽशुकमधः, क्षिप्ते चले लोचने
वाचस्तत्र निवारितं, प्रसरणं सङ्कोचिते दोर्लते॥

अत्र चेष्टया प्रच्छन्नकान्तविषय आकूतविशेषो ध्वनन्यते। इत्यादि। अनेनैव क्रमेण अन्यवैशिष्ट्यैः वाच्यार्थस्य लक्ष्यव्यङ्ग्ययोरपि च व्यञ्जकत्वमुदाहार्यम्।

(८) ध्वनिव्यञ्जनयोर्भेदः—इदमत्रावधेयं यद्यप्यलङ्कारशास्त्रे ध्वनिशब्दो व्यञ्जनाशब्दश्चोभावपि पर्यायवाचित्वेन गृह्येते किन्तु तयोरयं भेदः। व्यञ्जनायाः क्षेत्रमस्ति विपुलतरम् ध्वनेश्च नास्ति तत्समानम्। व्यङ्ग्ये सत्यपि प्रत्येकं काव्यं ध्वनिरितिव्यपदेशभाग्न भवति। वस्तुतो ध्वनिरिति प्रथमश्रेणीकस्य पारिभाषिकी संज्ञा। तद्यथोक्तं—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥ ध्वन्यालोकः।

(९) अभिधामूलध्वनेर्भेदाः—अभिधामूलध्वनेः प्रथमतोऽसंलक्ष्यक्रम-संलक्ष्यक्रमविषयकौ द्वौ भेदौ। तत्र, असंलक्ष्यक्रमे रसभावादीनां ग्रहणम्। संलक्ष्यक्रमस्य च द्वौ मुख्यौ भेदौ (१) शब्दशक्तिमूलः (२) अर्थशक्तिमूलः।

तत्र प्रथमो वस्त्वलङ्कारात्मना (१) वस्तुरूपः शब्दशक्तिमूलध्वनिः (२) अलङ्काररूपः शब्दशक्तिमूलध्वनिश्च। द्वितीयश्चाष्टप्रकारकः—(३) स्वतः संभविना वस्तुना वस्तुध्वनिः (४) स्वतः संभविना वस्तुना अलङ्कारध्वनिः (५) स्वतः संभविनाऽलंकारेण वस्तुध्वनिः (६) स्वतः संभविनाऽलङ्कारेणालङ्कारध्वनिः (७) कविप्रौढोक्तिसिद्धेन वस्तुना वस्तुध्वनिः (८) कविप्रौढोक्तिसिद्धेन वस्तुना अलङ्कारध्वनिः (९) कविप्रौढोक्तिसिद्धालङ्कारेण वस्तुध्वनिः (१०) कविप्रौढोक्तिसिद्धालङ्कारेणालङ्कारध्वनिः। (लक्षणामूलश्च द्विविधोऽस्त्येव)

प्राञ्चः, कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थरूपं व्यञ्जकोपाधिमङ्गीकृत्य ( तृतीयमुपाधिम् ); अपरानपि चतुरो भेदानर्थशक्तिमूलध्वनेरुपपादयामासुः । तान्न पण्डितराजो मन्यते, कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थस्य कविप्रौढोक्तेरेवान्तर्भूतत्वात् । अन्यथा कविनिबद्धनिबद्धादेरपि भेदान्तरप्रयोजकत्वस्यापत्तेः । शब्दार्थोभयशक्त्युद्भवो ध्वनेः प्रभेदो नाभिमतो जगन्नाथस्य । यत्र परिवृत्तिसहशब्दानामाधिक्यं तत्र, अर्थशक्तिमूलः यत्र च परिवृत्त्यसहानामाधिक्यं तत्र शब्दशक्तिमूलः ।

'रम्यहासा रसोल्लासा रसिकालिनिषेविता ।
सर्वाङ्गशोभासंभारा पद्मिनी कस्य न प्रिया ॥'

इत्यादिषु द्विविधानां समसंख्याकत्वेपि शब्दशक्तिमूलकत्वेनैवास्य व्यपदेशो विधेयो, यतो ह्यर्थशक्तिमूलकस्य क्षेत्रं तु विपुलमस्ति किन्तु शब्दशक्तिमूलध्वनेरल्पमस्ति । तादृशलक्ष्यस्यासंभवादल्पत्वाच्च ।

## विभिन्नध्वनीनामुदाहरणानि

( १ ) असंलक्ष्यक्रमध्वनिः । यथा—

अपहाय सकलबान्धवचिन्तामुद्वास्य गुरुकुलप्रणयम् ।
हा तनय ! विनयशालिन् कथमिव परलोकपथिकोऽभूः ॥

अत्र मृतस्तनयः = आलम्बनविभावः, बन्धुबान्धवादीनामुपस्थितिः = उद्दीपनविभावः । रोदनम् = अनुभावः । दैन्यादयो व्यभिचारिभावाः । एतैर्विभावानुभावव्यभिचारिभिः संयोगाद् ( व्यञ्जनात् ) शोकस्थाय्युपहितचिदानन्दात्मनः करुणरसस्य प्रकाशनम् ( अभिनवगुप्तपरिभाषावल्यनुसारेण ) अथवा पूर्वोक्तानां विभावादीनां संयोगात् (भावनाविशेषरूपाद् दोषात् ) अनिर्वचनीयशोकात्मनः करुणरसस्य उत्पत्तिः ( व्यक्तिः ) [ पंडितराजस्य नव्योक्तपरिभाषानुसारेण ] । अथवा—

मलयानिलकालकूटयो रमणीकुन्तलभोगिभोगयोः ।
श्वपचात्मभुवोर्निरन्तरा मम जाता परमात्मनि स्थितिः ॥

अत्र जगत् = आलम्बनविभावः, सर्वस्तुविषयकसाम्यस्थितिः = अनुभावः । मत्यादयः = संचारिभावाः । एतैः संयोगादथवा एतेषां संयोगादनिर्वचनीयनिर्वेदस्थाय्यात्मनः करुणरसस्य व्यक्तिः ।

एवमन्येषामपि रसानां रसभावादीनामपि उदाहरणानि ।

**( २ ) संलक्ष्यक्रमध्वनिषु शब्दशक्तिमूलालङ्कारध्वनिः—**

करतलनिर्गलदविरलदानजलोल्लासितावनीवलयः ।
धनदाग्रमहितमूर्त्तिर्जयतितरां सार्वभौमोऽयम् ॥

कश्चित् कविः कमपि राजानं स्तौति । करतलात् पाणिपुटकात् निर्गलता स्यन्दमानेन अविरलं संततं दानजलेन दीनोद्देश्यकत्यागवारिणा उल्लासितः = आनन्दितः अवनीवलयः = भूमण्डलो येन सः, तथा धनदानां धनदानपराणाम् अग्रे आदौ महिता = पूजिता ( स्तुता ) मूर्त्तिः = स्वरूपं यस्य सः, अयं वर्णनीयः सार्वभौमः चक्रवर्ती राजा जयतितराम् = सर्वोत्कृष्ट इति वाच्योऽर्थः । ध्वन्यर्थस्तु—करतलात् शुण्डादण्डात् निर्गलता अविरतं मदवारिणा, उल्लासितः अवनीवलयो-येन सः, धनदस्य = कुबेरस्य अग्रे प्रशंसिता आकृतिर्यस्य सः, अयं दिग्गजो जयति-तरामिति बोध्यः । ( नागेशस्तु ध्वन्यर्थम्, इन्द्रपरकमाह—तत्र पक्षे करतलेति विशेषणवाक्यस्य—करतलनिर्गलदविरलदानजलेन ऐरावतेन इति क्रमेणार्थः । सार्वभौमः = इन्द्रः । अन्यत् सर्वं समानमेव ) अत्र राजप्रकरणे करदान-धनद-सार्वभौमशब्दानां शक्तौ संकोचितायामपि तन्मूलकेन ध्वननेन प्रतीयमानस्य, अर्थान्तरस्य ( अप्रस्तुतस्य ) अभिधानं मा भूदिति प्रकृताप्रकृतयोः उपमानोपमेय-भावः प्रधानवाक्यार्थतया कथ्यत इत्युपमालङ्कारध्वनिः ।

नवीनानां मतानुसारेण तु, यथा श्लिष्टविशेषणायां समासोक्तौ प्रकृतधर्मिणि, आरोप्यमाणस्य, अप्रकृतव्यवहाररूप—व्यङ्ग्यस्य, प्रकृतोपस्कारकतया गुणीभूत-व्यङ्ग्यत्वम् तथैव पूर्वोक्तोदाहरणेपि, अप्रस्तुताभिधानरूपव्यङ्ग्यस्य गुणीभूतत्वमेव समुचितम् ।

अथ यथा समासोक्तौ प्रकृताप्रकृतव्यवहारौ समासोक्तिशरीरघटकौ तथैव, उपमायाम्, उपमेयोपमानभूतावर्थौ, उपमायाः शरीरघटकौ । एवं सति दिग्गजाद्यर्थो ( उपमानभूतः ) यदि राजाद्यर्थमुपस्करोति तदा कथं तस्यापराङ्गता वक्तुं शक्यते ? एषा तु स्वाङ्गोपस्कारतैवास्ति । अपराङ्गत्वाभावे च कथं गुणी-भूतव्यङ्ग्यत्वम् ? इति चेत् एवं तर्हि 'किं तावत् समासोक्तेरिव अस्य भेदस्यापि गुणीभूतव्यङ्ग्यता स्वीकरणीया यद्वा, अस्येव समासोक्तेरपि ध्वनिव्यपदेशः करणीयः ।

वस्तुतः 'उल्लास्य कालकरवाल' 'भद्रात्मनो दुरधिरोहतनोर्विशाल', 'करतलनिर्गलद्' इत्यादिषु नास्त्युपमालङ्कारध्वनिः अपि तु रूपकालङ्कारध्वनिः। यथा श्लेषे, एकपदोपात्ततया, द्वयोरर्थयोरभेदो भासते तथाऽत्रापि ( एकपदोपात्ततया द्वयोरर्थयोरभेदाध्यवसानस्य युक्तत्वेन अभेदस्यापि व्यङ्ग्यत्वमुचितं नोपमायाः।

ननु. श्लेषे द्वयोरर्थयोर्वाच्यत्वम् एककालत्वं च। इह तु एकस्य वाच्यत्वम्, अपरस्य व्यङ्ग्यत्वं भिन्नकालत्वं चेति चेन्न। एतावन्मात्रेणैव, एकपदोपात्तत्वप्रयुक्तम् अभेदाध्यवसानं न शक्यं व्यक्तुम्, अभेदप्रतिपत्तौ व्यङ्ग्यताया भिन्नकालत्वस्य च अबाधकत्वात्। एतेन—'उल्लास्य कालकरवाल' इत्यादौ, उपमाया एव संबंधत्वं कल्प्यं, रूपकस्य उपमाज्ञानाधीनज्ञानत्वेन प्रथमोपस्थिततया' इति यदुक्तं काव्यप्रकाशटीकाकारैस्तन्नातीव श्रद्धेयम्।

( ३ ) संलक्ष्यक्रमध्वनिषु शब्दशक्तिमूलकवस्तुध्वनिः—

राज्ञो मत्प्रतिकूलान्मे महद्भयमुपस्थितम्।
बाले! वारय पान्थस्य, वासदानविधानतः॥

मद्विरुद्धव्यापारप्रवणात् नृपात्, वियोगोद्वेजकतया क्लेशप्रदात् चन्द्राच्च। भयं प्राणोपघातकं कामार्तिरूपाच्च। वासदानस्य निवासस्थानप्रदानस्य वासस्यदानस्य ( संभोगात्मकस्य दानस्य ) विधानतः दूरीकुरु। अर्थात् चिरात् कान्ताविरहकातरतया परमोत्कंठितं मामयम् उदीयमानश्चन्द्रो नितरामुद्वेजयति। अत उपभोगं देहि इति व्यङ्ग्योर्थः।

अत्रोपभोगं देहीति वस्तु, राजपदशक्तिमूलानुरणनविषयः। राजपदाच्चन्द्रोपस्थितावेव चन्द्रजनितभयवारणकारणत्वेन उपभोगस्य अभिव्यक्तेः। इह नृपरूपोऽर्थः चन्द्ररूपस्य अर्थस्य गोपनमात्रार्थम् उक्तः। उपमारूपकयोस्तु उपमानोपमेयौ युगपदुल्लसितौ जायेते। अत्र भिन्नकाले तयोरुपस्थितत्वान्नास्ति अलङ्कारध्वनेरवसरः। न च असंबद्धार्थद्योतने वाक्यभेदोऽत्र दोषः इति वाच्यम्। वाक्यभेदस्तु तत्रैव भवति यत्र द्वौ असंबद्धावर्थौ तुल्यकक्षतया ( Simultaneously ) प्रतिपाद्येते इह तु नास्ति तुल्यकक्षता। आच्छादकप्रतीतिसमये आच्छाद्यस्य ( चन्द्रसंबंधिनोऽर्थस्य ) अप्रतीतिः। आच्छाद्यप्रतीतौ च आच्छादकस्य न्यग्भावः )।

काव्यप्रकाशस्य—

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै।
त्वं यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च॥

इत्युदाहरणे प्रथमार्द्ध एव 'त्वदनुवर्त्तनार्थं द्वौ विरुद्धौ पदार्थौ अपि कार्य कुरुत' इति ध्वन्यते न तु उत्तार्द्धे यतः 'भाति' इति क्रियायाः कर्त्ता सः (देवदत्तादिकः) वर्त्तते न तु उदारानुदारौ। तौ तु क्रियायाः विशेषणीभूतस्य (स इत्यस्य) विशेषणौ स्तः केवलम्। अतः नास्ति तयोरेककार्यकारित्वम्। तत्र केवलं विरोधाभासो वाच्य एव। (३) स्वतः संभविना वस्तुना वस्तुनो ध्वनिः (अर्थशक्तिमूलकः)।

गुञ्जन्ति मञ्जु परितो गत्वा धावन्ति सम्मुखम्।
आवर्त्तन्ते विवर्त्तन्ते सरसीषु मधुव्रताः॥

अत्र कविकल्पितत्वविरहेण स्वतःसंभविभिः मधुव्रतकर्त्तृकमधुगुञ्जनाद्यैर्वस्तुभिः आसन्नसरसिजोत्पत्तिध्वननद्वारा, शरदागमनैकत्यरूपं वस्तु व्यज्यते। काव्यप्रकाशे—

'अलसशिरोमणिधूर्तानामग्रिमः पुत्रि ! धनसमृद्धः।
इति भणितेन नताङ्गी प्रफुल्लविलोचना जाता॥

अत्र 'ममैवोपभोगयोग्य' इति वस्तु व्यज्यत इति यदुक्तं तन्न। अथ केन वस्तुना इदं वस्तु व्यज्यते। 'अलसशिरोमणिः' इत्यादिविशेषणानि तु धीमद्भिर्निर्दिष्टानि न तु नायिकोक्तानि। तैस्तु 'तवैवोपभोग्य' इति वस्तु तावद् व्यङ्क्तुं शक्यते। किन्तु तन्नास्ति प्रदर्शितम्। अस्तु मम्मटसंगत्यर्थम् एतत्स्वीकरणीयम्, यत् 'इति भणितेन' इत्याद्यर्थवशात् नायिकाया अलसशिरोमणित्वादिविशेषणश्रवणं प्रोच्यते तद्विशिष्टेन प्रफुल्लविलोचनत्वेन 'ममैवोपभोग्य' इत्याकारो विभावोऽभिव्यज्यते तेन च हर्षभावः अभिव्यज्यते (संलक्ष्यक्रमतया)।

न च भावध्वनेः संलक्ष्यक्रमत्वापत्तिः, 'द्वारस्य ममोपभोग्य' इति विभावाभिव्यक्तिद्वारा हर्षभावेऽभिव्यज्यमाने, संलक्ष्यक्रमत्वादिति वाच्यम्। इष्टापत्तेः। (वैसा तो हम मानते ही हैं कि भाव आदि भी कभी २ संलक्ष्यक्रमतया व्यक्त होते हैं)।

स्वतः संभविना वस्तुना अलङ्कारध्वनिः—

मृद्वीका रसिता सिता समशिता स्फीतं निपीतं पयः
स्वर्यातेन सुधाप्यधायि कतिधा रम्भाधरः खण्डितः।
सत्यं ब्रूहि मदीयजीव भवता भूयो भवे भ्राम्यता
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल्लक्षितः॥

अत्र वक्ता स्वस्य भागद्वयं कृतवान् (१) देहाद्यतिरिक्तः शुद्धस्वरूपो जीवात्मा (२) देहेन्द्रियादिजडसमूहरूपः संघातः (अस्मत्पदबोध्यश्च)। उपर्युक्तं प्रश्नं संघातः जीवात्मानं पृच्छति। पूर्वजन्मवस्तूनां प्रत्यक्षकारणमस्ति-योगसिद्धि-विशेषो यद्विना न कोऽपि पूर्वजन्मवार्त्तां ज्ञातुं शक्नोति। अत्र भगवन्नाम्ना योग-सिद्धिविशेषस्य उपमेयस्य तादात्म्याध्यवसानरूपा अतिशयोक्तिः व्यज्यते यस्या अभिव्यक्तौ मूलभूतं रहस्यमिदमस्ति यत् सर्वज्ञताया अभावे अतीतजन्मवृत्तान्त-ज्ञानविषयकप्रश्नो नोपपद्यते। सर्वज्ञता च भवति योगसिद्ध्या। सा च नास्त्यत्र साक्षाद्वर्णिता। (अतो भगवन्नामयोगसिद्ध्यभिन्नंमत्वा) भगवन्नाम्नः (उपमानस्य) वर्णनमस्ति। अत्र अनेकजन्मानुभूतवस्तुषु मधुरिमोद्गारदर्शनम् स्वतःसंभवि वस्तु। यतो हि जीवस्य अनेकानि जन्मानि शास्त्रसिद्धानि न तु कविकल्पितानि। अनेन अतिशयोक्तिर्व्यज्यते। अत इदमुदाहरणं स्वतः संभविना वस्तुना अलंकारध्वनेरस्ति।

ननु अल्पज्ञजीवस्य तादृशप्रश्नादिना पूर्वोक्ताभेदज्ञानमनुपपन्न इति वाच्य-सिद्ध्यङ्गतया, अतिशयोक्तेः गुणीभूतव्यङ्ग्यता, अर्थापत्तिद्वारेणाक्षिप्ततया च काव्य-मिदं न ध्वनिव्यपदेशभाग् इति चेन्न। व्यङ्ग्यं वाच्यसिद्धेरङ्गं तत्रैव भवति यत्र तद्विना वाच्यं न कथंचिदपि निष्पद्यते, यथा 'राघवविरहज्वाला'दिपद्ये। अत्र तु भगवन्नामप्रभावद्वारेण सर्वज्ञतामात्मनो मत्वापि तादृशः प्रश्नः कर्त्तुं शक्यते। ननु नामोच्चारणमहिम्ना सर्वज्ञतासद्भावेऽपि, सर्वज्ञताविरहिणि भगवन्नाम्नि तादृशसंबंधकल्पनाद् असंबंधे संबंधरूपोऽतिशयोक्तिभेदो वाच्यभूतः स्थास्यत्येवेति चेन्न। यत्र तु तादृशं वस्तु नास्ति तथापि संबंधः (यथा प्रासादशिखराणां चन्द्रस्पर्शः) प्रदर्श्यते तत्र स भेदो भवति। अत्र तु नास्ति साऽवस्था। भगवन्नामोच्चारणस्य अचिन्त्यमाहात्म्यतायाः पुराणप्रसिद्धत्वात्।

अथवा मास्तु प्रागुक्तमुदाहरणं वस्तुनोऽलङ्कारव्यञ्जकतायाः । इदं तु भविष्यति ।

न मनागपि राहुरोषशंका न कलङ्काराधिगमो न पाण्डुभावः ।
उपचीयत एव कापि शोभा परितो भामिनि ते मुखस्य नित्यम् ॥

अत्र राहुरोषशङ्काया अभावादिभिर्निरपेक्षैर्वस्तुभिर्व्यतिरेकालंकारो व्यज्यते ।

( ५ ) स्वतः संभविना अलङ्कारेण वस्तुध्वनिः—

'नदन्ति मददन्तिनः' इत्यादि ।

अत्र युगान्तदहनोपमया (वाच्यभूतेनोपमालङ्कारेण), 'यदैव तव कोपोदयस्तदैव रिपूणां संपदो भस्मसाद्भविष्यन्ति' इति वस्तु व्यज्यमानं ( राजविषयकरतिभावस्य अङ्गमपि सत् ) वाच्यापेक्षया सुन्दरत्वाद् ध्वनिव्यपदेशहेतुः ।

( ६ ) स्वतः संभविना अलङ्कारेणालङ्कारध्वनिः—

उदितं मण्डलमिन्दो रुदितं सद्यो वियोगिवर्गेण ।
मुदितं च सकलललनाचूडामणिशासनेन मदनेन ॥

कविश्चन्द्रोदयं वर्णयति— चूडामणिः=शिरोधार्यम् शासनं यस्य तेन । सद्यः=समकालमेव । अत्र उदितम् 'रुदितं' 'मुदितम्' इति क्रियात्रयस्य वाच्यं यौगपद्यं ( समकालीनत्वं )=समुच्चयालङ्कारस्तेन इन्दुमण्डलोदयस्य कारणतया पूर्वभाविनः रोदनमोदयोश्च कार्यतया पश्चाद्भाविनोः समकालिकत्वकथनात्मकोऽतिशयोक्तिरलङ्कारो ध्वन्यते ।

पूर्वोक्तेषूदाहरणेषु व्यञ्जका अर्था बहिरपि संभाव्यमानत्वात् स्वतः संभविनः सन्ति ।

( ७ ) कविप्रौढोक्तिसिद्धवस्तुना वस्तुध्वनिः—

तदवधि—इत्यादि ।

अत्र कामिनीदृग्विलासे चेतसि पदमर्पितवति; नास्ति कुशलमिति वस्तु कविप्रौढोक्तिसिद्धम् यतो दृग्विलासकर्तृकपदार्पणं नास्ति लोकसिद्धम् । तेन 'तस्मिन् ( कामिनीदृग्विलासे ) सुनिषण्णे सति का कुशलचर्चा विवेकस्येति, वस्तु व्यज्यते ।

( ८ ) कविप्रौढोक्तिसिद्धेनालङ्कारेण-वस्तुनः—

'देवाः के पूर्वदेवाः' इत्यादि ।

अत्र कविप्रौढोक्तिसिद्धेन रूपकेण ( कृपाणभुजङ्गयोः वाच्येन परम्परितरूपकालङ्कारेण ) 'त्वयि उद्यतकरवाले सति का परेषां जीवनस्याशा' इति वस्तु व्यज्यते ।

( ९ ) कवि०—वस्तुना अलङ्कारस्य—

साहङ्कारसुरा—इत्यदि ।

अत्र कीर्त्तेः सानन्दालोकनेन, कविकल्पितवस्तुना, तापसगता दुग्धभ्रान्तिः ( भ्रान्तिरलङ्कारः ) व्यज्यते ।

( १० ) कवि०—अलङ्कारेणालङ्कारस्य—

दयिते रदनत्विषां तेऽमी विलसन्ति केसराः ।
अपि चालकवेशधारिणो मकरन्दस्पृहयालवोऽलयः ॥

अत्र, पूर्वोत्तरार्द्धवर्त्तिनीभ्यामपह्नुतिभ्यां 'न त्वं नारी किन्तु नलिनीति'—तृतीयापह्नुतिर्व्यज्यते ।

# श्लोकानुक्रमणिका


| श्लोकः | पृष्ठम् |
|---|---|
| अतिपृथुलं जलकुम्भं | १०७ |
| अथ पवित्रमताम् | ६३ |
| अद्य या मम गोविन्द | ५८ |
| अपहाय सकल | १०९ |
| अपारे संसारे | ६१ |
| अपि बहलदहन | २९ |
| अपि वक्ति गिरां | २९ |
| अबलानां श्रियम् | ४३ |
| अमितगुणोऽपि | ७० |
| अर्थिभिश्छिद्यमानोऽपि | ७० |
| अलसशिरोमणिः | ११२ |
| अविरतचिन्तो | ५७ |
| अस्याः सर्गविधौ | ७१ |
| अस्यां मुनीनामपि | ८३ |
| अहं लतायाः | ५४ |
| अहितापकरण | ६८ |
| अहीनचन्द्रा लसता | ६२ |
| उदितं मण्डलमिन्दोः | ११४ |
| उपकारमेव कुरुते | ७० |
| उपरिकरवाल | ७३ |
| उषसि प्रतिपक्ष | ३८ |
| कनकद्रव | ७४ |
| कमलावास | ६८ |
| करतलनिर्गलद० | ११० |
| कालागुरुद्रवं सा | ३९ |
| कालिन्दजानीर० | ८३ |

| श्लोकः | पृष्ठम् |
|---|---|
| कुलिशमिव कठिनम् | ५७ |
| कृतक्षुद्राघौघानथ | ५८ |
| कृतं त्वयोन्नतं कृत्यम् | १०१ |
| कोमलातपशोणाभ्र० | ४९ |
| कौमुदीव भवती | ५३ |
| गाम्भीर्येणातिमात्रेण | ५६ |
| गीष्पतिरप्याङ्गिरसो | ९३ |
| गुञ्जन्ति मञ्जु | ११२ |
| गुरुजनभयमद्विलो | ४९ |
| गुरुमध्यगता | १६ |
| चपला जलदाच्च्युता | ७१ |
| चाञ्चल्ययोगिनयनम् | ४४ |
| ढु ढुं कृत्वा मरिष्यसि | ५९ |
| तन्मञ्जुमन्दहसितम् | ४० |
| तरणितनया किं | ७१ |
| तारानायकशेखराय | ६२ |
| त्वत्पादनखरत्न | ६५ |
| त्वत्पादनखरत्नानि | ६६ |
| त्वदालेख्ये कौतूहल | ७८ |
| दयिते रदनत्विषाम् | ७८ |
| दरानमत्कन्धर | ७४ |
| दासे कृतागसि | ६३ |
| दिवानिशं वारिणि | ८३ |
| दीनव्राते दयार्द्रा | ७२ |
| देवाः के पूर्वदेवाः | ६९ |
| दोर्दण्डद्वयकुण्डली | ७३ |

| श्लोकः | पृष्ठम् |
|---|---|
| द्वारोपान्तनिरन्तरे | १०८ |
| न मनागपि राहुरोध | ११४ |
| नरैर्वरगतिप्रदे | ७२ |
| निखिले निगम० | ५३ |
| निधिं लावण्यानां | ८१ |
| निश्शेषच्युतचन्दनम् | १६ |
| परिहरत धरां फणि | ७९ |
| पश्येत्कश्चित् | ३८ |
| पापं हन्त मया | ३७ |
| प्रहरविरतौ | ११ |
| पूर्णमसुरै रसातल | ६० |
| प्राचीसन्ध्या | ६९ |
| प्रायः पतेद् द्यौः | ८२ |
| बधान द्रागेव | १०१ |
| बुद्धिर्दीपकला | ६८ |
| ब्रह्मन्नध्ययनस्य | ३१ |
| भवनं करुणावती | ३५ |
| भुजपञ्जरे गृहीता | ३५ |
| भुजो भगवतो | ४८ |
| भुवनत्रितयेऽपि | ५९ |
| भूमीनाथ शहाबदीन | ५९ |
| मरकतमणिमेदिनी | ७१ |
| मलयानिलकाल | १०९ |
| महर्षेर्व्यासपुत्रस्य | ६२ |
| मित्रात्रिपुत्र० | ७२ |
| मीनवती नयनाभ्यां | ८५ |

| श्लोकः | पृष्ठम् |
|---|---|
| मृद्वीका रसिता | ११३ |
| यस्य तुलामधिरोहसि | ५९ |
| यौवनोद्गमनितान्त | ३७ |
| रजोभिः स्यन्दनो | ५५ |
| रमणीयस्तबकयुता | ५६ |
| रम्यहासा | १०९ |
| राज्ञो मत्प्रतिकूलान्मे | १११ |
| रामं स्निग्धतरश्यामं | ७७ |
| लोहितपीतैः कुसुमैः | ५७ |
| वनितेति वदन्त्येतां | ७२ |
| वारिधिराकाश | ५७ |
| विद्वन्मानस | १०३ |
| विलसत्याननं तस्याः | ४९ |
| वीक्ष्य वक्षसि | ३७ |
| व्यत्यस्तं लपति | ३५ |
| शतेनोपायानां | ३४ |
| शनिरशनिश्च | ११२ |
| शिञ्जानैर्मञ्जरीति | ७५ |
| श्यामं सितं च | ७८ |
| सदृशी तव तन्वि | ५४ |
| सर्वेऽपि विस्मृतिपथं | ३६ |
| सुधासमुद्रं तव | ५६ |
| सुविमलमौक्ति | ६८ |
| स्तनाभोगे पतन्भाति | ४८ |
| स्मितं नैतत्किन्तु | ७७ |

# शुद्धिपत्रम्

| अशुद्धम् | शुद्धम् | पृ० | पं० |
|---|---|---|---|
| -स्वरूपी | -स्वरूपा | ७ | १८ |
| काव्यसिद्धान्त- | न्यायसिद्धान्त- | ,, | २२ |
| **जनकानि** | **हेतुः** | ८ | ८ |
| लाघवम् | लाघवात् | ,, | २८ |
| भतिभा | प्रतिभा | ९ | ८ |
| -व्याच्या- | -वाच्या | १० | २६ |
| -मापाद्यं | -मापाद्य | ११ | ,, |
| सर्वम- | सर्वत्र- | १२ | ९ |
| -श्वैत्यस्यं, | -श्वैत्यस्य | ,, | २४ |
| कल्पिता काश्मीर- | कल्पितकाश्मीर- | ,, | २६ |
| -कृत्युत्युपस्कृता- | -कृत्युपस्कृता- | १३ | ६ |
| -चमत्कृतिप्रधानं | -चमत्कृतिः प्रधानं | ,, | ,, |
| व्यङ्गजम् | व्यङ्ग्यम् | २४ | २५ |
| -चमत्कारे | -चमत्कारो | ,, | २६ |
| -स्यैकधा) साम्यम्, | -स्यैकधा साम्यम्, | १५ | ४ |
| **-स्योदाहरणानि** | **-स्योदाहरणम्** | ,, | १४ |
| -प्रतीतिसंभवा | -प्रतीतिरसंभवा | २२ | ,, |
| कस्यापि | केनापि | २८ | १९ |
| अथौचित्यादृते | अनौचित्यादृते | ३१ | ११ |
| **विसर्ग-लोपः** | **अनौचित्यं किम्** | ,, | ,, |
| दर्शन-विभावः | दर्शनं विभावः | ३७ | १३ |
| तत्र | तन्न | ,, | २८ |
| चमत्कारित्वा-स्मृति- | चमत्कारित्वात्स्मृति- | ४० | १९ |
| -कर्तृणाम्-काङ्क्षा- | -कर्तृणामाकाङ्क्षा- | ४३ | १५ |
| ईश्वरः' | उ श्वः' | ४५ | ५ |
| प्रमितुः' | प्रमितः' | ,, | ८ |
| -द्युपरिथते- | -द्युपस्थिते- | ,, | २२ |
| व्यर्थप्रतीतौ | अर्थप्रतीतौ | ४६ | २ |
| आहार्यभेद- | आहार्याभेद- | ४९ | १० |
| -प्रयासश्च | -प्रयासस्य च | ५२ | १५ |
| तदेवादृष्टा- | तदेवादुष्टा- | ,, | २० |
| कौशेलेन | कौशलेन | ५५ | २१ |
| ज्ञेयम् | ज्ञेयः | ५६ | १२ |
| agaiust | against | ५७ | ,, |
| -लुप्तोपमया | -लुप्तोपमाया | ५९ | १३ |
| -मलोद्वारे | -मलोद्वारैः | ,, | १८ |
| परा | परां | ६२ | ५ |
| केवां | केषां | ,, | १५ |
| पक्वित्र- | पवित्र- | ६३ | १६ |
| -कौतुकी' | -कौतुकि' | ६४ | २१ |
| चेदं रूपकभेदे | चेदमभेदरूपकम् | ६७ | १३ |
| क्तस्याभःवे | क्तस्याभावे | ,, | २७ |
| मुग्वारि- | मुग्धारि- | ६९ | ११ |
| विनयोगिनीति | वियोगिनीति | ७१ | २१ |
| तेषां | तस्य | ७२ | ५ |
| -निबद्धा | -निबद्धुम् | ७५ | १२ |
| -ऽसंष्ठुल- | -ऽसंस्थुल- | ७६ | ४ |

| अशुद्धम् | शुद्धम् | पृ० | पं० |
| --- | --- | --- | --- |
| विहितात्मनि | पिहितात्मनि | ७६ | ९ |
| वाराधरभिया | धाराधरधिया | ७७ | ९ |
| -दाहरणम् | -दाहरणे | ८० | ७ |
| रमणोयवत्समा- | रमणीयतत्समा- | ८१ | ९ |
| -साधारेणधर्म- | -साधारणधर्म- | ८२ | १५ |
| -नाध्यवसिता | -नाध्यवसितं, | ८३ | २२ |
| इयमापे | इयमस्ति | ८४ | ११ |
| वचन यत्- | वचनं यत्-'सर्वत्राभेदेनैवोत्प्रेक्षणं स्यादिति नास्ति वेदेन प्रतिपादितम्। समवायादिनाप्युत्प्रेक्षणं संभाव्यते' इति। | ८४ | २२ |
| तस्मन्नवशिष्टे | तस्मिन्नवशिष्टे | ८८ | १५ |
| त्रयं | त्रयो | ८९ | २६ |
| स्वीकुरुतः | स्वीकुर्वन्ति | ९४ | २४ |
| सोपदाना | सोपादाना | ९५ | ३ |
| निष्पत्तिरचमत्कारो | निष्पत्तिश्चमत्कारो | १०२ | १७ |
| यत्तत्र | यच्चत्र | " | २५ |
| -पानत्वादिके | -पावनत्वादिके | १०५ | ११ |
| व्यक्तुम् , | त्यक्तुम्, | १११ | ७ |
| धीमद्भिर्निर्दिष्टानि | धात्रीनिर्दिष्टानि | ११२ | १६ |

## हिन्दी रसगंगाध

( शोधपूर्ण परिवर्द्धित द्वितीय संस्करण )

व्याख्याकार—

**कविशेखर पं० बदरीनाथ झा तथा आचार्य मदनमोहन झा**

संस्कृतसाहित्य-क्षेत्र की यह न्यूनता देखकर इस पर अत्यन्त सरल संस्कृत व्याख्या और उस व्याख्या तथा मूल के स्पष्टीकरण के लिये जो सुविस्तृत हिन्दी भाष्य किया गया है इससे रसगंगाधर में एक नवीन मौलिकता आ गई है। इसके हिन्दी भाष्य में ग्रन्थकार का आशय इतना स्पष्ट हुआ है कि हिन्दी भाष्य मात्र ही आद्योपान्त एक बार पढ़ लेने से विषय चिर-अभ्यस्त की भाँति हृदयपटल पर अङ्कित हो जाता है।

इसकी लगभग १०० पृष्ठों की विस्तृत आलोचनात्मक भूमिका मात्र पढ़ लेने से भी छात्रों को मुख्य-मुख्य सिद्धान्तों का आवश्यक बोध हो जायगा।

संस्कृत-साहित्य के अध्येता, अध्यापकों एवं अनुरागियों के लिये यह संस्करण सर्वथा ही संग्रहणीय और मननीय है।

मूल्य प्रथमभाग–प्रथमानन ९-०० द्वितीयभाग–उत्प्रेक्षालङ्कारान्त १२-५० तृतीयभाग–अतिशयोक्त्यलङ्कारादि समाप्ति पर्यन्त। शीघ्र प्राप्त होगा

## हिन्दी ध्वन्यालोक-लोचन

व्याख्याकार :–आचार्य जगन्नाथ पाठक

प्राचीन भारतीय साहित्य-शास्त्र में नवीन युग के प्रवर्तक आचार्य आनन्दवर्धन-विरचित 'ध्वन्यालोक' और उस पर आचार्य अभिनवगुप्त कृत 'लोचन' टीका के महत्त्व से भारतीय साहित्य का कोई भी जिज्ञासु अपने को अपरिचित नहीं रख सकता। प्रस्तुत संस्करण उसी महान् कृति का हिन्दी रूप एवं व्याख्यान है। मूल ग्रन्थ का मूल टीका के साथ हिन्दी का यह संस्करण आधुनिकतम शैली में प्रस्तुत होकर हिन्दी के क्षेत्र में अपनी प्राचीन साहित्य-शास्त्रीय मान्यताओं के सर्वाङ्गीण आकलन में विद्वानों और विद्यार्थियों के लिए सहायक हो सके इसका विशेष ध्यान रखा गया है। अब तक लोचन का हिन्दी रूप प्रकाश में नहीं आया था। ग्रन्थ-ग्रन्थि और अस्पष्टता के निराकरण के लिए व्याख्यान रूप में विवेचन द्वारा ग्रन्थ को सहजगम्य बनाया गया है। साथ ही सम्बद्ध विषयों पर विचार करते हुए विस्तृत भूमिका ग्रन्थ के गौरव के अनुकूल प्रस्तुत की गई है। मूल लोचन में संशोधन भी किया गया है। प्रथम उद्द्योत मूल्य ४-००

सम्पूर्ण ग्रन्थ भी शी[illegible]प्त होगा

---

प्राप्तिस्थानम्—चौखम्बा विद्याभवन, चौक, वाराण[illegible]